यस सङ्ग्रहका लघुनाटकहरूमा संस्कृत नाट्यशैलीलाई बहुधा आत्मसात् गरिएको पाइन्छ । विभिन्न लेखकहरूले प्राचीन शैली र अर्वाचीन शैलीलाई रुचिअनुसार ग्रहण गरेका छन् । कतिपय लघुनाटकमा सूत्रधार, नट, नटी आदिको पनि प्रयोग गरिएको छ भने कतिपय नाटकमा पद्यको पनि प्रयोग भेटिन्छ । यस सङ्ग्रहका नाटकहरू रङ्गमञ्चलाई विचार गरेर, प्रस्तुतिको अवस्थालाई ध्यानमा राखेर रचना गरिएका छन् । यहाँका लघुनाटकमा स्पल्प पात्रको प्रयोग गरिएको छ भने संवादहरू पनि त्यति धेरै लामा छैनन् भन्न सकिन्छ । अल्पपात्रको प्रयोगले रङ्गमञ्चव्यवस्थापन, प्रशिक्षण, मञ्चन आदि कार्यमा सहजता हुन्छ भन्ने मेरो धारणा रहेको छ ।

## १०. नेपालमा संस्कृत नाटक प्रदर्शन

नेपाल आदिकालदेखि नै शिव र पार्वतीको क्रीडाभूमि हो । शिव स्वयं नाटराज हुन् । त्यसैले गर्दा यहाँ गीत, सङ्गीत, नाटक आदिको प्रयोग भयो होला भनेर अनुमान गर्न सकिन्छ । नाट्यप्रदर्शनमा लिच्छवि, मल्ल र शाहकालमा अनेक प्रयत्नहरू भएको कुरा ऐतिहासिक तथ्यबाट बुझ्न सकिन्छ ।

**(क) लिच्छविकाल :** लिच्छविकाल (ईशाको १ देखि १२ औँ शताब्दीसम्म) मा के कस्ता नाटकहरूको अभिनय भयो भन्न सकिदैन । तर पनि छैटौँ शताब्दीमा नेपाल आएका चिनियाँ पर्यटक ह्वेन्त्साङ्गले उनको भ्रमण वृत्तान्तमा नेपालमा मनोरञ्जनका लागि गीत, नृत्य र नाटकको आयोजना हुने कुरा उल्लेख गरेका छन् । तर ती नाटकको विवरण भने कतै पनि पाउन सकिएको छैन । ती नाटक कस्ता थिए, कसले लेखेका थिए, कसरी मञ्चन हुन्थ्यो भन्न सकिदैन । ८ औँ शताब्दीपूर्व लिच्छविकालका लिखित पुस्तकहरू पनि पाउन सकिदैन । त्यस समयमा संस्कृत लेखिएका २०० जति शिलालेख र धातु अभिलेखहरू भने उपलब्ध रहेका छन् । लिच्छविकालमा संस्कृत नै राजभाषा रहेको थियो ।

**(ख) मल्लकाल :** मल्लकाल संस्कृत नाटक लेखन र मञ्चनका दृष्टिले निकै उर्वर रहेको देखिन्छ । मल्लकालमा लेखिएका ३२ वटा नाटकहरूको विवरण र नाटकहरू पनि राष्ट्रिय अभिलेखालयमा पाउन सकिन्छ भने कतिपय नाटकहरू प्रकाशित पनि भएका छन् । जगज्ज्योतिर्मल्ल-वि.सं. १६८५) मा हरगौरीविवाह नाटक, कुञ्जविहारी नाटक, कुवलयास्व नाटक लेखेका थिए र आफ्नै तुलादान



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

समारोहमा ती नाटकहरू प्रदर्शन पनि गरिएको थियो । अन्य नाटकहरू पनि प्रदर्शित भएका थिए भन्ने सूचना पाइन्छ ।

जगत्प्रकाशमल्लले वसन्तपुरको राजप्रासादमा एक रङ्गशालाको निर्माण गराएका थिए भन्ने पनि ऐतिह्यका विचार पाइन्छ। जितामित्रमल्लले अश्वमेधनाटक लेखेको र प्रदर्शित गरेको जानकारी पाइन्छ । प्रतापमल्लले पशुपतिनाथ मन्दिरमा तीन महिनासम्म बसेर प्रायश्चित्त र केही अनुष्ठानसमेत गरेका थिए, मन्दिर बनाएका थिए भने तुलादान पनि गरेका थिए । त्यस अवसरमा वंशमणिविरचित गीतिदिगम्बर नाटक प्रदर्शित गरिएको थियो भन्ने विज्ञहरूको अभिमत रहेको पाइन्छ । प्रतापमल्ल स्वयं कवि थिए । उनका रचना शिलापत्रमा पाइन्छन् ।

**(ग) शाहकाल:** शाहकालमा प्रजातन्त्रपूर्व संस्कृत नाटक मञ्चन भयो होला तर त्यसको कुनै विवरण पाउन सकिएको छैन । वि.सं. १८०१ देखि १८७१ सम्म नेपाल एकीकरणमा नै समय गएको देखिन्छ । सुगौली सन्धिपछि १८७१ पछि १९०३ सम्म युद्धअन्तरालको समय रह्यो र आन्तरिक कलहमा समय गयो । विसं. १९०३ मा जङ्गबहादुर राणाले राज्यको बाग्डोर आफ्नो हातमा लिए । उनले पनि स्वदेश र विदेशका अनेक अप्ठ्याराहरूलाई मिलाउँदैमा, भाइभारदारलाई मिलाउँदैमा समय बिताए । वीर समसेर सत्तामा आएपछि मनोरञ्जन, रङ्गशैसको समय सुरु भएको देखिन्छ । वीरसमसेरकै दरबारमा प्रदर्शन गर्न अभिज्ञान शाकुन्तल र प्रियदर्शिकाको नेपालीमा मोतीराम भट्टले अनुवाद गरेका थिए भन्ने पनि पाइन्छ । राणकालमा भने अनेक राणादरबारमा नै प्रेक्षागृह बनाइएको पाइन्छ र त्यहाँ नाटक मञ्चन हुने गरेको सूचना पनि पाइन्छ । राणाकालमा सुरुमा उर्दूका नाटक हुन्थे भने पछि नेपाली नाटकको पनि प्रदर्शन हुन थालेको बुझिन्छ । राणाकालमा संस्कृत नाटक प्रदर्शन भए नभएको विषय त्यति स्पष्ट छैन ।

**(घ) प्रजातान्त्रिक शाहकाल:** यो कालखण्ड २००७ सालदेखि २०६४ सालसम्म रह्यो । २००४ सालको जयतु संस्कृतम् आन्दोलदेखि नै संस्कृतका विद्यार्थीहरूले यदाकदा संस्कृत नाटक मञ्चन गर्ने गरेको भन्ने त सुनिन्छ तर त्यसको कुनै ठोस प्रमाण भने भेटिएको छैन । २००९ सालमा काठमाडौँमा राजकीय संस्कृत महाविद्यालय स्थापना हुँदा पनि नाटक र सांस्कृतिक कार्यक्रम भएको भन्ने सुनिन्छ तर त्यसको ठोस आधार भने पाउन सकिएको छैन ।

जब चूडानाथ भट्टराई, तोयनाथ पाण्डेय, विद्यानाथ उपाध्याय, ऋषिराम पोखेल नाटकक्षेत्रमा आए र त्यसपछि संस्कृत नाटक प्रदर्शनमा गति आउन थाल्यो । संस्कृत नाटक समितिको चर्चा हुन थाल्यो र २०१४ सालमा त यस्तो



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

समिति बन्यो पनि । अनि नेपालमा संस्कृत नाटक प्रदर्शन प्रारम्भ भयो । त्यो नाटक समितिमा चूडानाथ भट्टराइ सभापति थिए भने विद्यानथ उपाध्याय सचिव पदमा रहेका थिए । यस संस्कृत नाटक समितिले एक दशकमा अनेक नाटकको प्रदर्शनसमेत गऱ्यो ।

२०१४ सालमा भारतका राष्ट्रपति राजेन्द्रप्रसाद नेपाल आएका थिए । त्यस अवसरमा मुद्राराक्षस भन्ने संस्कृत नाटक प्रदर्शन गरिएको थियो । चूडानाथ र तोयनाथको नेतृत्वमा यो नाटकको मञ्चन गरिएको थियो ।

त्यस्तै नेपाल राजकीय प्रज्ञाप्रष्ठिानको वार्षिकदिवसको अवसरमा पनि (२०१५) स्वप्नवासवदत्तं नाटक प्रदर्श गरिएको थियो । त्यस्तै चतुर्थ बौद्धविश्वसम्मेलनमा नागानन्द नाटक प्रदर्शन गरिएको थियो । त्यस नाटकमा तोयनाथ नायक बनेका थिए भने गरुडको भूमिकामा विद्यानाथ रहेका थिए, त्रिचन्द्र कलेजका प्राध्यापक आशुतोष गांगुलीकी पुत्री नायिकाको भूमिकामा रहनुभएको थियो । नायक तोयनाथ र नायिकाको भूमिकामा रहेकी गांगुलीलाई राजा महेन्द्रले विशेष पुरस्कार पनि दिएका थिए (विद्यानाथ उपाध्यायबाट प्राप्त सूचना) ।

त्यसबेला भारतीय राजदूत हरीश्वरकी श्रीमतीकी आमा संस्कृतका विदुषी थिइन् । तिनको नाम क्षमाराव थियो । तिनी संस्कृतको नाटक पनि लेख्ने गर्दथिन् ।

त्यसैले गर्दा भारतीय दूतावासमा संस्कृतका र अन्य नाटक पनि प्रदर्शित हुन्थे । कुनै बेला नाटक हेर्न राजा महेन्द्रलाई पनि बोलाइएको थियो र केही संस्कृतका विद्वान्हरूलाई पनि निम्ता थियो । राजा महेन्द्र चलाख थिए र राष्ट्रवादी पनि थिए, कुनै पनि गौरवको काम नेपालले गर्नुपर्छ, कोहीसंग पनि नेपाल हेपिनुहुँदैन भन्ने मान्यता राख्थे । भारतीयहरूले संस्कृत नाटक प्रदर्शन गर्न सकेकामा निकै घमण्ड व्यक्त भएको बुझे । सोही ठाउँमा नौ राजा महेन्द्रले चूडानाथलाई डाकेर मन्दस्वरमा हामीले पनि संस्कृत नाटक देखाउन सक्तौनौँ ? सकिन्छ भने प्रयत्न गर्नुहोस न । चतुर चूडानाथले पनि तुरुन्तै साधनस्रोत जुटेमा सकिन्छ किन नसक्नु भनी जबाफ दिए । राजाले तत्कालै मन्त्रालयका चन्द्रमानलाई डाकेर संस्कृत नाटकका लागि साधनस्रोत जाटाइदिन निर्देशन दिए । साधनस्रोत जुट्यो, तालिम चल्यो, नाटक पात्रहरू छानिए, संवाद घोकियो । त्यसमा विश्वप्रसिद्ध कालिदासको अभिज्ञान शाकुन्तल नाटक प्रस्तुत गरिएको थियो । नाटक भव्यतापूर्वक मञ्चन भयो । त्यो नाटक सिंहदरबारको प्रेक्षालयमा प्रदर्शन गरिएको थियो । सो नाटक प्रदर्शनमा भारतीय दूतावासका अधिकारीहरूलाई पनि आमन्त्रण गरिएको थियो ।

अभिज्ञानशाकुन्तलमा विद्यानाथले सारथिको दुर्वासा ऋषको र कश्यपको



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भूमिका निर्वाह गरेका थिए तोयनाथ, ऋषिराम आदिले पनि नाटकमा भाग लिएका थिए (विद्यानाथ उपाध्यायबाट प्राप्त सूचना)।

त्यसपछि सिंहदरबारकै प्रेक्षागृहमा मृच्छकटिक नाटक पनि मञ्चित भयो। त्यस्तै सोही रङ्गमञ्चमा त्रिभुवनविश्वविद्यालयको वार्षिक दिवसको अवसरमा (२०१८-१९) मालतीमाधव भन्ने कालिदासको नाटकको अभिनय गरिएको थियो र यसका निर्देशक विद्यानाथ उपाध्याय रहेका थिए। विजयनाथ नायक र ऋषिराम पोखेल (प्राध्यापक) कपालकुण्डलाको भूमिकायमा रहेका थिए। यसै कालखण्डमा संस्कृत छात्रसंघले 'भगवदज्जुकम्' नाटक प्रस्तुत गरेको थियो॥ बेला बेलामा विश्वज्योति चलचित्र मन्दिरमा पनि नाटकको मञ्चन हुनेगरेको थियो। संस्कृतका विद्यापीठहरूमा र संस्कृत विद्यालयहरूमा पनि संस्कृतका छोटा नाटक वा छोट्याएर नाटक प्रदर्शन गरिन्थे त्यसको पूरा विवरण त पाउन सकिदैन तैपनि सामान्य सूचना भने मिल्दछ। विद्यानथ उपाध्यायले अनेक स्थानमा नवरसको भावाभिनय देखाउने गरेको जानकारी पनि दिनुहुन्छ।

साहित्यदर्पणमा रसको व्याख्याक्रममा प्रस्तुत पद्य र गद्यखण्डको संकलन गरेर नवरसको संयोजन गरिएको थियो। नवरसको प्रस्तुतिबाट राजा महेन्द्र पनि अत्यन्त खुसी भएका थिए। त्यसैले संस्कृतको नाटक प्रदर्शनमा हौसला दिन्थे। राजा महेन्द्रले संस्कृतको राम्रै अध्ययन गरेका थिए। २०१३ सालदेखि २०१७ सालसम्म संस्कृतका छात्रहरू सक्रिय थिए, अनेक कार्यमा भाग लिन्थे। अन्तर्राष्ट्रिय गोष्ठीहरूमा पनि प्रतिनिधित्व गर्थे। एक पटक बनारसमा छात्रजीवनमा नै विद्यानाथले 'भगवदज्जुकम्' नाटकको अभिनय गरेका थिए। शाण्डिल्यको भूमिका निर्वाह गरेका थिए। चरतमा नै उनले अभिज्ञानशाकुन्तल को अभिनयमा भाग लिएका थिए र पुरस्कारसमेत पाएका थिजए। (विद्यानाथ उपाध्यायबाट प्राप्ता सूचना)।

यसै कलखण्डमा 'नेपाली आमाको ऋण' भन्ने नाटक तोयनाथ र श्यामदास वैष्णवको नेतृत्व र निर्देशनमा अभिनीत भएको थियो। त्यसमा दाङका केशवदीपकले पनि भाग लिएका थिए। संस्कृतको अर्को नाटक 'तमसो ज्योतिंषि' तोयनाथले लेखेका थिए र पछि जयतु संस्कृतम् पत्रिकामा प्रकाशित भयो। यो नाटक डिल्लीबजारको सांस्कृतिकभवनमा अभिनीत भएको थियो (विद्यानाथ उपाध्यायबाट प्राप्ता सूचना)।

यसै कालखण्डमा तोयनाथ पाण्डेको निर्देशनमा लेखनाथ पौडेलले लेखेको 'लक्ष्मीपूजा' नेपाली नाटक सिंहप्रासाद प्रेक्षागृहमा प्रदर्शित गरिएको थियो। त्यसमा पनि संस्कृतका छात्रहरूको अभिनयमा सक्रियता रहेको छ। यसै



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कालखण्डमा संस्कृतछात्रावासमा बृहद् आरण्यकोपनिषदको जनकसभा नाममा लेखिएको नाटक पनि अभिनीत भयो । यसको संवादरचना चूडानाथभट्टरायले लेखेका थिए । त्यस नाटकको याज्ञवल्क्यको भूमिकामा विद्यानाथ उपाध्याय थिए । सम्भवतः तीनधारा संस्कृत छात्रावासको २०२५ मा पुनर्निर्माण गरेर यहाँको सभाकक्षमा त्यो नाटकको योजना गरिएको थियो । चूडानाथ भट्टराय नेपाल राजकीय प्रज्ञाप्रतिष्ठानको उपकुलपति हुँदा प्रज्ञाको नवीन र भव्य प्रेक्षागृहमा कुमारसम्भव काव्यको भावाभिनय प्रस्तुत गरिएको थियो ।

वाल्मीकि विद्यापीठको वार्षिक जन्मजयन्तीका अवसरमा ०४०-४१ मा रत्नाकरभावाभिनयम् प्रस्तुत गरिएको थियो । यस पङ्क्तिकारले रत्नाकरको भूमिका निर्वाह गरेको थियो । यसैताका संस्कृत छात्रावासमा यस पङ्क्तिकारले तयार गरेको कालचक्र लघुनाटकको अभिनय गरिएको थियो । संस्कृत विश्वविद्यालयको स्थापना २०४३ मंसिर २५ गते भएको थियो । त्यसपछि नाटक प्रदर्शनमा केही गति आएको थियो । राजा श्री ५ वीरेन्द्र सरकारको उपस्थितिमा सुर्खेत विकासक्षेत्रमा पनि मेघदूतको भावाभिनय प्रस्तुत गरिएको थियो । त्यस्तै राजा वीरेन्द्रको समुपस्थितिमा ०४४।०४५ सालमा भगवदज्जुकम् नाटक प्रदर्शन गरिएको थियो । यसमा पनि नेसंविका तत्कालीन शिक्षाध्यक्ष विद्यानाथ उपाध्यायको निर्देशन रहेको थियो ।

यसै कालखण्डमा २०४५ सालमा महेन्द्र संस्कृत विश्वविद्यालयको समुद्घाटनका अवसरमा श्री ५ वीरेन्द्र सरकारकै समुपस्थितिमा भगवदज्जुकम् नाटक देखाइएको थियो । त्यस्तै राष्ट्रिय सभागृहमा नेपाल भारत विद्वत् गोष्ठीका अवसरमा २०५१ सालमा मेघदूत भावाभिनय प्रस्तुत गरिएको थियो भने कुमारसम्भव-भावाभिनय (२०५१ वैक्रमाब्द) पनि प्रस्तुत भएको थियो । यस्तै २०५२ सालमा 'कौत्सस्य गुरुदक्षिणा' प्रस्तुत भएको थियो । जयतु संस्कृतम् आन्दोलन २००४ को स्वर्णमहोत्सवका अवसरमा राष्ट्रिय नाचघरमा २०५४ सालमा 'भगवदज्जुकम्' नाटक प्रस्तुत गरिएको थियो भने २०५४ सालमा नै 'रागविरागम्' प्रस्तुत गरिएको थियो । २०५५ सालमा 'शार्दूलसम्पातः' प्रस्तुत गरिएको थियो । यसै समयमा २०५८ सालमा प्रज्ञाको प्रेक्षालयमा नाट्यमहोत्सवमा त्रिशूलप्रहारम् प्रस्तुत भयो भने २०६१ सालमा भगवदज्जुकम् २०७० सालमा डीएभी विद्यापीठ, ल.पु.मा अस्तव्यस्तम्, र २०७२ सालमा वाल्मीकि विद्यापीठमा अस्थायी रूपमा निर्मित प्रेक्षालयमा प्राडा. ऋषिराम पोखेलबाट रचित स त्वम् अहम्, र अन्य कसैको धिक् मदनम् (नाटक पनि प्रस्तुत भएको थियो । २०७६ सालमा सर्वनाम प्रेक्षालयमा कान्तिभैरव गुरुकुलले तोयनाथ पाण्डेको तमसो ज्योतिषि नाटक



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

देखाइएको थियो । २०८१ चैत्र २६ र २८ गते पर्यटन बोर्डको प्रेक्षालयमा प्रा.डा. नवराज कट्टेलबाट रचित नारी शिक्षा र जागरणमा आधारित प्रतिष्ठा नाटक पनि कान्तिभैरव गुरुकुलले प्रदर्शन गरेको थियो । प्रा शिवहरिमरहट्टा विश्वविद्यालयको उपकुलपति भएपछि (२०६८-७१) एक नाटक समिति पनि बनाइएको थियो । यस समितिद्वारा पनि डिएभिकलेजको सभाकक्षमा कुमारसंभवको भावाभिनय प्रस्तुत गरिएको थियो यी कतिपय नाटकहरूको योजनामा घनश्याम खतिवडाको सक्रियता थियो भने भावाभिनयमा प्रा. विद्यानाथ उपाध्यायको सक्रियता रहेको थियो ।

यी नाटकहरूको प्रदर्शनमा प्रा. विद्यानाथ-उपाध्याय, प्रा.डा. ऋषिरामपोखेल, प्रा.डा. नवराजकट्टेल, प्रा.डा.श्रीराम-अधिकारी, रङ्गकर्मी डा. घनश्याम खतिवडाको योगदान रहेको देखिन्छ । घनश्याम खतिवडा संस्कृत रङ्गमञ्चको निर्माणमा सक्रिय देखिन्छन् । संस्थागत रूपमा जयतु संस्कृतम् संस्थाको योगदान पनि महनीय रहेको छ । यस्तै नेपाल संस्कृत विश्वविद्यालय र वाल्मीकिविद्यापीठका छात्रहरूको, कान्तिभैरव गुरुकुलका छात्रहरूको नाट्याभिनयमा योगदान रहेको पाइन्छ ।

**११. नेपालमा नाट्यरचना र नाट्यमञ्चनमा जयतु संस्कृतम्को प्रयत्न**

जयतु संस्कृतम्को गठनसंगै नाट्यप्रदर्शन सुरु भएको थियो । भगवदज्जुकम् नाटक त्यस वेला २०५४ सालमा राष्ट्रिय नाचघरमा देखाइएको थियो र त्यसको निर्देशन प्रा. विद्यानाथ उपाध्यायले गर्नुभएको थियो । त्यति मात्र होइन जयतु संस्कृतम् को नामकरण हुनुअघि पुरानो संस्कृत नाटक समिति नै पुनर्जीवित गर्ने प्रस्ताव पनि आएको थियो । नेपाल संस्कृत नाटक सङ्घ बनाउने कि भनी कुरा पनि चलेको थियो । पछि 'जयतु संस्कृतम्' संस्थाको नाम राखियो । संस्कृत जगत्का सबै काम यस संस्थाले गर्ने र जयतु संस्कृतम् आन्दोलन २००४ संस्मरणलाई जीवित राख्ने लक्ष्य राखिएको थियो । नेपालमा हजारौँ सामाजिक र साहित्यक संस्था भए पनि संस्कृतको काम गर्ने सामाजिक साहित्यिक संस्था नभएको अवस्थामा यस संस्थाले काम गर्नुपर्छ भन्ने प्रतिबद्धता प्रकट गरिएको थियो ।

जयतु संस्कृतम् संस्था २०५५ भाद्र २९ मा दर्ता भयो र यसले काम गर्न थाल्यो । स्वर्णमहोत्सव २०५४ सालमा भगवदज्जुकम् नाटक प्रस्तुत गरिएको थियो भने २०५४ सालमा नै 'रागविरागम्' प्रस्तुत गरिएको थियो । २०५५ सालमा शार्दूलसम्पातः प्रस्तुत गरिएको थियो । यसै समयमा २०५८ सालमा



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रज्ञाको प्रेक्षालयमा नाट्यमहोत्सवमा 'त्रिशूलप्रहारम्' प्रस्तुत भयो । त्यसपछि जति पनि संस्कृतका नाटकहरूको प्रदर्शन भएका थिए त्यसमा कतै न कतै जयतु संस्कृतम् को भूमिका र सहयोग रहेको थियो । विगत २७ वर्षका अवधिमा दर्जनौं नाटक मञ्चन भएका छन्, तिनमा संस्था जोडिदै आएको छ ।

नेपालमा संस्कृत नाट्यसाहित्य अगाडि बढाउन २०७४ सालमा निर्णय गरेर नै विभिन्न लेखकहरूलाई नाटकको रचनाका निमित्त अनुरोध गरिएको थियो । तर नाटक आएका थिएनन् । कोभिड् -१९ को समयमा सारा संसार बन्द भयो, नेपाल पनि बन्द भयो । सारा नेपालीहरू घरघरमा नै थुनिए । तर संस्कृत भने घरघरबाट भ्रमण गर्नथाल्यो । आकाश धर्ती सबैतिर फैलियो । सामाजिक सञ्जाल र इन्टरनेटमा परिव्याप्त भयो । जयतु संस्कृतम्ले पनि अनेक काम गऱ्यो । संस्कृतभाषा प्रशिक्षण चल्यो ११५ दिन । कविगोष्ठी चल्यो २ र १ दिन । विचारगोष्ठी चल्यो ७ क्षेत्रमा ७ दिन । खण्डकाव्य, महाकाव्य र नाटकहरू लेख्न थालिए । अनि यसै क्रममा ६०।७० सानाठूला नाटक तयार भए । यसैको उपज यो संस्कृत लघुनाटक सङ्ग्रह पनि हो ।

**(क) कर्मफलं लघुनाटक सङ्ग्रह :** प्रा.डा. नवराज कट्टेलबाट यस नाटकको रचना भएको हो । कर्मफलम् नाटकमा (२१) लघुनाटक सङ्कलित छन् । रङ्गमञ्चको विचार गरेर यी नाटकहरूको रचना गरिएको छ । २।३ पृष्ठका नाटकदेखि २१।२२ पेजसम्म फैलिएका नाटक यसमा छन् भने नाटक सङ्ग्रह २६५ पृष्ठमा फैलिएको छ । त्यस्तै उक्त सङ्ग्रहमा सामान्यरूपका, मौनरूपक, एकालापीयरूपका र स्वप्नबिम्ब र मध्यारम्भ, शिलायित भएका नाटक पनि छन् । त्यस्तै ध्वनिमाध्यमबाट, प्रकाशमाध्यमबाट वाद्यवादनमाध्यबाट प्रस्तुत गरिएका विविध शैलीका नाटक पनि यसमा रहेका छन् । द्वन्द्वतत्त्व पर्याप्त मात्रामा पाइने नाटक, बिम्बात्मक, प्रतीकात्मक र दार्शनिकबिम्बयुक्त नाटक पनि यहाँ देख्न सकिन्छ ।

यससङ्ग्रहका रूपकहरूमा विभिन्न कथास्रोतको प्रयोग गरिएको पाइन्छ । साहित्यदर्पणकारका अनुसार नाटकमा ख्यातः, उत्पाद्यः, मिश्र तीन किसिमका कथास्रोत हुन सक्छन् । कर्मफलं, अहङ्कारप्रशमनम्, महिषासुरवधम्, रक्तबीजम् योजनगन्धा, बालश्रापः, रत्नाकरः, वाजसनेयो याज्ञवल्क्यः, बुद्धस्य त्यागः, यी रूपकमा पुराण र इतिहासमा प्रसिद्ध कथानकबाट वस्तुको चयन गरिएको छ । अन्य रूपकहरूमा इतिहासबाट, व्यवहारबाट र कल्पनाप्रसूत पनि छन् । नेपालविजयम्, बहादुरशाहः, भानुभक्तः मा ऐतिहासिक विषयवस्तु पाइन्छ । अन्य



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रूपकहरू व्यावहारिक र कल्पनाप्रसूत विषयमा आधारित छन् ।

सत्यघटनामा आश्रित नाटकमा विश्वपिञ्जरम् र विगतसंज्ञा मानसी दुई नाटक छन् । यस्तै कल्पनाश्रित नाटकमा कामरूपः, कामरूपा, सङ्घातः, मौनम्, प्रेतात्मा, प्रतिष्ठा इत्यादि नाटक छन् । यस्तै गतचेतना मानसी, कामरूपः, कामरूपा रूपकमा शृङ्गारभावधारा रहेको पाइन्छ । प्रतिष्ठा २०८१ चैत्र २६ र २८ मा काठमाडौँको पर्यटनबोर्डको प्रेक्षागृहमा कान्तिभैरव गुरुकुलका विद्यार्थीहरूबाट मञ्चन पनि भएको छ ।

**(ख) पूर्णाङ्गी नाटक :** नेपाल संस्कृत नाटक नारायण प्रसाद शास्त्रीको नेपालमाता र कवि रामहरि दाहालका आचारिकम्, सत्प्रभावम्, गुरुकुलचर्यम्, दृष्टिसृष्टिः, जस्ता ४ पूर्णाङ्गी नाटक एवं आचार्य खेमराज केशवशरणको मित्रसङ्गमः, प्राडा. विष्णुप्रसाद देवकोटाको 'कृष्णागारोज्जीवनम्' नाटक लेखन र प्रकाशनमा जयतु संस्कृतम् संस्थाको महनीय भूमिका रहेको छ । यी सात वटा संस्कृत नाटकहरूको संकलन, सम्पादन र प्रकाशनमा जयतु संस्कृतम् को अतुलनीय योगदान रहेको छ ।

**(ग) संस्कृतनाटिकाकौस्तुभम् (संस्कृतलघुनाटक-सङ्ग्रहः):** यस संग्रहमा १८ जनाका २८ वाटा लघुनाटकहरू सङ्कलन, सम्पादन र प्रकाशन गरिएको छ । यसमा धेरैजसो नाटकहरू समसामयिक विषयमा केन्द्रित छन् । रचनाकारहरू सामान्यदेखि विशिष्ट विद्वान्हरूसम्म रहनुभएकाले त्यसको रचनामा पनि प्रभाव रहेको पाइन्छ । नाटकहरू रङ्गमञ्चलाई ख्याल गरेर रचना गरिएको छ भने संस्थाले पनि संस्कृत नाट्यमहोत्सवको आयोजना गर्ने योजना गरिरहेको छ । यस सङ्ग्रहमा प्रकाशित भएका कतिपय नाटकहरू रङ्गमञ्चहरूमा प्रस्तुत भैसकेका छन् । प्रा. ऋषिराम पोखरेलको स, त्वम् अहम्, तोयनाथ पाण्डेको तमसो ज्योतिषि र प्रा. नवराज कट्टेलको प्रतिष्ठालगायतका केही नाटक मञ्चन भैसकेका छन् । प्रा. रामहरि दाहालको नाटक ११-१२ कक्षाको पाठ्यपुस्तकमा पनि समावेश भैसको देखिन्छ ।

यस रूपक सङ्ग्रहमा प्रा.डा.ऋषिराम पोखरेलको स, त्वम् अहम्, गुरुकुलम् रहेका छन् भने डा.कृष्णप्रसाद भट्टराईको अङ्गुलिमालः, डा. चन्द्रमणि नेपालको विदेशयानम्, डा. छत्रपति दाहालको दिनचर्या, डिल्लीश्वर भट्टराईको परिस्थितिचित्रणम्, प्रा.तोयनाथ पाण्डेयको तमसो ज्योतिषि र मातृहत्याधारम् जस्ता रचना रहेका छन् । त्यस्तै डा.ध्रुवप्रसाद भट्टराईको निशापुरेशायनम्, प्रा.डा.नवराज कट्टेलको योजनगन्धा र प्रतिष्ठा, यसमा प्रकाशित छन् ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्यस्तै नवराज पाण्डेको पश्चात्तापः, पिप्पलमणि सिग्देलको पौरस्त्यसंस्कृतिः डा.बद्री पोखेलको प्रत्यागमनम्, डा.भवानीशङ्कर भट्टराईको रोगात् त्रासो भयावहः, डा. महानन्द तिमल्सिनाको जीवेत् सदा संस्कृतम्, यदु पन्थीको प्रेमविवाह, प्रा. रामहरि दाहालका कर्मसिद्धिः, शान्तिदूतम्, : प्रत्यादेषणम्, शान्तिसंविदम्, रोहिणराज तिमल्सिनाको नृसिंहप्रभवम्, प्रा.डा. विष्णुप्रसाद देवकोटाका गोरखकृपादृष्टिः, नैपालैकीकरणम्, सुगताभयदानम् गरी तीन एकाङ्की छन् । डा.हरिहरशर्मा अर्यालको निरक्षरता, पश्चात्तापः, द्रव्यमेध व्रत गरी तीन एकाङ्की रहेका छन् । यस सङ्ग्रहमा १८ जनाका २८ नक्षत्रको एउटा मणिमय नाट्यमाला तयार भएको छ । त्यसैले यसको नाम पनि संस्कृतनाटिकाकौस्तुभम् राखिएको छ ।

## १२. प्रस्तुत सङ्ग्रहका नाटकहरूको सर्वेक्षण

प्रस्तुत एकाङ्कसङ्ग्रहमा १८ जनाका २८ वटा लघुनाटकहरूको सङ्कलन सम्पादन र प्रकाशन गरिएको छ । नाटक लेख्दालेख्दा परिष्कारपूर्ण नाटक लेख्नेहरूको संख्या यहाँ पाउन दुर्लभै छ । नाटकलेखन अभियानकै कारण नाटक लेखिएको हो । त्यसैले गर्दा सबै नाटक परिष्कृत छन् भन्न सकिदैन । तै पनि लेखकहरूले नाटक तयार गर्न निकै परिश्रम गर्नुभएको छ । भाषासम्पादनमा पनि निकै परिश्रम गरिएको छ । पाँचवटा पूर्वप्रकाशित नाटकहरू पनि यहाँ समाविष्ट भएका छन् ।

प्रस्तुत सङ्ग्रहमा संकलन भएका अधिकाँश नाटकहरूले संस्कृत वाङ्मय, पौरस्त्य संस्कृति, धर्म, दर्शन, जीवनपद्धति, शिक्षा, शान्ति आदिलाई विषय बनाएका छन् । स, त्वम् अहम्, गुरुकुलम्, डा. छत्रपति दाहालको दिनचर्या, रामहरि दाहालका कर्मसिद्धिः, शान्तिदूतम्, प्रत्यादेषणम् आदि रहेका छन् ।

प्रा.डा. विष्णुप्रसाद देवकोटाको गोरखकृपादृष्टिः, नैपालैकीकरणम्, सुगताभयदानम् तीन वटा नाटक नै ऐतिहासिक विषयमा आधारित देखिन्छन् । तोयनाथ पाण्डेको मातृहत्याधारम्, प्रा रामहरि दाहालको शान्तिदूतः, प्रत्यादेषणम् प्रा. नवराज कट्टेलको योजनगन्धा, आदि नाटकहरू पौराणिक विषयमा आधारित देखिन्छन् । डा.कृष्णप्रसाद भट्टराईको अङ्गुलिमालः बुद्धसन्देशमा आधारित छ । नेपालको समसामयिक समस्यामा आधारित भएर डा. चन्द्रमणि नेपालको विदेशंयानम्, महानन्द तिमल्सिनाको जीवेत् सदा संस्कृतम्, यदु पन्थीको प्रेमविवाह, प्रा. नवराज कट्टेलको प्रतिष्ठा, नवराज पाण्डेको प्रश्चात्तापः, ध्रुवप्रसाद भट्टराईको निशापुरेशायनम्, पिप्पलमणि सिग्देलको पौरस्त्यसंस्कृतिः डा.बद्री पोखेलको प्रत्यागमनम्, डा.भवानीशङ्कर भट्टराईको रोगात् त्रासो भयावहः आदिको



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रचना गरिएको देखिन्छ ।

प्रा. नवराज कट्टेलको योजनगन्धा र प्रतिष्ठा जस्ता नाटकमा केही नवीन प्रवत्ति रहेको छ । यसमा योजनागन्धाका अनेक क्रियाकलापमा कुतूहलता, चञ्चलता, विस्मयता, अनभिज्ञता आदि भाव र क्रियाकलाप झल्केको पाइन्छ । उनको हात नै दण्डायित हुनु, कुहिरोको सृष्टि हुनु, बाघ, भालु आदि देखिनु आदि दृश्यले बेग्लै रङ्गको आस्वाद गराउँछ । विभिन्न वाद्यध्वनिले पनि दर्शकलाई ब्युउँझाउने गर्दछ भने बाघभालुका दृश्यते दर्शकलाई निकै रोमाञ्चित बनाउन सक्छ । प्रतिष्ठामा पनि मध्यारम्भ गरिएको छ भने पूर्वदीप्तिशैलीमा रोमाञ्चपूर्ण घटनाहरू देखाइएको छ । त्यस्तै डा.भवानीशङ्कर भट्टराईको रोगात् त्रासो भयावहः, डा. महानन्द तिमल्सिनाको 'जीवेत् सदा संस्कृतम्' आदिमा पनि केही नवीन प्रस्तुति र आस्वाद पाउन सकिन्छ ।

**१३. उपसंहार**

पौरस्त्य साहित्य जगत्मा कविता र नाटक निकै पुरानो विधा मानिन्छन् भने दुवैको बीज वैदिक साहित्यमा पाउन सकिन्छ । लक्षणग्रन्थको कुरा गर्दा सर्वप्रथम नाटकको लक्षणग्रन्थ भरतमुनिले ईशापूर्व (३-१ शताब्दी) को कुनै कालखण्डमा रचना गरेको मानिन्छ । भरतको नाट्यशास्त्रलाई हेरेर नै भामहले प्रकाश लेख्ने प्रेरणा पाएको हुनुपर्छ । त्यसपछि दण्डी, आनन्दवर्द्धन, भोजराज, विश्वनाथ, हेमचन्द्र, धनञ्जय, धनिक आदि आचार्यहरूको उदय भएको पाइन्छ । संस्कृत साहित्यमा सत्रौं शताब्दीसम्म ग्रन्थरचनाको प्रवाह देखिन्छ । भरतपछिका सबै साहित्यशास्त्रीहरूले नाटकका विषयमा चर्चा गरेका छन्, परिभाषा गरेका छन्, परिचय र नाटकीय तत्त्वका विविध पक्षमाथि प्रकाश पारेका छन् । आचार्यहरूले अवस्था विशेषको अनुकरण नै नाटक हो भनेका छन् र १० रूपक र १८ उपरूपकको वर्गीकरण गरेका छन् ।

आचार्य विश्वनाथले नाटकमा रहनुपर्ने विषय र रहन नहुने नाट्यवर्जनाका विषय उल्लेख गरेका छन् भने नाट्याङ्गको विस्तृत विवरण पनि दिएका छन् । आचार्य भरतले ३ किसिमको प्रेक्षागृहको चर्चा गरेका छन् । संस्कृत साहित्यमा भास नै प्रथम नाटककारका रूपमा चिनिएका छन् भने कलिदास, शूद्रक, हर्षवर्द्धन, नारायण भट्ट, राजशेखर आदि प्रसिद्ध नाटककार रहेका छन् । तिनका विषयमा प्रशस्त अध्ययन भएका छन् ।

नेपालमा लिच्छविकालमा नाटक खेलिएको संकेत पाइएपनि मल्लकालमा नाटक लेखिएको र खेलिएको स्पष्ट प्रमाणहरू भेटिन्छन् । प्रजातन्त्र पूर्वको शाहकाल नाटक रचना र अभिनयका दृष्टिले सशक्त देखिदैन तर प्रजातन्त्र



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आएपछिको शाहकालमा नाटकको रचना र प्रदर्शनमा समेत उल्लेख्य विकास भएको देखिन्छ । राजा महेन्द्रले विभिन्न नाटक र राजा वीरेन्द्रले भगवदज्जुकं नाटक र मेघदूत र कुमारसम्भवको भावाभिनय अवलोकन गरेका थिए । राजा महेन्द्रले संस्कृतको राम्रै अध्ययन गरेका थिए भन्ने पाइन्छ, त्यसैले संस्कृत नाटकमा उहाँको अभिरुचि हुनु स्वाभाविक देखिन्छ ।

जयतु संस्कृतम् संस्थाको स्थापना भएपछि जति पनि संस्कृतका कार्यहरू भएका छन् त्यसमा संस्थाको कुनै न कुनै किसिमको संलग्नता रहेको छ । संस्कृत शिक्षाको प्रवर्द्धनको कुरा होस्, गुरुकुलस्थापनाको कुरा होस्, विद्यालयका पाठ्यक्रम बनाउने विषय होस् वा अनुदान बढाउने कुरा होस् सबैतिर संस्था जोडिएको छ । गोरखापत्रमा संस्कृत समाचार प्रकाशन गर्ने कुरा होस् वा नेपाल टेलिभिजनबाट संस्कृत समाचार प्रसारण गर्ने कुरा होस्, संस्कृतका विद्वान्हरूलाई सम्मान गर्ने कुरा होस् वा संस्कृतका ग्रन्थहरू प्रकाशन गर्ने कार्य होस् सबैतिर जयतु संस्कृतम् सक्रिय रहेको छ । संस्कृत कविगोष्ठी गर्ने विषय होस् वा संस्कृत कविता सङ्ग्रह प्रकाशित गर्ने विषय होस्, संस्कृत नाटक देखाउने विषय होस् वा संस्कृत नाटक प्रकाशन गर्ने विषय होस् जयतु संस्कृतम् नै अगाडि बढेको छ । जयतु संस्कृतम् आन्दोलन २००४ स्वर्णमहोत्सव समारोह २०५४ देखि संस्कृत विकासको अभियानमा संस्था लागेको छ । सो समारोहमा संस्कृत कविगोष्ठी गरिएको थियो भने भगवदज्जुकम् नाटकको प्रदर्शन पनि गरिएको थियो । सोही बेलादेखि संस्कृत नाटक मञ्चनमा संस्था जोडिएको थियो । हालसम्म दर्जनौं नाटक मञ्चन भैसकेका छन् जसको विवरण माथि आइसकेको छ । संस्कृत नाटक लेखनको अभियान २०७४ सालबाट आरम्भ गरिएको भए पनि कोभिड -१९ का समयमा यसले गति लिएको थियो । यस नाटक लेखन अभियानलाई प्रकाशनसम्म ल्याउन संस्थालाई चार वर्ष काम गर्नुपऱ्यो । यस सङ्ग्रहमा १८ जनाका २८ वटा नाटक सङ्कलित, सम्पादित र प्रकाशित गरिएका छन् । संस्कृतनाट्यमहोत्सवको आयोजना गर्ने योजना पनि संस्थाले सोचेको छ ।

यस संङ्ग्रहको नाम 'संस्कृतनाटिकाकौस्तुभ' राखिएको छ । यसमा संकलित लघुनाटकहरू भास, कालिदास, हर्षवर्द्धन आदिका जस्ता त छैनन्, तर हामी जस्ता छौं, हाम्रो युग जस्तो छ त्यस्ताको चाहिँ प्रतिनिधित्व अवश्य छ होला भन्न सकिन्छ । संस्कृत नाटक लेखन र मञ्चनको अभियानलाई अगाडि बढाउन सबैको सहयोग र सद्भावको आवश्यकता छ ।

जयतु संस्कृतम्



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

# संस्कृतनाटिकाकौस्तुभः

(संस्कृतरूपकसङ्ग्रहः)

## विषयसूची


| | नाटकक्रमः | नाटककाराः | |
|---|---|---|---|
| क. | प्रकाशकीयम् | | ३ |
| ख. | नाट्याभियान र प्रस्तुत... | प्रा.डा. नवराज कट्टेल | ९ |
| १. | प्रा.डा. ऋषिरामपोखरेलः | स, त्वम् अहम्, | ३९ |
| | | गुरुकुलम् | ५१ |
| २. | कृष्णप्रसादभट्टराई | अङ्गुलिमालः | ६२ |
| ३. | डा. चन्द्रमणिनेपालः | विदेशयानम् | ६७ |
| ४. | डा. छत्रपतिदाहालः | दिनचर्या | ७८ |
| ५. | डिल्लीश्वरभट्टराई | परिस्थितिचित्रणम् | ९० |
| ६. | प्रा. तोयनाथपाण्डेयः | तमसो ज्योतिषि, (प्रदर्शित) | ९६ |
| | | मातृहत्याधारम् (प्रदर्शित) | ११४ |
| ७. | प्रा.डा. ध्रुवप्रसादभट्टराईः | निशापुरेशायनम् | १२२ |
| ८. | प्रा.डा. नवराजकट्टेलः | योजनगन्धा, प्रतिष्ठा | १३१ |
| ९. | नवराजपाण्डेयः | पश्चात्तापः | १४६ |
| १०. | पिप्पलमणिसिग्देलः | जीवनशोधनम् | १५३ |
| ११. | डा. बद्रीपोखेलः | प्रत्यागमनम् | १५८ |
| १२. | डा. भवानीशङ्करभट्टराई | रोगात् त्रासो भयावहः | १६६ |
| १३. | डा. महानन्दतिमल्सिना | जीवेत् सदा संस्कृतम् | १७३ |
| १४. | यदुपन्थी | प्रेमविवाहः | १८३ |
| १७. | प्रा.डा विष्णुप्रसादः देवकोटा | नेपालैकीकरणम् | १९६ |
| | | गोरक्षकृपादृष्टिः | २०४ |
| | | सुगताभयदानम् | २१३ |
| १५. | प्रा. रामहरिदाहालः | कर्मसिद्धिः, | २१९ |
| | | प्रत्यादेषणम्, | २२८ |
| | | शान्तिदूतः, | २३९ |
| | | शान्तिसंविदा | २४६ |
| १६. | रोहिणराजतिमल्सिना | नृसिंहप्रभवम् | २५५ |
| १८. | डा. हरिहरशर्माअर्यालः | निरक्षरता | २६२ |
| | | मुद्रामेधव्रतम् | २६६ |
| | | पश्चात्तापः | २७४ |




Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

# स.त्वम् अहम्

प्रा.डा. ऋषिरामपोखरेलः

**प्रस्तावना**

(नेपथ्ये सामूहिकं गीतमुच्यते श्रुतिमधुरं शनैर्गीतम्)

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः
सर्वे भद्राणि पश्यन्तु न कश्चित् दुःखभाग्भवेत् ॥

(ततः प्रविशति सूत्रधारः)

**सूत्रधारः-** (प्रविश्य, रङ्गभूमिं परिभ्रम्य किमपि स्मृत्वा, तर्जन्या निर्दिश्य सशिरःकम्पं वक्ति) भो भोः सज्जनाः ! शृण्वन्तु भवन्तः । अद्य अस्याः सभायाः अस्मिन् मञ्चे अस्मद्गुरुभिः लब्धविद्यावारिधिभिः प्राध्यापकैः ऋषिरामपोखेरल-महोदयैर्लिखितम् 'स त्वं अहम्' इतिनामकमेकं लघुनाटकमभिनेतुं वयम् इच्छामः । भवन्तः सावधाना भवन्तु । (अन्तः पुरं विलोक्य परिभ्रम्य) भो शिवनर्तकि ! मे प्रियकरि ! त्वं कुत्र असि वरवर्णिनि ! (नेपथ्यं दृष्ट्वा अङ्गुलीः मुखे संयोज्य) प्रिये ! शीघ्रमेहि ।

(ततः प्रविशति नटी मार्जनिकां पुष्पकलशं चादाय)

**नटी-** इयम् अहम् आगता । (कलश संस्थाप्य हस्तद्वयं प्रसार्य) किमर्थम् आहूयते, भगवन् ! सादरं प्रणमामि ।

(प्रणमति)

**सूत्रधारः-** अयि प्राणप्रिये ! अत्र आगच्छ (सहस्तग्राहं परिभ्रामयति) पश्य इमान् सभ्यान्, प्रणम एतान् ।

**नटी-** (सादरं परिक्रम्य नमस्करोति) कृतः शिष्टाचारः, अथ किम् ?

**सूत्रधारः-** मञ्जरिके ! किं न स्मरसि ? अत्र समुपस्थिताः सज्जना लघुनाटकमेकं द्रष्टुकामाः सन्ति अत्र भवतां सञ्जनानां विदुषां परितोषाय शीघ्रं सज्जा भव, स्ववेशं रङ्गं च सुसज्जितं कुरु ।

**नटी-** (नम्रीभूय, अञ्जलिं कृत्वा) यथा आज्ञापयति आर्य ! (इति परावृत्य) तर्हि भवानपि शीघ्रं सज्जीभवतु ।

**उभौ-** साधु साधु एवम् एवम् साधयावस्तावत् ।

(उभौ परिक्रम्य निर्गच्छतः, जवनिका पतति)

(नेपथ्ये, भोः भो छात्राः ! वटवः ! समागच्छत, प्रार्थनासमयो जातः ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(घण्टिकाध्वनिः श्रूयते)

**छात्राः** (नेपथ्ये)- एहि आगच्छ भो भो मित्र ! भो सुदीप ! भो सुधीर ! भो विजय ! (जवनिका ऊर्ध्वं नीयते)

## प्रथमदृश्यम्

स्थानम् विद्यालय प्राङ्गणम् । समयः प्रातः १० वादनम्

**गुरुः-** (प्रविश्य, परिभ्रम्य आगच्छतः छात्रान् विलोक्य) आगच्छत, आगच्छत, क्रमशः पंक्तिबद्धा भवत । सावधाना भवत, सतर्का भवत । प्रार्थनास्थितिं कुरुत ।

**छात्राः-** (एकैकशः प्रविश्य प्रणमन्ति) गुरुभ्यो नमः । मित्रेभ्यो नमः । सर्वेभ्यो नमः ।

**गुरुः-** साधु साधु आयुष्मन्तः सन्तु भवन्तः, जातः शिष्टाचारः । (छात्राः सशिरोनामम् अभिनन्दन्ति) आगताः सर्वे ? पाचकरक्षकौ नागतौ किम् ?

**पाचकरक्षकौ-** (सहसा पुरो गत्वा सप्रणामम्) आवां अत्र स्वः ।

**सुधीरः-** पश्यन्तु गुरवः ! सर्वे समुपस्थिताः । रक्षको द्वारसमीपे तिष्ठति । वयं सर्वे वटवः पङ्क्तौ स्मः ।

**गुरुः-** एवं चेत् सम्भूय प्रार्थनां कुर्मः । अहं प्रथमं वच्मि, तदनु यूयम् उच्चारयत ।

(गुरुः अर्धम् अर्धं श्लोकं कृत्वा वदति वटवस्तमनुवदन्ति) ।

श्रीगणेश नमस्तुभ्यं सरस्वति नमोऽस्तुते ।
इष्टदेव नमस्तेऽस्तु कुलदेवा नमोऽस्तु वः ॥१॥
राष्ट्रदेव नमस्तुभ्यं मातृभूमे नमोऽस्तु ते ।
स्वराष्ट्रस्य समुन्नत्यै शक्तिं देहि जगत्प्रभो ॥२॥
अहं स त्वं समाहृत्य सङ्घशक्तिसमन्विताः ।
समुन्नताः सुसम्पन्नाः सुखिनः स्याम सर्वदा ॥३॥
अवञ्चका अकुटिला मात्सर्यालस्यवर्जिताः ।
दिवास्वापाद् दुर्व्यसनाद् हीनाः सत्यपरिश्रमाः ॥४॥
सदा जागरुका नित्यं स्वाध्यायार्जितबुद्धयः ।
वयं राष्ट्रे जागृयाम विश्ववन्द्याश्च पूजिताः ॥५॥



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ॐ मातृभूम्यै नमः । ॐ राष्ट्रध्वजायै नमः ।
(सर्वे प्रणमन्ति वारद्वयम्)
सतर्का भवत । विश्रान्ता भवत । विसृष्टा भवत । एकैकशः पङ्क्तिबद्धाः सन्तो निर्गच्छत (सर्वे तथा कुर्वन्ति) ।

॥ प्रथमदृश्यं समाप्तम् ॥

## द्वितीयदृश्यम्

स्थानम्- कक्षाप्रकोष्ठः

**रक्षकः-** (प्रविश्य मार्जनिकया धूलिकादिकं मार्जयित्वा आसनानि पङ्क्तौ सम्यक् स्थापयति) अद्य कस्यचन ग्रामस्य कृषकस्य परिवार आगच्छतीति भणितम् आसीत् । सः अद्य आगच्छेत् न वा ? अहं बहिर्गत्वा प्रपश्यामि । (निष्कान्तः)

(सुदीपः प्रविश्य इतस्ततः अवलोक्य गुरोः आसनं निर्धूलयति, छात्राणाम् आसनानि च सम्मेलयति । तत एक गीत गायति ।)

**सुदीपः-** हे राम त्वं रमणीयोऽसि
सकलजनानां भजनीयोऽसि ।
तव इव मह्यं सिद्धिं देहि,
देशोन्नतिकां बुद्धिं देहि ।
(त्रिवारम् अभ्यस्य गायति)

**सुधीरः-** (प्रविश्य आकर्ण्य गीतम्) भो सुदीप ! एकाकी किं गायसि ? अथवा प्रलपसि प्रमत्त इव ?

**सुदीपः-** नहि नहि । नाहं प्रमत्तः प्रलपामि । अहं तु श्रीरामसुकीर्तिं गायामि ।

**विक्रमः-** (प्रविश्य) अहं तु अङ्गरक्षकः सुकीर्तिं नजानामि, सुकीर्तिः कीदृशी भवति ? कथ्यताम् ।

**विजयः-** (प्रविश्य दूरे स्थित्वा श्रुत्वा च) भो रक्षकाग्रज ! सुकीर्तिं न जानासि ? यः स्वकर्तव्यं सम्यक् पालयति, परोपकारं करोति, सुबुद्धिः विद्यावान् च भवति, स कीर्तिमान् भवति, तस्य नाम लोकाः कीर्तयन्ति । सा एव कीर्तनीया सुकीर्तिः कथ्यते ।

**सुधीरः-** भो रक्षकाग्रज ! भवान् अपि स्वकार्यं सम्यक् कृत्वा, आज्ञाकारी भूत्वा, स्मरणीयः सुकीर्तिमान् च भवितुं शक्नोति ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**सुदीपः-** किं भवान् न जानाति माता सन्ततिं गर्भे धत्ते, जाते स्तन्यं पाययति, भोजयति, गमयति, वस्त्रं धापयति सर्वं गृहकार्यं करोति । अत एव मातुः गुणान् सर्वे कीर्तयन्ति, 'जननी जन्मभूमिश्च स्वर्गादपि गरीयसी' इति च कथयन्ति ।

**विक्रमः-** अहो ! आम् आम् ! मम माता अपि तत् सर्वं करोति । मम माता एव मम जीवनदात्री गृहस्वामिनी च । अहं तु मातृगुणानेव गायामि 'पितुर्माता गरीयसी' इति गुरुणा उक्तं च स्मरामि नित्यम् ।

**गुरुः-** (रक्षकस्य छात्राणा चं सवादं श्रुत्वा) अहो भवन्तः अपि मातृभक्ता जाता इति अत्यन्तं प्रसन्नः अस्मि । माता इव मातृभूमिः अपि पूज्या वर्तते । सुदीपेन साधु गीतं रामचरितम् । श्रीरामः पितुः मातुः भ्रातुः जनतायाश्च अतीव भक्त आसीत् । तेन हिंस्रकानां लुण्ठकानां च रावणादिदुष्टानां विनाशः कृतः । रामराज्यम् अद्यापि लोके सर्वे जनाः कामयन्ते । आज्ञाकारिता, अनुजेषु सौहार्दं, बन्धुबान्धवेषु प्रेम, शबरीहस्ताद् जुष्टस्यापि बदरिफलस्य भक्षणम्, जनतानां प्रसन्नतार्थं स्वपत्नीसुखत्यागः, गुणग्राहिता, वानरैः सह प्रेमसद्भावः, न्यायव्यवस्था च रामस्य अद्यापि अनुकरणीयानि चरितानि सन्ति (मौनम्) ।

**वटुः-** ततः किम् ?

**गुरुः-** विश्वे सर्वे रामायणं पठन्ति । मरणकाले च रामनाम जपन्ति । स्वर्णमयीं लङ्कां विहाय रामः स्वस्य देशे मातृभूम्यां प्रत्यागतः । तेन 'जननी जन्मभूमिश्च स्वर्गादपि गरीयसी' इति गीतम् । अद्यापि वयं लोष्टपत्रे तां वाणीं सूक्तरूपेण लिखामः । देशभक्तिगीतं रामस्य एव प्रेरणायाः फलं मन्यते । 'सत्यवादी रामः, प्रतिज्ञापालको रामः, प्रजारञ्जको रामः' इति सर्वे रामस्य कीर्तिं गायन्ति ।

**वटवः-** (सर्वे मिलित्वा) गुरो ! वयम् अपि रामचरितं पठित्वा राम इव सुकीर्तिम् आर्जयितुं प्रयत्नं कुर्मः । मातृभूमिम् उन्नमयामः ।

**गुरुः-** साधु । समीचीनम् उक्तम् भवद्भिः । अद्य कक्षाध्ययनवेला जाता । श्वः पुनः रामायणं पठितास्मः । अस्तु कक्षायां गच्छामः ।

(सर्वे निष्क्रमन्ति)

(एतन्मध्ये वटवः स्थानीयदेवतानां सामूहिकारार्तिक्यं प्रार्थना च कुर्वन्ति ।) (ततो जवनिका अवपतति)



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

## तृतीय दृश्यम्

स्थानम्- उत्तरगया-उत्तरवाहिनीतीर्थम्, वागमतीतीरम्

(तत्र एका सभा आयोजिता वर्तते । तस्य दृश्यम् अवलोक्यते)

(गुरुः प्रविशति, सर्वे सभ्या उत्तिष्ठन्ति)

**गुरुः-** नमः सभाभ्यः । सर्वे स्वासने वसन्तु । भो सुदीप ! भो सुधीर ! भो विजय ! भो विक्रम ! भो सर्वे सभासदः ! इदम् अतिपवित्रम् पितृतीर्थम् । अत्र एव कान्तिपुरनगररक्षकः कान्तिभैरवः अस्ति । इदम् उत्तरवाहिनीतीर्थम्, उत्तरगयातीर्थम्, वाग्मतीतीर्थं चास्ति । अत्रैव अनेके साधकाः तपस्यां कृत्वा सिद्धाः जाताः ।

**सुधीरः-** अत्र केन केन तपस्या कृता ? कस्मिन् आश्रमे गुहायां वा साधना कृता ? तत्सर्वं वयं श्रोतुम् इच्छामः कथयतु भवान् ।

**गुरुः-** साधु उक्तम् 'तपस्विनां सिद्धानां नामग्रहणेन तेषां स्मरणेन च पापं नश्यति, सद्बुद्धिश्च स्फुरति' इति अनुभवः अस्ति । अत्र द्वौ आश्रमौ स्तः । प्रथमः प्रेमनारायणनिरौलागुरो साधनागुहारूपः । सा गुहा लघीयसी अस्ति । अपरश्च आबालब्रह्मचारिणः षडानन्दाधिकारिणः साधनागुहारूपः । एषा अन्तर्गर्भगुहा । अत्रैव अन्ये बहवः सिद्धा अपि तपः अकुर्वन् । यथा चोक्तम् उत्तरगया-उत्तरवाहिनीपरिचयपुस्तके-

एषु उत्तरवाहिन्या वाग्वत्याः पावनः तटः
अत्रैव तपसा सिद्धा विश्ववन्द्यास्तपस्विनः ॥
श्रीवासुकि-ब्रह्मचारि-षडानन्द-गलेश्वराः ।
माता श्रीयोगमाया च साधुः शिवपुरिस्तथा ॥
महात्मा श्रीकुबेरश्च प्रेमनारायणस्तथा ।
साधुः श्रीतुलसीदासो महानन्दश्च तापसः ॥
सिद्धतीर्थमिदं तेषां साधकानामिति श्रुतम् ।
धन्यमेतत् सिद्धतीर्थं धन्या चोत्तरवाहिनी ॥
धन्या चैषोत्तरगया पितृमोक्षप्रदायिनी ।
पौषामायां पिण्डदानमत्र तस्माद् विधीयते ॥

**सुदीपः-** अथ किं गुरो ?

**गुरुः-** अथ चोत्तरवाहिन्या वाग्वत्याः पावन. तट ।
अस्त्युत्तर-गयातीर्थशिरोरूपः सुपावनः ॥



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अस्ति चात्रैव हनुमान् पञ्चास्यो रामसेवकः ।
अनेके देवदेव्यश्च तथा जागेश्वरः शिवः ।

**विजयः-** गुरो ! अत्रत्यः कन्तिभैरव : कान्तीश्वरः कस्मिन् काले केन स्थापितः स्यात् ।

**गुरुः-** अत्र श्रीकान्तिभैरवमन्दिरं लिच्छविशासनकाले विक्रमाब्दस्य षष्ठशताब्दीकाले मानदेवेन निर्मितं श्रूयते शिलालेखश्चोरितः । सृष्टिकाले ब्रह्मणा कान्तीश्वरः स्थापित आसीदिति स्कन्दपुराणे हिमवत्खण्डे लभ्यते । इतः २०० वर्षेभ्यः पूर्वं साधनास्थलस्य प्राङ्गणद्वारे पञ्चमुखी हनुमान् प्रतिष्ठापित इति तत्रैव शिलालेखे दृश्यते । अन्यानि मन्दिराणि विभिन्नकाले विभिन्नैर्भक्तैर्निर्मितानि सन्ति ।

**सुधीरः-** किमत्र सर्वकारस्य दृष्टिर्न गता ?

**गुरुः-** अद्यत्वे या लघ्वी प्राचीना सिद्धगुहा वर्तते, तस्या जीर्णोद्धारकार्यं सर्वकारेण दशलक्षरुप्यकैर्विधीयमानम् अस्ति । कान्तिपुरनगररक्षकस्य कान्तिभैरवस्य मन्दिरस्यापि आस्मिन्नेव वर्षे सर्वकारेण षोडशलक्षरुप्यकै जीणोद्धारः क्रियमाणो वर्तते । गुरुवरस्य वैद्यनाथक्षेत्रपत्रिकायाम् उत्तरवाहिनीक्षेत्रविषयकालेखप्रकाशनादूर्ध्वम् एतौ प्रयासौ सर्वकारः कुर्वन्नस्ति ।

**उत्तमः-** क्षम्यतां गुरो ! अहं ग्राम्यः कृषकः । पत्नी पुत्रौ च गृहीत्वा अद्य आश्रमं पुण्यं सिद्धक्षेत्रं च द्रष्टुम् आगतः अस्मि । अत्र कान्तिभैरवगुरुकुलविद्यालयः अस्ति इति श्रुत्वा आगतः अस्मि । कृपया 'गुरुकुलविद्यालयविषये किमपि तथ्यं प्रकाशयन्तु भवन्तः' इति मम अनुरोधः अस्ति ।

**गुरुः-** साधु साधु । अहम् अस्यैव विद्यालयस्य एको गुरुः अस्मि । समीचीना जिज्ञासा वर्तते भवतः । श्रूयताम् । अत्रैका कान्तिभैरवउत्तरगयाक्षेत्रव्यवस्थापनसमितिः अस्ति । तस्या निर्णयेनैव श्रीकान्तिभैरवगुरुकुलविद्यालयः अत्र सञ्चलति । अत्र सर्वकारस्य जनपदशिक्षाकार्यालयेन स्वीकृतः पाठ्यक्रमः पाठ्यते । अत्र वैदिक धर्मकर्मरक्षार्थं कर्मकाण्डपद्धतिः अपि पाठ्यते ।

**वटुः-** गुरवः ! आधुनिका विषया नैव पाठ्यन्ते ?

**गुरुः-** कम्युटरशिक्षा, आङ्गलभाषा, गणितशिक्षा चात्र पाठ्यते । धर्मरक्षा, कर्तव्यरक्षा, अनुशासनपालनं, स्वदेशप्रेम, राष्ट्रभक्तिश्च



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संस्कृतमाध्यमेनात्र शिक्ष्यते । अयं विद्यालयो जनसहयोगेन निःशुल्कं चलति । अत्र भोजनावासवस्त्रदानपूर्वकं शिक्षा दीयते । चतुर्थकक्षातो द्वादशकक्षापर्यन्तं पाठनस्य लक्ष्यमनुसृत्य अधुना अष्टमकक्षां यावत् कक्षाः प्रचलन्ति । अत्र पञ्चत्रिंशच्छात्रवटुकाः, सप्त शिक्षकाः, द्वौ कर्मचारिणौ च कार्यं कुर्वन्ति । स्वधर्मकर्मनिपुणा आधुनिकशिक्षासहिता माध्यमिकस्तरीया जनशक्तिरत्र उत्पाद्यते ।

**सरस्वती-** (सादरम् अग्रे उपसृत्य सप्रणामम्) श्रद्धेय गुरुवर ! अस्माकम् एकः पुत्रः अस्ति, तस्य अत्रैव विद्यालये प्रवेशो भवेत् चेत् महान् उपकारः स्यात् ।

**गुरुः-** अस्य नवसत्रं वैशाखात् चलति । प्रवेशपरीक्षा चैत्रान्ते भवति । चतुर्थकक्षायै एव प्रवेशपरीक्षा भवति । उपनीता विप्रार्भका आद्वादशवर्षावधिका एव प्रवेशपरीक्षार्हा भवन्ति । समुत्तीर्णप्रवेशपरीक्षः सुयोग्य एव छात्रः अत्र निःशुल्कं स्थातुं भोक्तुं पठितुं च प्राप्नोति । पुनर्वार्षिकपरीक्षाया अनुत्तीर्णो भवति चेत् छात्रः आश्रमान्निर्गच्छति ।

**उत्तमः-** अत्र के के नियमाः सन्ति दैनिकाः ? किं ज्ञातुं शक्यते गुरो ?

**गुरुः-** अवश्यमेव शक्यते श्रूयताम् । अत्र प्रत्यहं प्रातः सार्धचतुर्वादने उत्थाय स्नानं सन्ध्या पूजा प्रार्थना च कार्यन्ते । ततो दुग्धं पाययित्वा षड्वादनतः सार्धनववादनवेलापर्यन्त गणितम्, सङ्गीतम्, सामाजिकशास्त्रं च पाठ्यन्ते । ततो भोजनं कृत्वा एकादशवादने पुनः संस्कृतम्, कर्मकाण्डम् वेदः, दुर्गासप्तशती, रुद्राध्यायः, नेपालीभाषा च पाठ्यन्ते पादोनैकवादने मध्याह्नस्य लघ्वाहारश्चायपानं च दीयते ।

**वटुः-** क्रीडनादिकं गुरुकुले नैव प्रचलति ?

**गुरुः-** ततः सार्धद्विवादनतः एकघण्टापर्यन्तं पादकन्दुक-क्रिकेटालिखेलनं भवति । अनन्तरं सायं षड्वादनवेलापर्यन्तं पाठः, पाठाभ्यासः, लेखाभ्यासः, प्रश्नोत्तरसंवादः, भागवतार्थशिक्षा, कम्युटरशिक्षा, आङ्गलभाषाशिक्षा च यथावसरं प्रचलति । ततः सन्ध्यावन्दनम्, भगवत आरार्तिक्यम्, प्रार्थनां च कृत्वा सप्तवादनवेलायां सायङ्कालिकभोजनं भवति । अष्टवादनतः सार्धनववादनपर्यन्तं पाठाभ्यासो लेखनाभ्यासश्च चलति ततो भगवत्प्रार्थनापूर्वकं पादोनदशवादने वटवः शय्यां सेवन्ते ।

**उत्तमः-** अतिसुन्दरम् । सर्वं नियमितं वर्तते । आगामिनि वर्षे तु अस्माकं पुत्रः



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सुशीलः अपि अत्र प्रवेशपरीक्षायां सम्मिलितो भविष्यति । अथापि विद्यालयस्य विशिष्टलक्ष्यं श्रोत्रुम् इच्छा जागर्ति । किं शक्यते ज्ञातुम् ?

**गुरुः-** अवश्यम् अवश्यम् । अस्माकं देशे आधुनिकशिक्षां प्राप्ताः प्रायेण धर्मबुद्धिहीनाः, अनुशासनहीनाः, उच्छृङ्खलाश्च दृश्यन्ते । परं वयं तावद् आत्मवृत्तिसमर्थां स्वावलम्बिनीं मर्यादिताम् अनुशासितां मातृपितृमातृभूमिधर्मसंस्कृतिभक्तियुतां सुशिक्षितां जनशक्तिम् उत्पादयितुं प्रयत्नशीलाः स्मः । एतदेवास्माकं लक्ष्यम् । अस्माभिः उत्पादिता जनशक्तिः समन्वयात्मिका, समाजस्य नेतृत्वग्रहणसमर्था च भविष्यतीति वयं विश्वसिमः ।

**सुशीलः-** (पितरं मातरं च अवलोक्य) गुरो ! अहम् अपि अत्रैव प्रवेशम् इच्छामि । मम पितरौ आगामिनि वर्षे अत्रैव मां आनेष्यतः, प्रवेशपरिक्षायां निश्चयमेव अहं सफलो भविष्यामीति मे सुदृढो विश्वासः अस्ति ।

**उत्तमः-** गुरो ! एतदर्थम् अस्माभिः किं कर्तव्यं स्यात् ?

**गुरुः-** राष्ट्रोन्नतिं कर्तुं सर्वैरेव मिलित्वा स्वस्वक्षेत्रे च सम्यक् स्वकर्तव्यं पालनीयं भवति । स यथेच्छं करोतु । त्वं स्वेच्छानुसारं चल । अहं च ममेच्छानुसारं चलामि इति भावना राष्ट्रे समाजे वा विभाजनं खण्डनं विवादं च उद्भावयति । अतो वैयक्तिकजीवने भोजनावासवस्त्रपरिधानादिषु सर्वे स्वतन्त्राः सन्ति किन्तु स्वदेशस्य समुन्नतिं कर्तुं सर्वैः सम्भूय सामूहिकबलेन प्रयासः कर्तव्यः । यथा तृणानि सह तानि दृढरज्जुरूपाणि भूत्वा प्रमत्तं हस्तिनमपि वशं कर्तुं शक्यते तथा सवर्जनैर्मिलित्वा प्रयत्ने कृते असाध्यं किमपि नास्ति । उक्तञ्च-

स त्वं बलमिति प्रोक्तम् अहं तस्य प्रयोजकः ।
स त्वम् अहं विवादस्य परित्यागो विधीयताम् ॥
स त्वं अहं मिलित्वैव राष्ट्रे सम्पद्यते बलम् ।
संविधान लिखित्वा च राष्ट्रमुच्चै प्रणीयते ।

(शनैः शनै जवनिका निपतति, नेपथ्ये च श्रूयते वेदवध्वनिः ।)

सङ्गच्छध्वं संवदध्वं सं वो मनांसि जानताम् ।
देवाः सर्वे यथापूर्वं सञ्जानाना उपासते ॥
सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत् ॥

इति तृतीयम् दृश्यम्



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

## चतुर्थं दृश्यम्

स्थानम्- गुरुकुलम्

(नेपथ्ये घण्टानादः श्रूयते)

**घण्टावादकः** (नेपथ्ये एव)- भो भो वटवः ! भो गुरवः ! भो भो ग्राम्यजनाः ! आगच्छन्तु भवन्तः । अद्य अस्माकं विद्यालये स्वपरिचयस्य आत्मनः अस्तित्वस्य च रक्षा कथं कार्या ? किं च तन्महत्वम् ? इति विषये अत्याकर्षक प्रवचनं भविष्यति । भवन्तः सर्वे सत्वरं चत्वरे समुपस्थिता भवन्तु ।

(जवनिका अनावृता भवति)

(चत्वरस्य एकदेशे कुर्चे उच्चासनं वर्तते । अग्रे अनेकानि आसनानि आस्तीर्णानि सन्ति । ध्वनियन्त्रम् अपि मञ्चाग्रे लम्बमानम् अस्ति । क्रमशः प्रविशन्ति सभ्या दर्शकाश्च । सर्वे स्वेषु स्वेषु आसनेषु समुपविशन्ति । ततः प्रविशति आचार्यः । सर्वे उत्थाय अभिवादयन्ति ।)

**आचार्यः-** अहो ! समुपस्थिताः सभ्याः ? सर्वान् सभ्यान् वन्दे । मया विलम्बितमिति क्षम्यताम् ।

**एको वृद्ध-** अहो आचार्यवर ! नमस्करोमि । न भवता विलम्बः कृतः । अपि तु वयमेव अत्र विलम्बिताः । अद्य किमर्थं वयम् आहूताः । अद्य किं श्रोतव्यम् अस्माभिः । आचार्यवर्य ! उपदिशतु तावत् ।

**आचार्यः-** ॐ३ आत्मा खलु विश्वमूलम् । मान्याः सभ्याः, सभासदः, प्रथमं वन्दे सर्वान् (करसम्पुटं कृत्वा प्रणमति) । य आत्मानं न जानाति स समाजे प्रमत्त उन्मत्तो वा मन्यते । परदेशे वा स्वदेशे वा स्वग्रामे वा स्वगृहे वा भवतु यः स्वस्य नाम न जानाति, स्वगृहपरिवारं वा न जानाति । स्वराष्ट्रं स्वदेशं जन्मभूमिं मातरं पितरं वा नजानाति तं सर्वे मत्तं प्रमत्तम् उन्मत्तं वा कथयन्ति । सुधीर ! त्वं कथय, आत्मपरिचयः कथं दीयते ?

**सुधीरः-** आचार्यवर ! आत्मनः परिचयः सर्वैः ज्ञातव्य एव भवति । परिचयश्च नाम्ना, उपनाम्ना स्वदेशस्य जाति-भाषा-भोजन-वेषादेरुल्लेखनेन कथनेन वा दीयते ।

**सुदीपः-** अत एव परिचये स्वस्य कुलम्, स्वस्य जातिः, स्वस्य भाषा, स्वस्य देशः, स्वस्य भोजनविशेषः, जन्मकर्मादिकश्च वक्तव्यो भवति ।

**सरस्वती-** आचार्य ! एतत् तु वटुकेन अपि सत्यम् उक्तम् । तीर्थयात्राकाले अहमेका



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अकस्माद् मार्गाद् भ्रष्टा । मया मार्गो न दृष्टः । स्थानं न ज्ञातम् । मम अभिभावकः कोऽपि तत्र नासीत् । ततोऽहं राजमार्गस्य एकस्मिन् कोणे स्थित्वा उच्चैः सदित्वा क्रन्दमाना स्थिता । तदा कश्चित् दयालुः प्रौढ आगत्य मां समबोधयत् । भद्रे ! त्वं कुत आगता ? क्व गच्छसि ? तव नाम किम् ? देशः कः ? का ते भाषा ? किमर्थं रोदिषि । इति बहून् प्रश्नान् पृच्छति स्म । ततो मया स्वनाम-देश-भाषादिकम् उक्तम् । ततो मम भाषया दूरभाषध्वनिद्वारा मम मित्राणि आकार्य माम् तैः सह समयोजयत् । इयं सत्या मे घटना ।

**उत्तमः-** एवम् एवम् । इयं तदा रुदन्ती माम् आह 'स्वदेशे देशान्तरे वा भ्रमणकाले स्वपरिचयपत्रं सहैव नेतव्यम् अद्यैव एकं परिचयपत्रमारच्य दीयताम् मह्यम् अपि' इति ।

**सुदीपः-** सत्यमुक्तं भवता विद्यालये । कार्यालये यात्रायां वा सर्वत्र परिचयपत्रमावश्यकं भवतीति विद्यार्थिपरिचयपत्रम्, कर्मचारिपरिचयपत्रम्, समितिसङ्घसदस्यपरिचयपत्रं वा प्रदीयते । नागरिकप्रमाणपत्रं च एतदर्थम् एवं सर्वेभ्यो नागरिकेभ्यो दीयते अद्यत्वे तु भूकम्पपिडितपरिचयपत्रं च प्रदीयते ।

**आचार्यः-** अलम् अलम् भवद्भिः साधु कथितम् स्व स्व परिचयः सर्वत्र आवश्यकः भवत्येव । एवमेव स्वकुल स्य स्वमातुः पितुः, स्वदेशस्य, स्वभाषाया, स्वधर्मस्य, आचार-व्यवहारस्य च ज्ञानं परमावश्यकं सर्वेषां मानवानां कृते भवति । यदा व्यक्तिः एतत् सर्वं न जानाति तदा स स्वदेशे एव दासो भवति ।

**गुरुः-** भारतदेशे आङ्गलानां शासनकाले एको गान्धी एव संस्कृतभाषां ज्ञात्वा प्रथमं गीतां परिज्ञाय स्वजातिदेशकुलधर्माणां महत्वं विवेद । तदनन्तरं आङ्गलान् प्रति सः 'इदं राष्ट्रम् अस्माकं यूयम् अभारतीयाः । अत्र अस्माकं भारते भारतीया एव शासका भवितुं शक्नुवन्ति । भवन्त आङ्गलाः, स्वदेशे गच्छन्तु वयं स्वदेशे भवतां दास्यं न कुर्मः' इत्यवोचत् । महात्मनो गान्धिना आरब्ध एष सत्याग्रह एव भारताद् आङ्गलान् निष्कासयितुं समर्थः अभूत् । येन भारदेशः स्वतन्त्रो जातः । तेन भारते महात्मा गान्धी राष्ट्रपिता कथ्यते ।

**सभ्यानां मध्ये एकः-** अथ किम् आचार्य ! अग्रे वदतु श्रोतुकामा वयम् ।

**आचार्यः-** रामायणकाले हनुमान् वानरमुख्यो बलवान् चिरञ्जीवी च आसीत्



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

किन्तु तेन कारणवशात् स्वपरिचय विस्मृत आसीत्। वृद्धो जाम्बवान् भल्लुको हनुमतो जन्मकर्मवृत्तान्तं जानाति स्म। समुद्रलङ्घनवेलायां सर्वैः वानरैः स्वशक्तिः प्रदर्शिता, किन्तु हनुमान् तूष्णीं स्थितः। स आह- 'नाहं जानामि मम बलं कति वर्तते ?' इति। ततो जाम्बवान् आह- 'हे हनुमन् ! त्वं वायुपुत्रः असि। तव बलम् अमितं वर्तते। त्वं विश्वं लङ्घयितुं शक्नोषि। चतुःशतकोशसिन्धुलङ्घनं तु सामान्यमेव तव कृते' इति। तच्छ्रुत्वा हनुमान् समुद्रलङ्घनपूर्वकं सीताया लङ्कावासवृत्तान्तं परिज्ञाय अशोकवाटिकायां सीतादर्शनं, रावणसेनापतिवधं, लङ्कादाहं च कृत्वा प्रत्यागत्य सर्वं समाचारं श्रीरामं न्यवेदयत्।

**उत्तमः-** आचार्यवर ! एतेन अस्मद्देशे कः सङ्केतः परिज्ञायते ?

**आचार्यः-** समीचीनं साधु पृष्टम्। श्रूयताम् अस्माकं देशे अधुना आङ्गलभाषायाः प्रभावेण राज्यं चलति। लेखे, पाठे, राजनीतौ, विद्यालये, सर्वकारकार्यालयेषु च प्रायेण आङ्गलभाषाया एवं साम्राज्यं चलतिः। नेपालदेशस्योत्पत्तिः, नेपालस्य सभ्यता, संस्कृतिः, नैपालकानां धर्माः संस्काराः, प्राचीन इतिहासः, सदाचारः, भाषासम्पत्तिः इत्यादयः अनेके विषया संस्कृतभाषायाम् एव मूलरूपेण वर्णिताः सन्ति।

**वटुः-** तर्हि संस्कृतस्य अवनतिः कथम् ?

**आचार्यः-** किन्तु सर्वकारः संस्कृतं पाठयितुं नेच्छति। वैदेशिकानां धनं यथा मिलति तथा कृत्वा नेपालात् संस्कृतशिक्षा अनिवार्यविषयाद् अपसार्य ऐच्छिकी कृता। संस्कृतं पठित्वा सर्वकारस्य संस्थानस्य वा सेवाप्रवेशावसरः सहजतया न लभ्यते। प्रोत्साहनं च न लभ्यते। सर्वत्र आङ्गलभाषायै स्थानं दीयते। तेन संस्कृतं हीयते। संस्कृतं पठितुं जना नेच्छन्ति। अत एव धर्मस्य रहस्यं संस्कृते यद् वर्तते तत् ते न जानन्ति। संस्कृतज्ञानं विना नेपालपरिचयो न ज्ञायते। इतिहास-सदाचारानुशासन-धर्म- संस्कृतिज्ञानं च संस्कृतज्ञानं विना सम्यग् न भवति।

**वटुः-** राष्ट्रे संस्कृतशिक्षाया विकासः कथं न ? राष्ट्रस्य विकासः कथं न ?

**गुरुः-** अद्यत्वे सर्वत्र भ्रष्टाचारश्चलति। कालक्रमेण नेपाले आङ्गलानां विधर्मिणा एवाधिकता भविष्यति। तेन नेपालदेशस्य अस्तित्वम्, अस्मिता, प्राचीन इतिहासः, वैदिकी सभ्यता संस्कृतिश्च नाशं प्राप्नोति। यथा आत्मपरिचयात् पूर्वं हनुमान् सुग्रीवस्य किङ्कर आसीत्। दास इव


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सेवां च करोति स्म । तथैव भारतवर्षे आङ्गलसाम्राज्ये भारतीयैः अपि दासता अनुभूता परं महात्मना गान्धिना गीता पठित्वा सत्याग्रहं कृत्वा स्वतन्त्रता पुनः प्राप्ता आसीत् ।

**वटुः-** विधर्मस्य प्रभावः कीदृशः ?

**गुरुः-** परम् अद्यत्वे भाषिक उपनिवेशः क्रमेण सांस्कृतिके धार्मिके च उपनिवेशे परिणतः । क्रमेण राजनैतिकमपि स्थानं जित्वा अत्र स्वकीयं साम्राज्यं मा कुर्यात् इत्यर्थं वयं यथाकथञ्चिद् भिक्षां कृत्वा जनसहयोगेन वैदिकगुरुकुलशिक्षायाः प्रचारे प्रसारे च प्रयत्नशीलाः स्मः । अथ च स्वपरिचयज्ञानायापि सर्वैः संस्कृतम् अवश्यं पठनीयम् । स्वसन्ततिभ्यश्च स्वस्वाभिमानरक्षार्थं धर्मसंस्कृतिपरिचयज्ञानार्थं च संस्कृतभाषायाः शिक्षणम् अवश्यं कर्तव्यम् इति निवेदयामः । शिवमस्तु सर्वेषाम् ।

(जवनिका पतति ।)

(नेपथ्ये श्रूयते) मानो धर्मो हतोऽवधीत् । धर्मो रक्षति रक्षितः । स्वधर्मे निधनं श्रेयः परधर्मो भयावहः । उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत । सहनाववतु सह नौ भुनक्तु सह वीर्यं करवावहै ।

इति चतुर्थं दृश्यम्

**भरतवाक्यम्**

स्व-स्व-धर्मस्याचरणे स्वतन्त्राः सन्ति मानवाः ।
सर्वे राष्ट्रोन्नतिं कर्तुं सम्भूयेच्छन्ति सर्वदा ॥१॥
सर्वे धर्मा जातिभाषा आसृष्टेर्मिलिता इह ।
परस्पराक्षेपहिंसा कदाचिन्नात्र विश्रुता ॥२॥
सर्वे धर्ममनुष्याणां हितमिच्छन्ति सर्वदा ।
परस्परं को विवादो धर्मो रक्षति रक्षितः ॥३॥
सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु मा कश्चित् दुःखभाग्भवेत् ॥४॥
अहं, स, त्वं च सम्भूय समाजो घटते सदा ।
तस्मात् सर्वैर्मिलित्वैव देश उन्नीयतां द्रुतम् ॥५॥
अहं स त्वं न वक्तव्यं सर्वैर्वयं हि भण्यताम् ।
वयं सर्वे वयं सर्वे न त्वं नाहं न वा हि सः ॥६॥


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

# गुरुकुलम्

## (लघुनाटकम्)

प्रा.डा. ऋषिरामपोखरेलः

प्रस्तावनारूपं प्रथमदृश्यम्

(नेपथ्ये नान्दीपाठः श्रूयते)

एष उत्तरवाहिन्या वाग्मत्याः पावनस्तटः ।
अत्रोत्तरगयातीर्थे तापसा बहवोऽभवन् ॥१॥

षडानन्द-प्रेमनाथ-वासुकिप्रमुखाः किल ।
श्रूयन्तेऽत्र तपःसिद्धा साधवो लोकविश्रुताः ॥२॥

अत्र कान्तिपुरस्यास्ति रक्षकः कान्तिभैरवः ।
अत्रैवास्ति गुरुकुलं कान्तिभैरवसंज्ञकम् ॥३॥

श्रेयस्तनोति हनुमान् पञ्चास्यः शिवदः सदा ।
वेदं पठन्ति वटवो ब्रह्मचर्याश्रमे स्थिताः ॥४॥

(जवनिका अपसरति)

(ततः सूत्रधारः प्रविशति नाट्येन परिभ्रमन्)

**सूत्रधारः-** (इतस्ततः परिभ्रम्य, विलोक्य च) अयि प्रिये नटि ! कुत्र गतासि ? शीघ्रम् अत्र आयाहि ! विलम्बं मा कुरु ।

**नटी-** (प्रविश्य, रङ्गं परिभ्रम्य, परितो विलोक्य) अहो स्वामिन् ! अहम् इयम् अत्रागतास्मि । (सशिरःकम्पम्) किं क्षणमपि मां विना स्थातुं न शक्नोति भवान् ?

**सूत्रधारः-** (परिभ्रम्य, नटीं विलोकयन् तस्य कपोले परिमृश्य, सस्मितम्) प्रिये ! त्वया विना अहं चलितुं न शक्नोमि । त्वं मम प्राणप्रियासि ।

**नटी-** अथ किम् ? अहं त्वाम् आश्लिष्यामि । (सूत्रधारमालिङ्गति)

**सूत्रधारः-** (विलज्जमानः अपसरति) नहि नहि अत्र सभारङ्गे मा आलिङ्ग माम् । लज्जाम् अनुभवामि अहम् ।

**नटी-** तर्हि किमर्थम् आहूता अहम् ? आज्ञापयतु माम् । (सगर्वं साभिनयं रङ्गं द्विः परिभ्रमति ।)

**सूत्रधारः-** (परिभ्रम्य) प्रिये अद्य अस्माभिः अस्यां परिषदि एकं लघुनाटकम् अभिनेतव्यम् । तदर्थं त्वम् आकारिता असि ।

**नटी-** अहो भाग्यं खलु अस्माकं मन्ये (अभिनयति) । अथ किमर्थं विलम्ब्यते ?



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आज्ञापयतु भवान् । अस्माभिः किं नाटकं प्रदर्शनीयम् अस्ति ?

**सूत्रधारः-** 'गुरुकुलम्' इति नामकं लघुनाटकम् अभिनेतव्यम् ।

**नटी-** केन रचितं तत् ?

**सूत्रधारः-** (साभिनयम्) प्राध्यापकवरेण ऋषिरामपोखरेलमहोदयेन विरचितम् ।

**नटी-** स्वामिन् ! तर्हि त्वर्यताम् । को विलिम्बः ? (सभ्यान् हस्तेन दर्शयन्ती परिभ्रम्य) अत्र सभ्या दर्शकवर्याः समुपस्थिताः सन्ति ।

**सूत्रधारः-** (सर्वत्र विलोक्य) एवम् एवम् त्वर्यताम् । साधयामस्तावत् । (उभौ निर्गच्छतः) (जवनिका पतति)

॥ इति प्रस्तावना ॥

## द्वितीयं दृश्यम्

(जवनिका परापतति)

(परितः पङ्क्तिबद्धाः शय्याः । तेषु छात्राः प्रबुद्धा दृश्यन्ते । अन्यस्यां खट्वायां गुरुश्च शयनात् प्रबुद्ध ओङ्कारं सुदीर्घमुच्चारयति । छात्राश्च उषित्वा जृम्भमाणाः चक्षूंषि परामृशन्तश्च सुदीर्घतमम् ॐकारं समुच्चारयन्ति ।)

**गुरुः-** भो भो वटवः ! स्वस्य शय्यायामेव पण्डितासनं कुरुत, मन्त्रोच्चारणेन अजपागायत्रीजपं च समर्पयत । (वटवः तथा कुर्वन्ति ।)

**गुरुः-** मूलाधारचक्रे उपस्थे श्रीगणपतिं पूजयामि । शतमपट्कम् अजपाजपं समर्पयामि । ॐ श्रीगणपतये नमः । (वटवस्तथा वदन्ति ।)

**गुरुः-** नाभौ स्वाधिष्ठानचक्रे ब्रह्माणं पूजयामि । सहस्रषट्कम् अजपाजपं समर्पयामि । ॐ ब्रह्मणे नमः । (वटवस्तथा उच्चारयन्ति ।)

**गुरुः-** हृदि मणिपूरचक्रे विष्णुं पूजयामि । सहस्रषट्कम् अजपाजपं समर्पयामि । ॐ विष्णवे नमः । (वटवस्तथा उच्चारयन्ति ।)

**गुरुः-** कण्ठे अनाहतचक्रे श्रीरुद्रं पूजयामि । सहस्रषट्कम् अजपाजपं समर्पयामि । ॐ श्रीरुद्राय नमः । (वटवः तथा उच्चारयन्ति ।)

**गुरुः-** मुखे विशुद्धचक्रे गुरुं पूजयामि । सहस्रम् अजपाजपं समर्पयामि । ॐ श्रीगुरवे नमः । (वटवः तथा उच्चारयन्ति ।)

**गुरुः-** भ्रुवोर्मध्ये आज्ञाचक्रे श्रीजीवात्मानं पूजयामि । सहस्रम् अजपागायत्रीजपं समर्पयामि । ॐ जीवात्मने नमः । (वटवस्तथैव उच्चारयन्ति ।)

**गुरुः-** तालुनि सहस्रारचक्रे श्रीपरमात्मानं पूजयामि । सहस्रम् अजपागायत्रीजपं समर्पयामि । ॐ श्रीपरमात्मने नमः । (वटवः तथैव उच्चारयन्ति ।)



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**गुरुः-** सर्वे स्वकरतलौ उत्तानौ कृत्वा करदर्शनं कुरुत । (वटवः तथा कुर्वन्ति ।)

**गुरुः** वटवश्च (सहैव)- कराग्रे वसते लक्ष्मीः करमध्ये सरस्वती ।
करमूले स्थितो ब्रह्मा प्रभाते करदर्शनम् ॥

**गुरुः-** द्वौ अपि बाहू आस्फोटयन्तौ मया सहैव मन्त्रम् इमम् उच्चारयत ।

**गुरुः** वटवश्च (सहैव)- ॐ अयं मे हस्तो भगवान् अयं मे बलवत्तरः ।
अयं शिवाभिमर्शनो ह्ययं मे विश्वभेषजम् ॥

**गुरुः-** साञ्जलिबद्ध मङ्गलं पठत ।

**गुरुः** वटवश्च (सहैव)- ॐ उत्तिष्ठोत्तिष्ठ गोविन्द उत्तिष्ठ गरुडध्वज ।
उत्तिष्ठ कमलाकान्त त्रैलोक्यं मङ्गलं कुरु ॥
ॐ मङ्गलं भगवान् विष्णुर्मङ्गलं गरुडध्वजः ।
मङ्गलं पुण्डरीकाक्षो मङ्गलायतनो हरिः ॥
ॐ ब्रह्मामुरारिस्त्रिपुरान्तकारी भानुः शशी भूमिसुतो बुधश्च ।
गुरुश्च शुक्रः शनिराहुकेतवः सर्वे ग्रहाः शान्तिकरा भवन्तु ॥
श्रीगणेशं गुरुं देवं मातरं पितरं तथा ।
मातृभूमिमहं वन्दे स्वर्गादपि गरीयसीम् ॥

**गुरुः-** सर्वे स्वशय्यातऽवतीर्य मया सह भूमिवन्दनं कुरुत ।

**वटवः-** (गुरुणा सह भूमिवन्दनां च कुर्वन्ति) -
ॐ समुद्रवसने देवि पर्वतस्तनमण्डिते ।
विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ॥
(अनन्तरं बहिर्निःसरन्ति सर्वे ।)
(नेपथ्ये दन्तधावनप्रार्थनां तीर्थप्रार्थनां च कुर्वतां सर्वेषां शब्दः श्रूयते ।)
आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च ।
ब्रह्मप्रज्ञां च मेधां च त्वन्नो देहि वनस्पते ॥
सर्वे समुद्राः सरितस्तीर्थानि पावनानि च ।
सङ्गच्छन्तु स्नानकाले जलेऽस्मिन् प्रार्थिता मया ॥
गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धुकावेरि जलेऽस्मिन् सन्निधिं कुरु ॥
आगच्छन्तु महानद्यः कौशिकी गण्डकी तथा ।
सेती भेरी वाग्वती च स्नानार्थं प्रार्थिता मया ।
नमामि गङ्गे तव पादपङ्कजं सुरासुरैर्वन्दितदिव्यरूपम् ।
भुक्तिञ्च मुक्तिञ्च ददासि नित्यं भावानुसारेण सदा नराणाम् ॥
वरुणाय नमस्तुभ्यं तीर्थदेवान् नमाम्यहम् ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्नानानुज्ञां प्रयच्छन्तु कृपां कृत्वा ममोपरि ॥

**गुरुः** (नेपथ्ये एव)- त्रिरुन्मज्ज्य निमज्ज्य च स्नानं कुरुत ।
अथ मया सह स्नानाङ्गतर्पणं कुरुत ।
(सामूहिकरूपेण सर्वे उच्चारयन्ति ।)
ॐ भूर्भुवःस्वर्देवास्तृप्यन्तु ।
ॐ भूर्भुवःस्वर्मनुष्यास्तृप्यन्तु ।
ॐ भूर्भुवःस्वरृषयस्तृप्यन्तु ।
ॐ भूर्भुवःस्वः पितरस्तृप्यन्तु ।

**गुरुः** (नेपथ्ये एव)- शिखोदकदानं कुरुत ।
(सामूहिकरूपेण सर्वे उच्चारयन्ति ।)
ॐ लतागुल्मादिवृक्षेषु ये स्थिताः पितरो मम ।
ते सर्वे तृप्तिमायान्तु मया दत्तैः शिखोदकैः ॥

**गुरुः** (नेपथ्ये एव)- अथ तिलैर्यक्ष्मतर्पणं कुरुत ।
(सामूहिकरूपेण सर्वे उच्चारयन्ति ।)
ॐ यन्मया दूषितं तोयं शरीरमलतर्पणैः ।
तत्सर्वं क्षम्यतां देव यक्ष्मैतत्ते तिलोदकम् ॥

**गुरुः** (नेपथ्ये एव)- शिखाबन्धनं कुरुत
(सामूहिकरूपेण सर्वे उच्चारयन्ति ।)
ॐ तिष्ठ देवि शिखामध्ये सर्वकामार्थदायिनि ।
विष्णोर्नामसहस्रेण शिखाबन्धं करोम्यहम् ॥ इति॥

## तृतीयं दृश्यम्

(विद्यालयप्राङ्गणम्, समयः प्रातः)
(जवनिका परापतति ।)
(तत्र प्रविशन्ति वटवः ।)

**गुरुः-** (प्रविश्य) वटवः सर्वे समागताः ?

**वटवः-** समागताः सर्वे ।

**गुरुः-** तर्हि सर्वे पङ्क्तिबद्धा भवत । सतर्का भवत ।
(वटवः सतर्का भवन्ति ।)
प्रार्थनार्थं सज्जाश्च भवत ।
(वटवः प्रार्थनामुद्रायां तिष्ठन्ति ।)



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**गुरुः-** अथ मया सहैव प्रार्थनां कुरुत ।

**गुरुः-** नमो गणपते तुभ्यं सरस्वति नमोऽस्तु ते ।

**वटवः-** नमो गणपते तुभ्यं सरस्वति नमोऽस्तु ते ।

**गुरुः-** नमोऽस्तु गुरुदेवाय पित्रे मात्रे नमोनमः ॥

**वटवः-** नमोऽस्तु गुरुदेवाय पित्रे मात्रे नमोनमः ॥

**गुरुः-** नमस्ते पञ्चवक्त्राय पावनाय हनूमते ।

**वटवः-** नमस्ते पञ्चवक्त्राय पावनाय हनूमते ।

**गुरुः-** नम उत्तरवाहिन्यै वाग्वत्यै च नमोनमः ॥

**वटवः-** नम उत्तरवाहिन्यै वाग्वत्यै च नमोनमः ॥

**गुरुः-** गोकर्णाय नमस्तेऽस्तु गदाधर नमोऽस्तु ते ।

**वटवः-** गोकर्णाय नमस्तेऽस्तु गदाधर नमोऽस्तु ते ।

**गुरुः-** नमस्ते पार्वति देवि तुष्टाः पान्तु सदैव नः ॥

**वटवः-** नमस्ते पार्वति देवि तुष्टाः पान्तु सदैव नः ॥

**गुरुः-** अथ द्वादशाङ्गं सूर्यदर्शनं व्यायामं मया सह कुरुत । (गुरुः करोति, वटवश्च अनुकुर्वन्ति ।)

**गुरुः-** इदं कुक्कुटासनम् ।

(गुरुः कुक्कुटासनं करोति, गुरुणा सह वटवऽअपि अनुकुर्वन्ति ।)

**गुरुः-** इदं धनुरासनम् ।

(गुरुः धनुरासनं करोति, गुरुणा सह वटवऽअपि अनुकुर्वन्ति ।)

**गुरुः-** इदम् ऊर्ध्वपादासनम् ।

(गुरुः ऊर्ध्वपादासनं करोति, गुरुणा सह वटवऽअपि अनुकुर्वन्ति ।)

**गुरुः-** इदं धनुर्बाणासनम् ।

(गुरुः धनुर्बाणासनं करोति, गुरुणा सह वटवऽअपि अनुकुर्वन्ति ।)

**गुरुः-** मया सह वसावसं कुरुत ।

(गुरुः वसावसं करोति, गुरुणा सह वटवऽअपि अनुकुर्वन्ति ।)

**गुरुः-** सर्वेषाम् आसनानाम् अन्त्ये शवासनं कृत्वा दश कला यावत् विश्रामं कुरुत । ततः कक्षायां गत्वा पाठं पठत ।

(गुरुणा सह छात्राः शवासनं कुर्वन्ति । शवासनाद् उत्थाय गुरुं प्रणम्य सर्वे **छात्राः** निर्गच्छन्ति । जवनिका च पतति ।)

इति तृतीयदृश्यम् ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

## चतुर्थं दृश्यम्

स्थानं विद्यालयप्रकोष्ठम्

(नेपथ्ये वटून् गुरुराकारयति । वटवः परस्परम् आह्वयन्ति)

**परिचरः-** (इतस्ततः परिभ्रम्य, विलोक्य मार्जनिकां गृहीत्वा प्रविशति) । अहो ! सदा मया परिमार्ज्यते । वटवः अवकरान् विकिरन्ति । परिमेलितानि आसनानि इतस्ततः क्षिपन्ति । भवतु मम कार्यम् एव एतत् । (परिमार्जयन् आसनानि मेलयित्वा यथास्थानं स्थापयामि ।

(अभिनयेन हास्यात्मकेन दर्शकान् परिहासयति)

किं करोमि किङ्करः अस्मि यदि कार्यं न वर्तये ।
इदं कुरु पुनस्तत्र नय, आनय, स्थापय ॥
एतानि मम कर्माणि निश्चितानि परेण हि ।
निर्दिष्टानि ह्यनेकानि कार्याणि विलसन्ति मे ॥

(पुनरपि मेलयति, आसनानि पुनरन्यथा स्थापयति, पुनर्योजयति) इदानीं मम कार्यं जातम् । अथ घण्टिकां वादयामि । (घण्टां वादयन् निर्गच्छति)

(ततः प्रविशन्ति गुरुणा सह वटवः पुस्तकहस्ताः)

**वटवः-** (सामूहिकरूपेण) गुरो ! प्रणमामः । (सर्वे नमस्कुर्वन्ति)

**गुरुः-** आयुष्मन्तो भवत । यथास्थानमुपविशत ।

**वटवः-** (स्वस्थानेषु उपविशन्ति)

**रामः-** गुरो ! अद्य किं पाठयति भवान् ?

**गुरुः-** अद्य छन्दांसि शिक्षयामि ।

**हरिः-** छन्दसां ज्ञानेन किं भवति गुरो !

**गुरुः-** पद्ये कविताः शास्त्राणि च लेखितुं शक्यन्ते । छन्दोज्ञानेन पाठसौकर्यमपि भवति ।

**कृष्ण-** गुरो छन्दांसि कति सन्ति ? कुत्र पठ्यन्ते, के च छन्दासामाचार्याः ?

**गुरुः-** वेदे लोके च छन्दांसि असङ्ख्यानि सन्ति भवन्ति च । छन्दोविषये अनेकानि ग्रन्थरत्नानि लिखितानि सन्ति । तेषु पिङ्गलछन्दःसूत्रम्, वृत्तरत्नाकरम्, छन्दःकौमुदी इत्यादयः सन्ति ।

**हरिः-** कथं छन्दोज्ञानं कर्तुं पार्यते ?

**गुरुः-** छन्दांसि मात्रिकाः वर्णमात्रिकाश्च भवन्ति । मात्रिकायाम् आर्या, गीतिः, ... इत्यादयः सन्ति । वर्णमात्रिकच्छन्दांसि समपादि-असमपादी, विषमपादिवर्गेषु विभक्तानि सन्ति ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**हरिः-** ततस्ततः किम् ?

**गुरुः-** छन्दसि एकस्मिन् श्लोके चत्वारः पादाः भवन्ति। ह्रस्वदीर्घव्यवस्थायां गणाः आधारिताः सन्ति । ते च गणाः 'यमाताराजभानसलगाः' छन्दःशास्त्रस्य मूलसूत्रेण निर्धार्यन्ते ।

**कृष्णः-** नेपालिसाहित्ये संस्कृतसाहित्ये च प्रसिद्धानि छन्दांसि कति सन्ति ?

**गुरुः-** छन्दसां यथातथं सङ्ख्या निर्धारयितुं न पार्यते । तेषु अनुष्टुप्, विद्युन्माला, उपेन्द्रवज्रा, इन्द्रवज्रा, उपजातिः, शालिनी, भुजङ्गप्रयातम्, प्रियंवदा, वसन्ततिलका, मालिनी, शिखरिणी, मन्दाक्रान्ता, शार्दूलविक्रीडितम्, स्रग्धरा, स्रग्विणी, द्रुतविलम्बितम् इत्यादीनि छन्दांसि सन्ति ।

**श्यामः-** गणस्य परिचयः प्रयोगश्च कथं जायते ?

**गुरुः-** ह्रस्वदीर्घव्यवस्थायां गणस्य रचना जायते । एकस्मिन् गणे त्रयो वर्णा भवन्ति । गुरुवर्णं वक्ररेखया ह्रस्ववर्णं सरलरेखया बोध्यते । तत्र गतियतीनाञ्च विचारो विधेयः । 'आदिमध्यावसानेषु यरतां यान्ति लाघवम् । भजसा गौरवं यान्ति म-नौ तु गुरुलाघवम्' इति श्लोकश्च गणविषये प्रसिद्धः अस्ति ।

**श्यामः-** छन्दसि कथं रचना प्रस्तूयते सोदाहरणं शिक्षयतु गुरुः ।

**गुरुः-** यथा भुजङ्गप्रयातच्छन्दसि चत्वारो यगणा भवन्ति (ISS, ISS, ISS, ISS) ।

पराम्बा भवानी यशोदा सुसेव्या
दयार्द्रा सुमोदा भयानां विहन्त्री ।
सकायैर्मनुष्यैः सुभक्तैः समस्तैः
शिवा या धरित्री समाना विशाला ॥

**हरिः-** गुरो ! अपरञ्चोदाहरणं प्रस्तूयताम् ।

**गुरुः-** प्रियंवदाच्छन्दसि क्रमेण नगणः, भगणः, जगणः, रगणश्चेति चत्वारो गणाः भवन्ति- (III, SII, ISI, SIS)

अचल-वैभव-विशेष-कामनां
सकल-सुन्दर-विशाल-वासनाम् ।
सकल-शङ्कर-ममेश ! कल्पनां
कुरु ममाभयद ! ईश ! सर्वदा ॥

**वटवः-** भवता सुन्दराणि पद्यानि रचितानि गुरो !

**गुरुः-** एवमेव यूयं प्रतिगणं दश दश शब्दान् सङ्गृह्य श्वः मां श्रावयत, दर्शयत च । इदमेव युष्माकं गृहकार्यम् । ॥इति ॥



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

## पञ्चमं दृश्यम्

**स्थानम्-** विद्यालयप्रकोष्ठः

(ततः प्रविशति मार्जनिकाहस्तः परिचरः)

**मार्जकः-** (परिभ्रम्य परिहासपूर्वकमभिनीय) अहो ! मम अनधीतस्य दुर्भाग्यम् । बाल्यकाले पाठशालायाः पलायितम् । चत्वरे गत्वा कन्दुकं व्याघ्रचालनञ्च खेलितम् । (पादेन कन्दुकप्रहारमभिनयति ।) शैक्षिकयोग्यताया अभावात् अधुना कक्षायाः परिमार्जनं करोमि । मम सखायः केचित् सर्वकारस्य कार्यालये, केचिद् विश्वविद्यालये, केचिद्, विद्यालये गुरुकुले च सम्मानितपदे स्थित्वा सौकर्येण कार्यं सम्पादयन्ति, देशं चालयन्ति, विद्यालयं सञ्चालयन्ति । अहं मार्जनीं चालयामि (अभिनयं करोति) । (नेपथ्ये श्रूयते- भो परिचर ! शीघ्रं कक्षां मार्जय ।)

**मार्जकः-** गुरुः, पिता, माता च मां कियद् बोधयन्ति स्म, पठतु, लिखतु, ज्ञानवान् भवतु, बुद्धिमान् भवतु, विवेकशीलो भवतु इति । परन्तु मम मनः पठने, लेखने बोधने न यातम् । अधुना इयमवस्थास्ति । हंहो दुर्भाग्यम् ।

**वटुः-** (अङ्गुलिप्रदर्शनपूर्वकं साक्रोशम्) गुरुस्त्वाम् आकारयति, त्वमत्र बालवत् क्रीडन्नसि ? मार्जनादिकार्याणि सन्ति ।

**परिचरः-** (साभिनयम्) नाहं खलु मार्जक एव । अहन्तु कक्षाया व्यवस्थापकोऽस्मि । अधुना कक्षां व्यवस्थापयामि । (असनानि मेलयति) अधुना एकं गीतं गायामि -

जातं मे जीवनं व्यर्थं बाल्ये न पठितं मया ।
इदानीं किङ्करो जातः सर्वे ह्याज्ञापयन्ति माम् ॥
तथापि नास्ति मे चिन्ता सर्वे मम वशे जनाः ।
ये कार्यं नैव कुर्वन्ति तेषां कार्यं करोम्यहम् ॥
बुद्ध्वा ज्ञानस्य माहात्म्यं स्वकार्यञ्च करोम्यहम् ।
अनुजामनुजं चापि पाठयामि पुनः पुनः ॥

**वटुः-** भो मदन ! किङ्करोषि ?

**परिचरः-** किमर्थं मां किङ्कर इति वदसि ? अहं मदनः ।

**वटुः-** नाहं त्वां किङ्करं वदामि, किन्तु किं कुर्वन् असि इति पृच्छामि । त्वं गीतं गायन्नसि ? मधुरमस्ति । अपरमपि गीतं गीयताम् ।

सुन्दरमिच्छति द्रष्टुं चक्षुः
भोक्तुं जिह्वा मधुरं मधुरम् ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्पर्शं सुखदं वाञ्छति चर्म
नासा चेच्छति गन्धं स्वेष्टम् ॥
कर्णो मधुरं शब्दं नित्यं
आत्मानन्दं नेच्छति कश्चित्
आत्मानन्दस्तिष्ठति यन्न
लोके दुःखं नैव हि तन्न ॥

**वटुः-** कक्षायां वटव आगताः, गुरुरागच्छन्नस्ति । आलस्यं करोषि ?

**मार्जकः-** नहि नहि, स्वकार्यं कुर्वन्नस्मि । (घण्टिका ध्वनति, तौ निक्रान्तौ)

(वटवः समागच्छन्ति तदनन्तरं गुरुः प्रविशति)

**वटवः-** (उत्थाय) गुरो प्रणमामो भवन्तं गुरुदेवम् ।

**गुरुः-** आयुष्मन्तो भवत । सर्वे स्वस्य स्वस्यासने समुपविशत । (सर्वे स्वस्यासने वसन्ति)

**रामः-** भो गुरो अद्य अस्यां कक्षायां किं पाठयति भवान् ?

**गुरुः-** अद्य वेदं पाठयामि । वेदो ज्ञानस्य मूलमस्ति । उक्तञ्च 'वेदोऽखिलं धर्ममूलम्' । वेदः प्रकृतेः संविधानमस्ति । वेदः परमेश्वरस्य श्वासरूपः अस्ति । वेदे कर्मकाण्डं, साधनाकाण्डं, ज्ञानकाण्डञ्चेति काण्डत्रयं विद्यते । वेदेभ्यः अस्माकं संस्काराः सम्पाद्यन्ते । दैनिककृत्यं, वर्षकृत्यं, विशेषानुष्ठानञ्च सम्पाद्यन्ते ।

**श्यामः-** वेदः कतिविधः ? वेदाङ्गानि कति सन्ति ?

**गुरुः-** चत्वारो वेदाः ऋग्यजुःसामाथर्वाख्याः । नेपालजातेन वशिष्ठप्रपौत्रेण, शक्तिपौत्रेण, पराशरपुत्रेण भगवता व्यासेन एकमेव वेदं ऋग्- यजुः-सामोऽथर्वरूपेण विभाजिताः ।

**कृष्णः-** वैदिकग्रन्थेषु के के समायान्ति ?

**गुरुः-** वेद-ब्राह्मण-आरण्यक-उपनिषदः वैदिकग्रन्थेषु समायान्ति । व्याकरण-ज्योतिष-कल्प-शिक्षा-निरुक्त-छन्दांसि वेदाङ्गानि सन्ति । न्यायमीमांसाधर्मशस्त्रपुराणानि उपाङ्गानि सन्ति । रामायण-महाभारत-पुराण-तन्त्र-स्मृतिग्रन्थाश्च वैदिकचिन्तनं प्रकाशयन्ति ।

**हरिः-** वेदस्योत्पत्तिः कथम् ?

**गुरुः-** वेदो नारायणः साक्षात् स्वयम्भूर्वर्तते हरिः ।
नास्ति कश्चिद् वेदकर्ता निःश्वासो ब्रह्मणस्तु सः ॥

**रामः-** वेदसंहिताया: पठनं कथं भवति ?



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**गुरुः-** वेदाध्ययने ह्रस्वदीर्घप्लुतस्वरा भवन्ति, तथैव ते च उदात्तानुदात्तस्वरितभेदे विभक्ताः सन्ति । उदात्तादिस्वरानुसारं हस्तचालनञ्च क्रियते । यथा वाणी तथा पाणिश्च प्रयुज्यते । वेदस्य पठने गुरोरुच्चारणस्य अनूच्चारणं भवति । यथा गरुः शब्दानाम् उच्चारणं करोति, तथैव छात्राः तच्छब्दानाम् अनूच्चारणं कुर्वन्ति । अध्ययनशब्दस्य सार्थकता वेदाध्ययने एवा अनुभूयते ।

**वटवः-** वेदसंहितानुसारं वेदोच्चारणं पृथग् भवति किम् ?

**गुरुः-** वेदसंहितानुसारे वेदोच्चारणं पृथगस्ति । शिक्षाशास्त्रेषु तस्योल्लेखः कृतो दरीदृश्यते । यथाहं शुक्लयजुर्वेदं सस्वरं पठामि तदनुक्रियताम् । ओ३म् समिधाग्निं ...।

**वटवः-** शुक्लयजुर्वेदोऽस्ति चेद् अपरः को यजुर्वेदः अस्ति ?

**गुरुः-** शुक्लयजुर्वेदः कृष्णयजुर्वेदश्चेति यजुर्वेदस्य भेदौ स्तः । वेदानामनेके शाखाभेदाः सन्ति । तेषां संख्या ११३१ मिता निर्दिश्यते ।

**वटवः-** कर्मकाण्डस्य कोऽर्थोऽस्ति ? कर्मकाण्डस्य व्याख्या कुत्र प्राप्यते ?

**गुरुः-** कर्मणः सहायकाः पदार्थाः कर्मसाधने आवश्यका भवन्ति । तेषां समूहरूपं नाम कर्मकाण्डं कथ्यते । वेदाङ्गस्य कल्पशास्त्रे कर्मकाण्डस्य विवेचनं, व्याख्या, प्रयोगश्च उपलभ्यते ।

**वटवः-** कर्मकाण्डस्याध्ययनेन किं ज्ञायते ?

**गुरुः-** कर्मकाण्डस्याध्ययनेन लौकिककर्मणां, वैदिकयज्ञादिकर्मणाञ्च ज्ञानं जायते । सर्वविधं प्रयोगात्मकं ज्ञानं कर्मकाण्डम् उच्यते ।

कर्मणा जायते नित्यं धनधान्यसमुन्नतिः ।
स्वकर्मणा हरिः प्रीतो जायते नात्र संशयः ॥
सर्वे स्वकर्मनिरता धर्मसंस्कृतिरक्षकाः ।
**समुन्नताः**सन्ति लोके नात्र शङ्का विधीयते ॥

**श्यामः-** गुरोः कर्मकाण्डज्ञानेन किं जायते ?

**गुरुः-** वयं नानारूपाणि कर्माणि कुर्मः । तेषां कर्मणां प्रयोगात्मकं ज्ञानं कर्मकाण्डम् । तत्र आवश्यकानि वस्तूनि सम्भाराः कथ्यन्ते । कर्मसम्पादनप्रकारस्तस्य क्रमश्च कर्मकाण्डं वर्तते । एतेन ज्ञानेन कर्मसम्पादने कुशलता जायते । स्वस्वकर्मसम्पादने यः कुशलः स सर्वत्र सम्मानं लभते, जीविकोपार्जने समर्थः, स्वाधीनः, स्वावलम्बी च भवति । यत्र सर्वे जनाः कर्मकुशलाः, स्वावलम्बिनश्च भवन्ति स देशः समुन्नतो भवति ।


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**वटवः-** गुरो ! तर्हि वयं सर्वे अपि तथा शिक्षिताः कर्मकुशलाः, स्वावलम्बिनः सन्तः सुखिनः समुन्नताश्च भवामः । (जवनिका पतति । नेपथ्ये स्वावलम्बिनां प्रशंसा श्रूयते)

(यत्र स्वकर्मकुशलाः जनाः स्युः स्वावलम्बिनः ।
स देश उन्नतो नित्यं सुखिनः स्युर्जना अपि ॥
वेदविज्ञानज्ञानेन सम्मानं लभते जनः ।
कथं किं कर्म कर्तव्यमिति ज्ञेयं सदा नरैः ॥)

इति पञ्चमदृश्यम् ।

**समाप्तमिदं नाटकम्**



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

# अङ्गुलिमालं प्रति बुद्धकरुणा

डा.कृष्णप्रसादभट्टराई

दृश्यम्– प्रथमम् ।
समयः– मध्याह्नकालः ।
स्थानम्– श्रावस्ति, वननगरसन्धिस्थानम् ।

(परिवेशः सिद्धार्थगौतमबुद्धः शिष्यगणैः सार्धं श्रावस्तिनगरात् अन्यत्र गच्छन्नस्ति । तत्र तथागतस्य बुद्धस्य दर्शनार्थं बहवः नागरिकाः समुपस्थिताः दृश्यन्ते । नगरान्ते अरण्यश्च दृश्यते । तत्र एको मार्गो वनं गच्छति, अन्यो मार्गो ग्रामं गच्छति । द्वयोर्मार्गयोः सङ्गमस्थले भिक्षुकरूपशिष्यगणैर्भिक्षुकरूपो बुद्धः परिवेष्टितोऽस्ति । तेन भिक्षापात्रं च गृहीतमस्ति । बुद्धोऽरण्यमुखेन मार्गेण गन्तुमुद्यतोऽस्ति । तद्दृष्ट्वा वनाभिमुखं मार्गं परित्यज्य ग्रामाभिमुखं मार्गं गन्तुं तत्रोपस्थिता जनाः प्रेरयन्ति । तस्मिन्नवसरे वार्तालापो भवति । तत्र नागराश्च दृश्यन्ते)

**एको नागरः-** (करबद्धः सन्)
भो आर्य ! नैव गन्तव्यं वनमेतद् भयङ्करम् ।
वनेऽस्मिन् तिष्ठते नित्यं मनुष्यरूपदानवः ॥

**द्वितीयो नागरः-** (अञ्जलिं बद्ध्वा)
ये गताः काननं तत्र हता नैव निवर्तिताः ।
भटाश्च निष्फला युद्धे, ते तेनैव हता वने ॥

**एको भिक्षुकः-** (भययुक्तमाश्चर्यं व्यक्तं करोति)
नरहिंसो राक्षसः किं जनान् हत्वा च खादति ।
कीदृशो नरभक्षोऽस्ति धिक् तं धिक् तं वदाम्यहम् ॥

**नागराः-** (साभिनयं निवेदयन्ति)
हत्वाङ्गुलिं स गृह्णाति न वै स नरभक्षकः ।
आभूषणं तथा वित्तं, नैव गृह्णाति कस्यचित् ॥

**एका वृद्धा-** (आश्चर्यं व्यक्तं करोति)
आश्चर्यं पशवो तत्र हिंसकाः सन्ति किन्तु सः ।
पशूनां हि परं मित्रं, तेषां तु प्राणवल्लभः ॥

**वृद्धो भिक्षुकः-** (साश्चर्यं)
मृतानामङ्गुलीभिश्च किं करोति वदन्तु नः ।


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**एको नागरः** (साश्चर्यम्)
मृतानामङ्गुलीभिः स मालां निर्माय धारयेत् ॥

**वृद्धो भिक्षुकः** (साश्चर्यम् पृच्छति)
प्रसेनजितराज्येऽपि एतद् दुष्कर्म कीदृशम् ।
न कश्चिदस्य पापस्य वर्तते वारणक्षमः ?

**एको युवकः-** (विनयपूर्वकम्)
अनेके राजपुरुषास्तस्य दुष्टस्य वारणे ।

**कृतयत्नाः** परास्तास्ते वने दुष्टेन मारिताः ॥

**तथागतः** (दक्षिणकरमुत्थापयन्)
दुष्कर्म कुर्वन् स जनोस्तिष्ठति जालिनीवने ।
प्रतीक्षायां ममैवास्ति सौजन्यप्राप्तये भृशम् ॥

**शिष्यगणाः-** (सामूहिकरूपेण भाषन्ते)
भो आर्य ! नैव गन्तव्यं ज्ञेयः सः प्राणघातक : ।
गम्यमन्येन मार्गेण भीषणं जालिनीवनम् ॥

**तथागतः-** (ईषत् हसति)
युष्माकं कथनं सत्यं गन्तव्यं तत्तु मत्कृते ।
जीवनं मम यत् शेषं नित्यं लोकसमर्पितम् ॥
करुणाप्लावितं चित्तं सर्वदा हितकारकम् ।
एकाकी तत्र गच्छामि निर्भयानां कुतो भयम् ॥
(इत्युक्त्वा तथागतो जालिनीवनं गच्छति, सर्वे विनीतभावेनाधोमुखा भूत्वा तत्रैव तिष्ठन्ति)

## द्वितीयं दृश्यम्

**समयः–** उत्तरमध्याह्नकालः ।

**स्थानम्–** जालिनीवनम् ।

**परिवेशः–** (गजराजगत्यां शनैःशनैस्तथागतः स्वमार्गेण गच्छन्नस्ति, तथागतस्याग्रभागे एका वृद्धा शनैःशनैः गच्छन्ती दृश्यते, तां दृष्ट्वा स दुष्टो जनघाती हिंसकः पुरुषः तां वृद्धां हन्तुं कन्दरात् मार्गे आगच्छति)

**वृद्धा-** (आत्मालापं करोति)



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ममैव पुत्रोऽसौ दुष्टो मातृभक्तः स वै पुरा ।
अवश्यं मेऽनुरोधेन हिंसाकार्यं स त्यक्ष्यति ॥

**तथागतः-** (तां वृद्धां परित्यज्य, तस्याग्रे किञ्चित् दूरं गच्छति)
(इयं वृद्धा तस्मादङ्गुलिमालात् रक्षणीयेति विचार्य आत्मालापं करोति ।)
मदान्धो कुमार्गी खलः प्राणघाती ।
विधर्मी नरो यो भवेत् दुष्टकर्मा ॥
न माता पिता वा न भर्ता न पत्नी ।
न पुत्रो न पुत्री न जानाति किञ्चित् ॥
हिंस्रकस्यास्य विश्वासो न कर्तव्यः कदाचन ।
(यथाकथञ्चिदपि वृद्धेयं रक्षणीयेति विचार्य तथागतो वृद्धाया अग्रभागे गत्वा तिष्ठति । तस्मिन्नेवासरे तथागतं हन्तुमङ्गुलिमाल आगच्छन् दूरादेव कथयति)

**अङ्गुलिमालः-** (तथागतं प्रति गर्जयन्)
पश्य हे भिक्षुक क्व त्वं किमागच्छसि निर्भयः ।
कालोऽहमङ्गुलिमालो दुष्टोऽस्मि जनघातकः ॥

**तथागतः-** (हसन्)
जानामि त्वां महाभाग जानामि तव कर्म च ।
त्वयैव खलु भोक्तव्यं भोग्यं कर्मविपाकजम् ॥

**अङ्गुलिमालः-** (सम्बुद्धस्य वचनं श्रुत्वा स किञ्चित् स्मरति, तत् पश्चात्)
अहं शूरश्च वीरश्च बलवान् प्राणघातकः ।
दृष्ट्वैव मूर्छिताः सर्वे मां कालं त्वं तु निर्भयः ॥

**तथागतः-** (करुणया नम्रीभूय)
न मे त्रासोऽस्ति कालस्य शूरस्त्वं यदि वर्तसे ।
पूरयस्व ममैकेच्छां ततो मां प्रहरिष्यसि ।

**अङ्गुलिमालः-** (मदोन्मत्तभावेन गर्जति)
वद कास्ति त्वदीयेच्छा ? जीवनस्यान्तिमे स्थिता ।
पूर्णां कृत्वा तवेच्छां ते कण्ठच्छेदं करोम्यहम् ।
सहस्राङ्गुलिमालो वै तवाङ्गुल्या भवाम्यहम् ।
अनन्तरं तु तां मालां गुरवेऽहं समर्पये ॥
ततश्च सकलां हिंसां त्यक्त्वा साधुत्वमाप्नुयाम् ॥

**तथागतः-** (मार्गस्यैकभागे स्थितं वृक्षं प्रदर्श्य)–
वृक्षस्य पत्रमेकं त्वं सञ्छिद्य देहि मे द्रुतम् ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**अङ्गुलिमालः-** (तिरस्कुर्वन्)
निरर्थास्ति तवेच्छैषा वैचित्र्येण समन्विता ।

**तथागतः-** (विनीतः सन्)
सार्थो वास्तु निरर्थो कामः स एव मे मतः ।
तत्पूरणे न सामर्थ्यं चेन्नान्यं वै वदाम्यहम् ।

**अङ्गुलिमालः-** (वाणप्रहारेण पत्रमेकं पातयति तद् बुद्धाय ददन्)
हे भिक्षुक ! गृहाणेदं पत्रमेकं तवेप्सितम् ।
कास्त्यन्या कामना शीघ्रं वद तां पूरयाम्यहम् ॥

**तथागतः** (विनम्रभावेन)
प्रसन्नोऽस्मि अहं दृष्ट्वा तव वाणस्य कौशलम् ।

**अङ्गुलिमालः-** शीघ्रं कथय हे भिक्षो कान्यास्ति तव कामना ? ।

**तथागतः-** (विनम्रभावेन)–
शृणु वीर द्वितीयेच्छां मम कौशलसंयुत ।
यत् पत्रं पातितं पूर्वं तत् तत्रैव नियोजय ॥

**अङ्गुलिमालः** (क्रोधपूर्वकम्, गर्जति)
भिक्षुक ! शैशवीमिच्छां कथं कामयसे वृथा ?
कः क्षमः पतितं पत्रं पुनस्तत्रैव योजने ॥

**तथागतः** (विनम्रभावेन)

**त्वं वीरः** कीदृशो यस्त्वं पत्रं वृक्षे न योक्ष्यसे ।
क्व ते शौर्यं क्व ते शक्तिः क्व सामर्थ्यं क्व वीरता ?
शक्नोषि मारितान् पूर्वं किं तान् जीवयितुं पुनः ।
ते सामर्थ्यं न चेत् तादृक् किं तेषां मारणेन ते ?

**अङ्गुलिमालः** (तथागतस्य कथनं श्रुत्वा तस्य मुखमण्डलं मलिनं भवति स किं कर्तव्यविमूढः संजात : । ततः परं सः तथागतस्य चरणयोः पतति, रोदिति च)
सद्गुरुर्न मया प्राप्तो हता गुर्वाज्ञयैव ते ।
अविवेकी गुरुर्यस्य रक्षकस्तस्य को भवेत् ?
पापमूर्तिरहं दुष्टः कृतं हि पातकं मया ।
पाहि मां त्राहि मां शीघ्रं देहि मे शरणं तव ॥

**तथागतः-** (करुणापूर्वकमङ्गुलिमालमुत्थापयन्, निकटस्थां वृद्धां सङ्केत्य )
सा हि ते जननी तस्याः पादौ संस्पृश्य याचनाम् ।
कुरु क्षमायास्त्वं शीघ्रमाशीर्वादं गृहाण भो ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सैव दीक्षा तव कृते सत्कार्यस्य भविष्यति ।

(अङ्गुलिमालो मातृचरणौ पतति, माता तमुत्थाप्य हृदये धारयति, माता च रोदिति, पुत्रश्च रोदिति, सिद्धार्थगौतमबुद्धो मातापुत्रयोरपूर्वं मेलनं दृष्ट्वा करद्वयमुत्थापयन्ननुग्रहस्य वर्षां करोति)

(नेपथ्ये बुद्धप्रार्थना श्रूयते यथा)

हे बुद्ध चरणं देहि शरणं देहि बुद्ध भो ।
गच्छामि शरणं बुद्धं धम्मं सङ्घं निरन्तरम् ॥

समाप्तम्



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

# विदेशयानम्

प्रा. डा. चन्द्रमणिनेपालः
धरान १४

**पात्रपरिचयः**

मधुकरः– गृहपतिः ४५ वर्षदेशीयः
मन्दोदरी– मधुकरस्य पत्नी ४० वर्षीया
रमेशः– मधुकरपुत्रः १२ वर्षदेशीयः
कृत्तिका– मधुकरपुत्री, रमेशस्य भगिनी ७ वर्षदेशीया
मनोहरः– मधुकरस्य बालसखा ४५ वर्षदेशीयः ।

## प्रथमं दृश्यम्

(मन्दोदरी मार्जन्या प्रकोष्ठं मार्जयति, रमेशः तद्भगिनी च भूमावुपविश्य लिखन्तौ पठन्तौ स्तः, परितः पुस्तकानि विकीर्णानि सन्ति ।)

**रमेशः–** मातः ! मम तु अभ्यासपुस्तिका पूरिता, त्रीण्येव रिक्तपृष्ठानि अवशिष्यन्ते । द्रुतमेव एका क्रेतव्या ।

**कृत्तिका–** मातः ममापि एका एव अभ्यासपुस्तिका अवशिष्यते । लेखनी अपि प्रायेण समाप्ता वर्तते । मत्कृतेऽपि शीघ्रम् आनेतव्या ।

**मन्दोदरी–** (मार्जनीं दोलयन्ती) युवयोर्दुराग्रहं मां न श्रावयतम्, युवयोः पितुर्दैनिककार्यम् एतदेव वर्तते यत् प्रातः गोष्ठे गोव्यसनेन गच्छति, दिवसो न्यायालयप्राङ्गणभ्रमणेन, पुनः सायं गोष्ठपरिभ्रमणेन, रात्रिश्च निद्रया व्यत्येति । स्तोकमपि रूप्यकाणि न सन्ति । स्वल्पम् अपि आर्जनं नास्ति, न च उद्योगे तदर्थं च यत्नः । पितरमेव वदतम्, श्रावयतम्, याचेतं युवयोः आवश्यकताम् ।

**रमेशः–** पिता एव गृहे न वसति, किं कथयाव । पिता कुत्र गतवान् मातः !

**मन्दोदरी–** न जाने अहं तव पितुश्चरित्रम् । भवेत् कुत्रापि तस्य महान् व्यापारः । (गौः क्रोशति, वत्सश्च क्रोशति) अहो गौरपि क्षुधिता तृषिता च, कियत् पलालं दत्तम् आसीत् (सन्ततिं हस्तेन दर्शयति) एतयोः पित्रा । गवे खाद्यपानीयादीनां प्रदानवेला व्यतीता । एतयोः पिता इदानीं यावत् नायाति । (हस्तेन स्वशिरः ताडयति ।)

(मधुकरः पोटलिकायां किमप्यादाय प्रविशति । पोटलिकां च पत्न्याः पुरतः स्थापयति । शिरस्त्रं उत्तरांशुकं च उत्तार्य वज्रदन्तिकायाम्



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अवलम्बयति । स्वयञ्च मञ्चम् अधिवसति)

**मन्दोदरी–** (हस्तेन पतिं दर्शयन्ती) इदानीं तु पत्नी ओदनम् अपचत्, भोजनवेला जाता इत्यनुमाय मदीयः पतिः गृहे समागतवान् । गृहे करणीयानि कार्याणि कति सन्ति, आस्था नैव तत्र । आश्रितपरिवारसदस्यानां का याचना ? का परिवेदना ? चिन्ता नास्ति । का चावश्यकता, एकोऽअपि प्रश्नो नास्ति । गेहे खाद्यपेयसामग्यः सन्ति न वा ? नास्ति तत्रापि चिन्तनम् । पुत्रस्य पुत्र्याश्च पठनपाठनम् ...।

**मधुकरः–** अलमलमलम्, अति सर्वत्र वर्जयेत् । युष्माकम् अतिजल्पनेन मे कर्णौ जीर्णौ । (कर्णौ पिदधाति) यदा यदा गृहम् आगच्छामि तदा तदा परिवारसदस्यानाम् अतिजल्पनं श्रोतव्यं भवति (पुनर्गौः क्रोशति) मां विलोक्य नैते मानवा एव क्रोशन्ति अपि तु गावोऽअपि क्रोशन्ति गावोऽअपि, किं करवाणि ? (तत्र सर्वान् दर्शयन्) सर्वस्वप्रदानेन अपि एतेषां तृष्णाभाण्डं न पूर्यते । किं युष्माकम् उदरं रिक्तम्, किं नग्नं शरीरम् ? मया किं न कृतम् अत्र ? अतः परं किं कर्तव्यम् ? किं गलच्छेदनं कार्यम् ? (करेण गलच्छेदनं सङ्केतयति, पुत्रः पुत्री च कर्णौ पिधत्तः) पश्य पोटलिकायाम् । युष्माकं दुर्मुखरोधं भविष्यति किम् ?

**मन्दोदरी-** (पोटलिकाया वस्तूनि निष्कासयति) किमानीतम् ? इ इ इ इ अलावु, ह्यः अपि अलावु, अद्यापि अलावु, श्वः अपि अलावु । प्रतिवेशिनां महानसात् प्रतिदिनं मांसादीनां सुगन्धं सुमनोहरम् आयाति । (पुनः पोटलिकां पश्यति) इदम् उर्वारुकम्, आ हा हा इदं वृन्ताकम्, अयं पटोलः, ...आ हा हा इयं पत्रगोभिका, अयं घोषकः ।...रोदनी किमर्थं नानीता ? तिक्तकारवेल्लं नानीतम् ? (हस्तेन कुष्माण्डाकारं दर्शयति) कुष्माण्डानि किं आपणे नासन् ? पटोलानि नासन् ? अ ह ह ह मुखं विकृतम्, उदरम् अजीर्णम् । (पुत्रः पुत्री च पुनः पुनः पितरौ पश्यतः ।)

**कृत्तिका–** पितः (न वदति) पितः ! (न वदति) मातः !

**मन्दोदरी-** किं भणसिं ? पितरं वद । अहं तव याचनं न शुश्रूषामि । अस्माकं पुरुषप्रधाने समाजे मातुः किं प्रयोजनम् ? माता तु केवलं सन्ततिप्रजननसाधिका गृहचुल्लीवेदिकाविनोदिनी एव । यदि तव पिता सत्यमेव गृहस्वामी स्यात् तर्हि गृहपरिवारसदस्यानां ग्राह्यवस्तुषु कदापि अल्पता न कुर्यात् । कतिपयमहिलानां पत्यो गृहव्ययं कुरु इति वदन्तः स्वकीयपत्नीभ्यो रूप्यकाणि ददति । मम तु दुर्भगायाः पत्या



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एकमपि रूप्यकं नैवार्ज्यते । अरे (पतिं सङ्केतयन्ती) प्रतिवेशिनीनां मध्ये लज्जया नतमस्तका अस्मि ।

**मधुकरः–** भो अलमलम् । त्वं यदि समर्था असि, तर्हि स्वयम् अर्जय सम्पत्तिम् । नारीपुरुषौ समानौ इति तु महिला एव निगदन्ति । नेपाले इदानीं राष्ट्रपतित्वं महलियामप्यभूत । प्रधानन्यायाधीशत्वम् अपि महिलायाम् एव वर्तते । अनेका महिलाः सांसदाः सन्ति, नेत्र्यः सन्ति, सचिवाः सन्ति, महति महति सर्वकारपदे महिलाः सन्ति (शिरः ताडयन्) मम तु दुर्भाग्यम्, कस्मिन् अशुभसमये कन्यार्थं तद्गृहे गतवान् हा दैव !

**रमेशः–** मम वार्ता न श्रूयते ? मम अभ्यासपुस्तिका समाप्ता (दर्शयति) । लेखने पठने च काठिन्यम् अभूत् । शीघ्रं क्रेतव्या आनेतव्या च ।

**कृत्तिका–** ममापि अभ्यासपुस्तिका समाप्ता वर्तते । मत्कृतेऽपि आनेतव्या । मम तु लेखनी च नास्ति ।

**मधुकरः–** सर्वस्वे प्रदत्ते अपि युष्माकं मुखदरी न पिधीयते । तथापि कुत्रचिद् रूप्यकाणि प्राप्येरन् तर्हि युष्माभिरभीप्सितवस्तूनि अभ्यासपुस्तिकादीनि आनेष्यामि ।

**मन्दोदरी–** हा पतिदेव ! उत्थातव्यम्, जागरितव्यम् कर्तव्यं किमपि कार्यम् । अस्मत्प्रतिवेशे कासाञ्चित् पतयो हडकङे सन्ति, कासाञ्चित् मत्सखीनां पतयः अमेरिकायां, कासाञ्चिच्च अष्ट्रेलियायां सन्ति । केचन जापाने सन्ति, केचन कोरियायां सन्ति, वैदेशिकम् आर्जनं कुर्वन्ति । प्रतिवेशिसखीनां (अङ्गानि दर्शयन्ती) शिरः सुवर्णकिरीटेन, कर्णौ विभ्राजत्कुण्डलाभ्याम्, गलञ्च मनोहरेण हारेण, करयुगलम् आकर्षककेयूराभ्याम्, कटिः सुशोभनरसनया, पादयुगलं झणझणायमानाभ्यां नूपुराभ्याम्, सर्वाङ्गानि च मञ्जुलवस्त्रेण शोभन्ते । अस्माकं तु ....(मुखं परामृशति) ।

**मधुकरः–** हा कष्टम् । धनहीनस्य जीवनम् अजीवनमेव, गच्छामि अहम् इदानीमेव विदेशं प्रति । एतेषां प्रतिदिनं कोलाहलश्रवणापेक्षया तु कुत्रापि गत्वा दुःखातिशयानुभव एव अतिशोभनं भविष्यति ।

**मन्दोदरी-** हे हरे ! किं करवाणि ? केन दुर्भाग्येन मम पत्युः बुद्धिभाण्डं पिहितम् ? गृहं परितः स्वग्रामं परितः निजं परित एव पश्यन् अपि न पश्यति ? अत्रैव केचन मन्त्रालये सचिवाः सन्ति, कतिचन अध्यागमनकार्यालये कार्यरताः सन्ति, केचन राजस्वकार्यालये सन्ति, केचन यातायातकार्यालये सन्ति, रूप्यकाणि अर्जयितुं शैक्षिकयोग्यताया आवश्यकता अपि



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नास्ति, न स्मर्यते ? भवतो मातुलपुत्रः केवलम् अष्टमकक्षामेव उत्तीर्णवान् अस्ति, अन्तःशुल्ककार्यालये कार्यालयसहयोगी वर्तते, तस्य गृहं पश्यतु, तस्य पत्न्याः वस्त्राभरणादीनि पश्यतु, सा तु मार्गे गच्छन्ती अपि स्ववामदक्षिणपार्श्वं पश्यन्ती स्ववस्त्राभरणदीनि दर्शयन्ती गच्छति, मार्गे सम्मेलनेऽपि अस्माभिः सह सम्यक्तया नैव वदति, अस्माकं स्वजनत्वद्योतने तस्यां लज्जा उत्पद्यते। तत्सन्ततीनां पठनपाठनव्यवस्थां पश्यतु। तस्य पुत्राः पुत्र्यश्च महार्घेषु महार्घेषु आङ्गल-आवसीयविद्यालयेषु पठन्ति। अस्माकन्तु एते सर्वकारविद्यालये तत्रापि निःशुल्कसंस्कृतविद्यालये पठन्ति, आ हा हा हा।

**मधुकरः–** अलम्, अलम्, अलम् अतिजल्पनेन अलम्। स्वसंस्कारं, स्वधर्मं, स्वपरिस्थितिं, स्वकीयमर्यादाञ्च विहाय स्वपूर्वपुरुषान् विस्मृत्य स्वकुलम् अविचार्य परानुकरणकारिणाम् उदाहरणं ददासि ? स्वदेशः स्वजननी स्वसन्ततिः स्वधर्मः स्वविद्या प्राणेभ्योऽपि प्रेयांसः सन्ति। विश्वप्रसिद्धेन पाणिनितुल्येन, कालिदाससदृशेन च भाव्यं पुत्र रमेश त्वया। गार्ग्या मदालसया मैत्रेय्या साम्यं करणीयम् पुत्रि कृत्तिके त्वया। अन्येषाम् अश्वारोहणं विलोक्य छदारोहणं नैव विधेयम्। अहम् गच्छामि।

(निर्गच्छति, अन्ये तं पश्यन्ति, जवनिका पतति।)

॥इति॥

## द्वितीयं दृश्यम्

(शनैः शनैर्जवनिका अपसरति। मधुकरस्यात्मीयं मित्रं मनोहरश्चायपानेन साकं समाचारपत्रं च पठन् दृश्यते।

**मनोहरः–** (समाचारपत्रं पश्यन्) कोरोनाजीवाणुना विश्वे लक्ष्यत्रयाधिकमनुष्या हताः, आ हा हा कष्टं कष्टम्। सर्वं विनष्टम्। कोरोनामहामार्याः कारणेन अकर्मण्यतां प्राप्तानाम् असन्तुष्टजनानां राजमार्गावरोधः प्रचलन् अस्ति। इदानीम् अत्र सर्वेऽसन्तुष्टाः सन्ति, सर्वकारस्याधिकारिवर्गा असन्तुष्टा एव सन्ति, मन्त्रिणः असन्तुष्टा एव सन्ति। भारतसीमक्षेत्रे सहस्रशः प्रवासागता नेपालिनोऽवरुद्धाः सन्ति। तत्र केषां चिन्ता ? अत्र तु केवलं स्वोदरपूरणस्य चिन्ता वर्तते समेषाम्। अहह शान्तं



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पापम् । जनानां विपत्तिः । सर्वकारोऽपि प्रवासागतानां व्यवस्थापने निरीह एव (नेपथ्ये कस्यचित् कासशब्दः श्रूयते, मनोहरः अन्तः पश्यति, तावत् मधुकरः प्रविशति)

**मधुकरः–** नमस्ते, अहं तु अन्तः एव समागतः, भवन्तः कस्मिन् कर्मणि व्यस्ताः सन्ति ।

**मनोहरः–** ओ नमस्ते नमस्ते मधुकर, स्वागतम्, आगच्छतु वसतु । (वासाय मञ्चं दर्शयति) कां मत्सेवां समपेक्ष्य मन्निवासे पदार्पणं विहितम् ? अपि कुशली भवान् ? परिवारसदस्येषु निरामयता एव ? अपि सुशोभना भवतो दिनचर्या ?

**मधुकरः–** सर्वं तु समीचीनं सुशोभनमेव वक्तव्यम् । परं किं कथयानि, देहे तु निरामयता एव वर्तते किन्तु मनो न शान्तम्, अपि तु दग्धम् । (पीडामुद्रां दर्शयति) अपेक्षामेव तु सखायं स्मारयति । आम् भवतः किं वृत्तम् ? अपि कुशली भवान् ? सपरिवारो निरामय एव ?

**मनोहरः–** वृत्तान्तं समीचीनमेव ममापि, परन्तु विश्वे राष्ट्रे च कोरोनाविषाणोरातङ्को वर्तते । हताः बहवो नरा बह्व्यश्च नार्यः, हन्यमानाश्च सन्ति जना इदानीम् अपि ।

**मधुकरः–** एवं बहवो हन्यमानाः सन्ति । अयं सङ्क्रमणरोगो वर्तते, सङ्क्रमणं न्यूनीर्तुं सर्वकारेण निर्बन्धस्य समायोजनं तु कृतम्, तथापि तस्य प्रभावकारिता न दृश्यते । निर्बन्धेऽपि जना अत्यावश्यककार्यविषये बहिर्निगच्छन्ति एव, मार्गे मार्गे आपणे आपणे कोषागारे कोषागारे च जनानां महान् सम्मर्दो भवत्येव । जनानां सावधानता सतर्कता तत्र प्रायेण न दृश्यते । कोरोनासङ्क्रमणस्य निराकरणार्थं तु जनैः परस्परं दूरताम् अङ्गीकृत्य स्थेयम् । खाद्यादीनाम् आवश्यकवस्तूनाम् आनयनानन्तरं फेनिलजलेन हस्तप्रक्षालनं कार्यम्, बारम्बारं उष्णजलपानं वाष्पग्रहणं च कर्तव्यम् । कांश्चन विहाय अस्मिन् विषये जनाः सावधाना न दृश्यन्ते । अतो बिभेति मनः ।

**मनोहरः–** एवम् एवम्, अधुना अत्यन्तं महत्त्वपूर्णं कार्यं तु मिथः सामाजिकदूरताया अवलम्बनमेव । तेन असङ्क्रमितेषु सङ्क्रमणं न जायते, सङ्क्रमितानां च चिकित्सया रोगनिवारणं भवति । एवं करणे मासेन एव अस्या भयावहस्थितेः शमनं भवति । आम् प्रकृतम् अनुसरामः । एतादृश्याम् अवस्थायामपि भवान् अत्र समागतः, भवत आगमनकारणं किम् ? कां सेवां करवाणि ?



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**मधुकरः–** सखे किं करवाणि ? किं कथयानि ? तथापि चिन्ताविषयं कमपि द्वितीयं कथयित्वा किञ्चित् चित्तदाहस्य शमनं कर्तुम् इच्छामि ।

**मनोहरः–** एवम् एवम्, कथयतु भवान् निजमनोव्यथाम् ।

**मधुकरः–** किं कथयानि, कथं च कथयानि निजपरिवारकलहस्य विषये । तथापि सुहृदं मनश्चिकित्सकं मत्वा वक्तुम् उत्सहे । धनहीनजीवनम् अजीवनमेव । यदाहं गेहे भवामि तदा परिवारसदस्यानामावश्यकतां याचनादिकं श्रुत्वैव मे कर्णौ जीर्णतां यातः । नियमितार्जनं नास्ति । न्यायालये सेवाग्राहिणां बाह्यसेवया दिवसं यापयामि । कदाचित् किञ्चिदार्जनं भवति, कदाचित्तु रिक्तकरो गेहं निवर्ते । दारा मे एकापि आग्रहेण शतदाराणाम् अनुभावयित्री वर्तते । जल्पति सा नित्यं 'विदेशं गच्छ' इति, 'किञ्चिद् उद्योगं कुरु' इति । 'शैक्षिकयोग्यतायाः शून्यतया महत्याः सर्वकारसेवाया आशा नैव, तथापि कमपि नेतारं सङ्गृह्य अध्यागमनकार्यालये वा राजस्वकार्यालये वा विमानस्थले वा मालपोतकार्यालये वा यातायातकार्यालये वा कार्यालयसहयोगिपदेऽपि कार्यं कुरु' इत्यादिकं किं किं वदति किं किम् । श्रोतुमपि न शक्यते । भोजनमपि सौहार्देन न ददाति, जलमपि सुवाचा न प्राप्यते । सुनिद्रया नक्तं न हीयते । निद्रायामपि स्वप्ने सा एव आगच्छति, किं करवाणि ?

**मनोहरः–** आम् बुद्धं बुद्धम् । शैक्षिकयोग्यतया सम्पन्ना अपि बहवो जनाः कार्यहीनाः सन्ति । कृषिकार्यं जनाः कार्यमेव न मन्यन्ते । अन्यस्य कस्यापि उद्योगस्य अवसरोऽअत्र नास्ति । अस्मद्देशस्य विपुलांशरूपेण अवस्थितः पर्वतीयप्रदेशो प्रायेण जनशून्यो विद्यते । पर्वतीयग्रामवासिनो जनाः तराईप्रदेशोन्मुखाः सन्ति, तराईवासिनो नगरोन्मुखाः वर्तन्ते, नगरवासिनो राजधान्युन्मुखाः विद्यन्ते, राजधानीवासिनश्च विदेशोन्मुखा दृश्यन्ते केवलम् अर्थार्जनम् उद्दिश्यैव ।

**मधुकरः–** एवमेवम् । यातायातव्यवस्थायाः, शिक्षणसंस्थायाः, स्वास्थ्यसंस्थायाः, सञ्चारव्यवस्थायाश्च सौविध्येन तराईप्रदेशे एव नगरीकरणं वर्धमानं दृश्यते । वाणिज्यादिकं तराईप्रदेशे एव प्रचलति । वाणिज्यकर्मणेऽअपि किञ्चिद्धनस्य आवश्यकता भवति । कृषिकर्म अपि दुःखबहुलं वर्तते । अन्यत् किं कार्यं कर्तुं शक्यते ।

**मनोहरः–** सत्यम्, तेन हि बहवो युवानो युवतयश्च कार्यहीनाः सन्ति । पर्वतबहुलस्य अस्माकं देशस्य विकासाय पर्वतप्रदेशस्य विकासः प्रथमं तावद् आवश्यकः । पर्वतीयक्षेत्रस्य विकासाय च गुरुयोजनया



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तत्र आधिक्येन अर्थविनियोजनं कर्तव्यम् । एवं प्रकारेण यदि पर्वतीयकृषिविकासाय जलहीनक्षेत्रेषु सेचनार्थं सर्वकारो ग्रामे ग्रामे, कोणे कोणे, चत्वरे चत्वरे, तटे तटे, उपत्यकायाम् उपत्यकायाम्, अधित्यकायाम् अधित्यकायां निःशुल्कं जलकुल्याया व्यवस्थानं करोतु, स्थाने स्थाने मलबीजादिभिः सामं कृष्युपकरणनि च वितरतु, यथा स्यात् तथा अन्नादीनामुत्पादनाय कृषिकर्मसंलग्नजनेभ्यः प्रोत्साहनं करोतु, जनानां स्वास्थ्यसंरक्षणाय चिकित्सकेभ्यः अधिकं सुविधां दत्त्वा सुविधासम्पन्नानां चिकित्सालयानां स्थापनां करोतु तर्हि पर्वतक्षेत्रस्यापि तराईक्षेत्रस्य तुलनायां समानविकासः स्यात् । तदा पर्वतीयक्षेत्रेऽपि जनाः वर्तेरन्, कृषिकार्यमपि जना व्यवसायात्मकं कर्म मन्येरन् । निर्व्यवसायिनो जनाः तस्मिन् क्षेत्रे संलग्ना भवेयुः ।

**मधुकरः–** नास्ति नास्ति नास्ति । सर्वकारस्य उच्चपदस्थानाम् अधिकारिवर्गाणाम् अस्मिन् विषये मनोयोग एव नास्ति । ते स्वयं विवादरताः सन्ति । प्रतिदिनं भ्रष्टाचारस्य अत्याचारस्य दुराचारस्य बलात्कारस्य विवेकहीनताया दण्डहीनतायाश्च समाचारः सञ्चारमाध्यमतश्श्रूयते ।

**मनोहरः–** जनतानां दुर्भाग्यमेतत् । अनेनैव कारणेन युवानो युवत्यश्च विदेशं प्रति गन्तुं विवशाः । अत्रभवते अहं किं सहयोगं प्रदातुं शक्नोमि, केवलं द्वित्रिसहस्राणि दातुं प्रभवामि । द्वित्रिसहस्रैः सर्वदा व्यवहारं न चलति । सर्वदा अन्येषाम् आश्रयोऽपि नैव सुलभः । अतः कश्चिद् आयार्जनस्य उपायस्तु स्वयं कर्तव्यः । 'यस्य क्वापि गतिर्नास्ति तस्य वाराणसी गतिः' इति भणितेः इदानीं 'यस्य क्वापि गतिर्नास्ति तस्य वैदेशिकी गतिः' इत्येवंरूपेण परिवर्तनं जातम् अस्ति । अतः सति सम्भवे विदेशे एव गन्तव्यं किम् ।

**मधुकरः–** विदेशे तु गन्तव्यम्, परं कथं गन्तव्यम्, कुत्र गन्तव्यम्, केन पाथेयेन गन्तव्यम् । किं कार्यं कर्तव्यम् ।

**मनोहरः–** भवान् मदीयम् आत्मीयं मित्रम् अस्ति । स्वकीयं मित्रम् एव संस्मृत्य भवान् अत्र मन्निवासे समागत्य स्वदुःखानि व्यश्रामयः । विदेशगमनाद् अन्य उपायः अपि नैव दृश्यते इदानीम्, तच्च पुनः नैव सरलम् । विदेशं गताः कतिपये युवानः सम्यग् आर्जनं कृत्वा प्रत्यावर्तिता अपि सन्ति, केचन तत्रत्यं दुःखम् असहमानाः तत्रैव आत्महत्यायै विवशाः सन्ति, केचन स्वयं भष्मीभूता अपि वर्तन्ते । अतः अहं भवन्तं विदेशगमनाय प्रेरयितुं तु नोत्सहे । यदि भवान् आत्मनिर्णयेन एव विदेशं गन्तुम्



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

उत्सहते, तदा अहं सहायं करिष्यामि (मधुकरं प्रति पश्यति)।

**मधुकरः–** (करद्वयेन स्ववदनं पिधाय क्षणं तिष्ठति, क्षणं तत्र मौनता जायते, मधुकरस्य नयनाभ्याम् अश्रुबिन्दवः पतन्ति । पटखण्डेन तान् प्रोञ्छन् गद्गदस्वरेण कथयति ।) अहं प्राकृतसम्पदाभिः सम्पन्नस्य स्वदेशस्य कृत्रिमदरिद्रतां, स्वकीयस्यैव अकर्मण्यतां स्वकीयबन्धुवर्गेषु विश्वकुटुम्बेषु च प्रदर्शयितुं प्रचारयितुं न मे वाञ्छा, तथापि अस्माकं दरिद्रता बलाद् अस्मान् विदेशाय एव अभिप्रेरयति । अतः सखे मनोहर गच्छामि अहम्, विदेशमेव गच्छामि । स्वदेशे उषित्वा अहं स्वोदरभरणाय एव न समर्थः, परिवारभरणाय कथं प्रभवामि । ...परं कथं कुत्र गन्तव्यं मार्गनिर्देशनं करोतु, नान्यो मे सहायः (पटखण्डेन मुखं पिदधाति)।

**मनोहरः–** तदर्थं तु यथाशीघ्रं राजधान्यां गन्तव्यं भवति । तत्र मे तनयस्य सखा जनशक्तिकार्यालये कार्यं करोति । तम् एव उक्त्वा अहं व्यवस्थां करोमि । इदानीम् अहं भवते सहस्राणां विंशती रुप्यकाणि प्रदास्यामि । तेन अद्य एव आपणं गत्वा पत्न्यै पुत्राय पुत्र्यै च कानिचिद् आवश्यकवस्तूनि क्रीत्वा ददातु । कस्मिन् देशे गन्तव्यम्, गन्तुं कति रुप्यकाणि आवश्यकानि भवन्ति इति सर्वम् उक्त्वा व्यवस्थापयामि ।

**मधुकरः–** अस्तु तावत् । (मनोहरः क्षणमन्तः प्रविश्य रूप्यकाणि हस्ते गृहीत्वा आगच्छति, मधुकराय च ददाति । मधुकरो रूप्यकाणि गृहीत्वा मनोहरं नमस्कुर्वन् निष्क्रामति ।)

(जवनिका सरति)

## तृतीयं दृश्यम्
### (शनैर्जवनिका अपसरति)

(रमेशः, कृत्तिका, मन्दोदरी च महानसे सन्ति, चुल्ली, पाकभाण्डानि, जलपात्राणि च दृश्यन्ते ।)

**मन्दोदरी–** आगच्छतम् करपट्टिकां भोक्तुम् आगच्छतम् । परिवेशयामि अहम् ।

**रमेशः-** पिता किमर्थं नायाति इदानीं पर्यन्तम् अद्य ?

**मन्दोदरी–** भोजनाय पित्रा किं प्रयोजनम् ? आगच्छेत् नु । वयं खादाम, पित्रे करपट्टिकाः स्थाप्यन्ते । पिता यदा आगमिष्यति तदा भक्षयिष्यति ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**कृत्तिका–** नहि नहि, पितुः आगमनानन्तरमेव खादाम करपट्टिकाम् ।

**मन्दोदरी–** (आक्रोशेन) पिता पिता पिता । झटिति आगच्छतम्, अन्यथा युवां पितरं प्रतीक्षेथाम्, अहं भक्षयामि ।

**कृत्तिका–** अग्रज त्वं गच्छ भोक्तुम् । मात्रा सह भक्षय । अहं पितुः आगमनानन्तरं पित्रा सहैव भक्षयामि ।

**मन्दोदरी–** पिता पिता पिता, किं करोति अनयोः पिता ?

**रमेशः–** आगच्छ भगिनि (उत्थाय महानसे स्थापितायां पीठिकायां वसति, कृत्तिका अपि तथैव आगच्छति वसति च) पिताऽपि किञ्चिद् आर्जनं करोति, गां सेवते, गां दोग्धि, अस्मभ्यं लेखनी-अभ्यासपुस्तिका-परिधानवस्त्रादीनि च अनयति, भवत्यै शाटिकादिकम् आनयति । इत्थं किञ्चित्कार्यं पिता करोति किञ्चित्कार्यं भवती करोति ।

**मन्दोदरी–** (भोजनं परिवेशयति) कार्यं करोति तव पिता, अतीव करोति । अहं कथयामि, क्रोशामि, तत एव करोति, अन्यथा करोति ? तव सख्युः रामस्य पिता अर्थमन्त्रालयस्य सचिवः अस्ति । अशीतिसहस्रपरिमितं तु तस्य मासिकं वेतनम् अस्ति । तस्य पत्न्याः शरीरं तु आ हा हा...., सुवर्णमयं वर्तते सुवर्णमयम् । मम दुर्भगायाः तु (मुखं परामृशति) ।

**कृत्तिका–** अग्रज अहं भविष्यति मन्त्रिपदं ग्रहीष्यामि । ततो मातरं सुवर्णमातरं रचयिष्यामि ।

**रमेशः–** अहमध्यागमनकार्यालयस्य प्रमुखो भविष्यामि, ततो मात्रे हिरण्यकशिपुं सुवर्णशाटिकादिकं रजतपादुकादिकञ्च प्रदास्यामि । (मन्दोदरी करद्वयेन तयोर्मुखं सङ्केतेन परामृशति)

(नेपथ्ये गौः क्रोशति, सर्वे नेपथ्यं प्रति पश्यन्ति, तावत् मधुकरो धृतसुन्दरवस्त्रः शोभनशिरस्त्राणवान् चक्रवन्मञ्जूषां समाकर्षन् प्रविशति ।)

**रमेशकृत्तिके–** नमो नमः पितः नमो नमः ।

**मधुकरः–** नमो नमः, नमो नमः । (शिरसि हस्तं न्यस्य) आयुष्मान् भव, आयुष्मती भव ।

**मन्दोदरी–** (आश्चर्यचकितां मुखमुद्रां प्रदर्शयति, किङ्कर्तव्यविमूढा सती धूलिकामपसारयति ।) किं कलङ्कम् अलगत् अत्र ? (शिरः नमयति) (सर्वे निवसन्ति)

**मधुकरः–** पुत्र रमेश, दुहितः कृत्तिके, मन्दोदरि युष्माकं मनोभावनां याचनाम् आवश्यकतां वा विचार्य धनम् अर्जयितुं विदेशं प्रति गन्तुम्



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

उद्यतोऽहम् । सम्यक्तया लिखत, पठत, गृहकार्यं च कुरुत । मन्दोदरी अपि सकलगृहव्यवहारं स्वशिरसि निधाय मर्यादापूर्वकं सन्तानसंरक्षणं कुरुष्व । अत्र अहं कानिचन आवश्यकवस्तूनि युष्माकं कृते समानीतवान् अस्मि । (मञ्जूषाम् उद्घाट्य अभ्यासपुस्तिकाः लेखन्यः कानिचन परिधानवस्त्राणि च निष्कास्य पुत्राय पुत्र्यै मन्दोदर्यै च ददाति) ।

**मन्दोदरी–** किम् अभवत् ? कथम् इदानीम् अकस्मादेव विदेशगमनस्य निर्णयं कृतवान् ? कस्य साहाय्येन गन्तुम् उद्यतः ? प्रथमं तु भुक्तमेव नास्ति, बुभुक्षा बाधते, जलम् आनयानि ?

**मधुकरः–** नहि नहि प्रिये न कापि बाधा वर्तते मयि । युष्मभ्यं यद् रोचते तत् कुरुध्वम् । गृहव्यापारे यदि किमपि काठिन्यम् आपतति तदा मम सखायं मनोहरं सहायतार्थं वदत स एव युष्माकं सहयोगं करिष्यति । विदेशगमनार्थम् अपि स एव सहयोगं कृतवान् ।

**मन्दोदरी–** सहसा एव विदेशं गन्तुम् उद्यतः । अत्र स्वदेशे एव किमपि व्यवसायात्मकं कार्यम् अकरिष्यत् तदा शोभनम् अभविष्यत् ।

**मधुकरः–** नहि नहि प्रिये, अस्मिन् देशे यदि कस्यचिद् व्यवसायस्य सुन्दरोऽवसरोऽभविष्यत् तर्हि जनशक्तेः आधारभूताः सहस्रशो युवानः स्वजीवनस्य ग्लहं विधाय 'कार्यं वा साधयेयम् देहं वा पातयेयम्' इत्युक्त्वा विदेशं न अगमिष्यन् ।

**रमेशः–** (पितुर्हस्तं गृहीत्वा) पितः विदेशं न गच्छतु भवान्, अहम् इतः परं भवता सह अनावश्यकवस्तूनि नैव याचिष्यामि, स्वपाठं पठित्वापि गवे घासादिकं छिनद्मि । जलं घासादिकञ्च सर्वदा अहमेव दास्यामि पितः ।

**कृत्तिका–** अहमपि अनावश्यकवस्तूनि न याचे । (एकाम् अभ्यासपुस्तिकां दर्शयति) पश्यतु भवान् मत्पार्श्वेऽभ्यासपुस्तिका वर्तते मत्सख्या प्रियवादिन्या मह्यं प्रदत्ता, प्रियवादिन्या तु मह्यं एकं परिधानवस्त्रमपि प्रदत्तम्, पश्यतु भवान् (वस्त्रं प्रदर्शयन्ती अङ्गे संयोजयति) । अहमपि मातुः सहायतां करिष्यामि, भवतोऽपि साहाय्यं करिष्यामि ।

**मधुकरः–** नहि नहि बाल, नहि नहि बाले, एकयैव अभ्यासपुस्तिकया सदा न चलति । बहु मत्कर्तव्यम् अस्ति । यथा प्रियवादिनी तुभ्यम् अभ्यासपुस्तिकां दत्तवती, तथा त्वम् अपि तस्यै किञ्चिद् दातुं प्रभव । मम पुत्राय पुत्र्यै पत्न्यै च कापि न्यूनता न स्याद् इति विचार्य


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अहं विदेशं गच्छामि, तेन स्वदेशस्य समृद्धयेऽपि किञ्चित् सहयोगः स्यात्। किञ्चिद् धनम् अर्जयित्वा शीघ्रमेव स्वदेशम् आगत्य किञ्चित् स्थायि व्यवसायात्मकं कार्यं करिष्यामि बाले। मदीयो यात्रामुहूर्तः समायातः। अतः परं विलम्बो न कार्यः। कार्यं वा साधयेयम् देहं वा पातयेयम् (मञ्जूषां सगृह्य शनैः शनैः गीत गायन् निर्गच्छति)।

अश्मनि वा स्वपेयम्, भस्मनि वा परिणमेयम्।
दारिद्र्यं मन्मातरञ्च नत्वाहं निर्गच्छेयम्॥
हे हे भगवन्नस्यां जनौ दैवे कुपितेऽपि
परजनावपि स्ववेश्मन्येव प्रत्यागच्छेयम्।

(मन्दोदरी अपि सहैव दूरं यावत् पतिं पश्यति। जवनिका अपसरति।)

(समाप्तम्)



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

# दिनचर्या

डा. छत्रपतिदाहालः

**पात्रपरिचयः**

प्रतिज्ञा माता, त्रिंशद् वर्षीया । (ढाकावस्त्रेण विनिर्मिता चोलिका, पीता साटी, तादृश एवोत्तरीयः, पीतकौशेयवस्त्रवेष्टितं शिरः, रक्तवर्णमखमलवस्त्रविनिर्मिते पादत्राणे, वेणीद्वयेन सम्प्रसाधित-बद्धकेशव्यूहः, रजतपटगोपितसीमन्तसिन्दूररेखा, सारुणतिलकसुशोभितभ्रूमध्यः, सौवीराञ्जनसुकृष्णीकृतनेत्रवर्त्मता, मालतीकुसुमान्वितो भृङ्गवत्कृष्णकेशराशिः, चपले नयने, सुहासान्वितवदनम्, चन्दनचर्चितभालः, मृदुभाषणं चेमांमलङ्कुर्वन्ति ।)

आज्ञा- पुत्री, नववर्षीया । (पीता घर्घरी, रक्तचोलिका, पीतप्रच्छदा, रक्तकेशपट्टिका, रक्तमखमलवस्त्रनिर्मितपादत्राणे, स्निग्धकुन्तलम्, सौवीराञ्जनान्विते शान्तनयने चास्याः परिचायकानि तत्त्वानि ।)

**पिता-** पञ्चत्रिंशद्वर्षदेशीयः । अस्य परिधानं दुग्धवर्णोर्ध्वाङ्गवस्त्रम्, तथा श्वेतवर्णम् अधोवस्त्रम् । पीतकौशेयोत्तरीयम् ।

**पितामह-** दुग्धवर्णश्चोलकः । तादृशमेव शिरस्त्राणम् । पीतवर्णं धौतवस्त्रम् ।

**पितामही-** पीतपृष्ठभूम्यां रक्तचित्रीकृता चोलिका । तादृशी धोतिका । पीतवर्णं शिरोवेष्टनम् ।

**मातामहः-** गैरिकवर्णीयश्चोलकः, तादृशं शिरस्त्राणम्, पीतवर्णं धौतवस्त्रम् ।

**मातामही-** पीतवर्णा चोलिका । श्वेतभूम्यां रक्तचित्रीकृता धोतिका । तद्वदेव शिरोवेष्टनम् ।

**आचार्यः-** ललाटे त्रिपुण्ड्रम् । श्वेतवर्णमूर्ध्ववस्त्रं, श्वेतमेव धौतवस्त्रम् । पाल्यास्थानीयेन ढाकावस्त्रेण निर्मितं शिरस्त्राणम्। काष्ठविनिर्मितपादुके।

**पुरोहितः-** रक्तवर्णश्चोलकः, पीतकौशेयधौतवस्त्रम् । बद्धशिखाकेशत्वम् । काष्ठनिर्मितपादुके ।

**वयस्यौ-** एको बालको नववर्षदेशीयः । एका बालिका तावदेववर्षदेशीया ।

**सतीर्थ्यौ-** एकश्छात्रो नववर्षदेशीयः । एका छात्रा नवमवर्षदेशीया एव ।

**सूत्रधारः-** आर्ये ! प्रेक्षागृहे आगम्यताम् ।

**नटी-** (प्रविश्य) आर्यपुत्र ! आगतास्मि भो ! मया किं सम्पादयितव्यम्, आज्ञापयतु भवान् ।

**सूत्रधारः-** अद्य नैपालाभिजनेन आयुर्वेदाचार्येण छत्रपतिदाहालवरेण



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विरचितदिनचर्याख्यलघुनाटकेन प्रेक्षागृहस्था सभा परितोषयितव्या ।

**नटी-** आर्य ! भवतो निर्देशनं यथासम्भवं परिपाल्यते । अस्मिन् लघुनाटके के विषयाः सन्ति ?

**सूत्रधारः-** स्वास्थ्यविवर्द्धनाय प्रधानतमं दिनचर्याविषयम् अवलम्ब्य आयुर्वेदाचार्यैः वर्णितः सदाचारः, स्वास्थ्यरक्षार्थं दिनचर्या, ऋतुचर्या, हिताहारविहारः, धारणीयवेगस्य धारणम्, अधारणीय वेगस्योदीरणमित्यादयो स्वस्थवृत्तानामायुर्वेदीयदिनचर्या व्यवस्थाः सदानुपालनीयाः इति विषया अस्मिन् लघुनाटके सन्ति । मानवजीवने स्वास्थ्यसंरक्षणाय दिनचर्या एव स्वास्थ्यविज्ञानानुसारेण अनुसरणीया इति विषयश्चात्रोपस्थापितोऽस्ति ।

**नटी-** एवं चेत् तेनैव नाटकेन परिषत् परितोष्यते ।

(इति निष्क्रान्तौ)

## प्रथमं दृश्यम्

**प्रतिज्ञा-** (प्रविश्य) अये ! जागृहि, उत्तिष्ठ । वत्से ! उषा किं कथयति जानासि ? सा कथयति ब्राह्ममुहूर्त्तं यः कोऽपि न हापयेदिति । स्मरत, तवाध्यापिकापि ह्यो ब्राह्ममुहूर्त्तस्य महत्त्वं दर्शयन्ती किमकथयत् ? एषा अमृतवेला । शृणु मन्दिरादागतं घण्टानादं, शंखघोषं च । कीर्तनसङ्गीतं, भजनस्तवनं, पक्षिकूजनं, भ्रमरनिनादादयस्तव श्रुतिगोचरा न वा ?

**आज्ञा-** (जृम्भमाणा कथयति) मातः ! आम् आम् । वाढम् । अहमपि ब्राह्ममुहूर्त्तं न हापयामि । एषोऽमृतकालः । (उत्तिष्ठति, करौ च अवलोकयति, करतलं नमति)

ॐ कराग्रे वसते लक्ष्मी, करमध्ये सरस्वती ।
करमूले स्थितो ब्रह्मा प्रभाते करदर्शनम् ॥

(भूमिं स्पृशन्ती, नमन्ती)

ॐ समुद्रवसने देवि ! पर्वतस्तनमण्डले ।
विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ॥
हे जिह्वे रससारज्ञे सर्वदा मधुरप्रिये ।
नारायणस्य पीयूषं पिब जिह्वे निरन्तरम् ॥

**प्रतिज्ञा-** पुत्रि, इदं तव उषःपानम् । रात्रौ मया ताम्रपात्रे प्रपूरितमिदं तव कृते ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

उषःकाले एतादृशस्य जलस्य अष्टाञ्जलिपरिमाणस्य पानममृततुल्यं भवति । सञ्चितमलोत्सर्जनार्थं सुखदं भवतीति नित्यं पातव्यमेतत् ।

**आज्ञा–** (उषःपानं कृत्वा) अमृतमेव भाति मातः ! अहं नित्यं पिबामि उषःपानम् । अमृतवेलायामुषायां सञ्चङ्क्रमणं च स्वास्थ्यप्रदं भवति घटिकार्द्धपर्यन्तमहं सञ्चक्रमणं करोमि । यावदहं मलवेगमनुभवामि तावत्पर्यन्तम् । मातर्भवत्यपि वाञ्छति चेदावां सहैव गच्छावः ।

**प्रतिज्ञा-** भवति एव मितभाषिणि ! अद्य आवां दूरे नैव गच्छावः ।

**आज्ञा-** भवति एव स्मितभाषिणि मातः ! परन्तु किमर्थम् ?

**प्रतिज्ञा-** अद्य गृहे बहूनि कार्याणि सम्पादयितव्यानि सन्ति ।

(गच्छन्त्यौ दृश्येते)

**प्रतिज्ञा-** पुत्रि, मया तु मलवेगस्य प्रवर्त्तनमनुभूयते किं तव ? प्रवृत्ते मलवेगे वेगधारणं न कदापि कर्तव्यम् । आयुर्वेदज्ञा कथयन्ति यद् –

वेगान्नधारयेद् वातविण्मूत्रक्षवतृट्क्षुधाम् ।
निद्राकासश्रमश्वासजृम्भाश्रुच्छर्दिरेतसाम् ॥

**आज्ञा-** अम्बे सत्यमनुभवाम्यहम् । आयुर्वेदोक्तास्त्रयो दशवेगाः कदापि न धारणीयाः । अहं सावधानतया विचारयामि प्रवृत्तवेगं चोदीरयामि ।

**प्रतिज्ञा-** दन्तकाष्ठेन दन्तधावनं मुखदन्तस्वास्थ्यकरं भवति । इदं निम्बस्य दन्तकाष्ठं तव कृते । निम्बस्याभावेऽपामार्गोऽपि प्रशस्तो भवति । मातुलगृहे बबुलः करञ्जश्चास्ति । यथामिलितेनोचितेन दन्तकाष्ठेन नित्यं दन्तधावनं कर्तव्यम् ।

**आज्ञा-** केन पदार्थेन दन्तधावने सति दन्तस्य दृढता, सौन्दर्यञ्च वर्द्धते मातः ?

**प्रतिज्ञा-** पिप्पलीमरिचशुण्ठीचूर्णेन, मधुना, सैन्धवलवणेन च सहांगुलिना सम्मर्दनं दन्तपावनकं दाढर्यकरं च भवति । जिह्वाशोधनार्थं सुवर्णरजतताम्रविनिर्मितलेखनकद्वारा जिह्वानिर्लेखनं च कर्तव्यम् । तव कृते मया ताम्रस्य लेखनकमानीतमस्ति ।

**आज्ञा–** सत्यम् । यथावदहं करोमि ।

**प्रतिज्ञा-** मुखशोधनार्थं गण्डूषं करणीयम् । कबलश्च धारणीयः । दन्तधावन-जिह्वानिर्लेखनपश्चादेतत्कार्यं प्रशस्तम् ।

**आज्ञा–** आमम्ब ! तथैव करोमि ।

**प्रतिज्ञा –** नस्यमपि प्रतिदिनं कर्तव्यम् । अधुना त्वं बालिकासि । अतस्तव


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कृते प्रतिमर्शः युक्तो भवति । करमध्ये तिलतैलं गृहीत्वा विन्दुद्वयं अङ्गुलिना नासाद्वारयोः प्रविश्य श्वासेन सह कृतो मर्शः प्रतिमर्शः । शिरोव्याधिहरणार्थमिदं प्रशस्तम् ।

**आज्ञा-** भवत्या आज्ञानुसारं तदपि सम्पादयामि मातः !

**प्रतिज्ञा-** वत्से ! पश्य तव पितरः शौचस्नानादिकं कृत्वा, सावित्रीमुपास्य पञ्चायतनपूजां च समाप्य इतः एव आगच्छन्तः सन्ति । अद्य तवाष्टमो जन्मदिवसः । तव वयस्यः सतीर्थ्याश्च सूचिता इत्यहमनुमन्ये । अतः अद्यतनी तव दिनचर्या खलु विशेषा इव । सहर्षं साशीर्वादं च अस्य दिवसस्य कार्यं सम्पादय । वर्द्धापनानि, आशीर्वचनानि च गृहाण ।

(पिता प्रविशति)

**आज्ञाः** दर्शनं प्रणतयश्च पितृदेव, सुप्रभातम् । अद्य मम जन्मदिवसः, अतः इतः एव सुप्रभातम् गायामि, शृण्वन्तो भवन्तः ।

(आज्ञा गायति मातापित्रोः समक्षम्)

ब्रह्मामुरारिस्त्रिपुरान्तकारी भानुः शशी भूमिसुतो बुधश्च ।
गुरुश्च शुक्रः शनिराहुकेतवः सर्वे ग्रहाः शान्तिकरा भवन्तु ॥
भृगुर्वशिष्ठः क्रतुरङ्गिराश्च मनुः पुलस्त्यः पुलहश्च गौतमः ।
रैभ्यो मरीचिश्च्यवनश्च दक्षः कुर्वन्तु सर्वे मम सुप्रभातम् ॥
प्रह्लादनारदपराशरपुण्डरीकव्यासाम्बरीषशुकशौनकभीष्मदाल्भ्यान् ।
रुक्माङ्गदार्जुनवशिष्ठविभीषणादीन् पुण्यानिमान्परमभागवतान् स्मरामि ॥
कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारम् ।
सदा वसन्तं हृदयारविन्दे भवं भवानीसहितं नमामि ॥
त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देवदेव ॥

**पिता-** अहो ! धन्यं तव प्रभातगायनम्, धन्या तव प्रतिभा, धन्यास्तव मातृपितृमहाभागानामाचार्यस्य चाशीर्वादा उपदेशाः प्रशिक्षणदीनि च । साधु साधु साधु ।

**आज्ञा-** मातापितरौ ! एष मम व्यायामकालः । सर्वप्रथममहं सपादशिरष्कं स्नेहनं करोमि । मातरहं तव सहायतामिच्छामि पश्चादहं सूक्ष्मव्यायामं, सूर्यनमस्कारव्यायामं, सरलयोगासनं, प्राणायामञ्च करोमि ।

(व्यायामादिकं करोति ।)



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**प्रतिज्ञा–** तव व्यायामः सम्पन्नः ? शोभनस्तव नियमः । अथ स्वेदजलशोषणपर्यन्तं विश्रामो विधेयः । तत्पश्चात् स्नानं कृत्वात्रागच्छ । शीतलजलस्नानमायुष्करं मेधाप्रदं त्वक्प्रसादकरं च भवतीति कथयन्त्यायुर्वेदविदः ।

**आज्ञा–** आमम्ब ! आचार्यद्वाराप्यहं बोधिता । अहमपि शीतलजलं पर्याप्तं सेवे । परं शीतकाले मन्दोष्णजलप्रयोगो हितकरो भवति, यद्यपि शिरःस्नानार्थम् उष्णजलं कदापि न सेवनीयमिति स्वास्थ्याचार्या वदन्ति ।

(स्नानागारे गच्छति) ।

**पिता–** पुत्री बालिका अस्ति, परं बुद्धिमती, शीलवती च । मे च ते च मातृपितृभ्यामाशीर्वादाः भगवत्कृपा चास्मत्कृते पर्याप्ता इति प्रमाणीकरोति सा । त्वदीयाचारशिक्षा च ।

(स्नानागारादाज्ञा समागच्छति) ।

**आज्ञा-** अहो ! आनन्दमनुभवामि मातः ! दिनचर्यायां मध्ये स्नानमतीव प्रसादकरं भवति । स्नानात्पूर्वं सर्वाण्यपि मलानि शोधयितव्यानीत्यहं ज्ञापिता गुरुभिः । अस्माकं स्नानसंस्कृतिर्महती गौरवशालिनी । अतोऽहं देवदर्शनार्थं देवस्थले गच्छामि । तत्र, प्रणवोच्चारणं ध्यानाभ्यासञ्च करोमि, तावत्पर्यन्तं प्रतीक्षा कर्तव्या ।

**प्रतिज्ञा–** तत्पूर्वं अञ्जनं धारय । परम्परानुसारेण पूजापरिधानं च परिधेहि ।

(मात्राज्ञामनुपालयति, शौचस्नानादिकं सम्पाद्य देवस्थलमनुचलति, देवदर्शनं च कृत्वागच्छति)

## द्वितीयं दृश्यम्

**पितामह-** आज्ञे ! वत्से ! आगच्छ । अद्य तवाष्टमो जन्मदिवसः । तवाचार्यवराः पुरोहिताश्चात्रागत्याष्टचिरञ्जीविनः षष्ठिकादेवीञ्च पूजयित्वा तव जन्मदिवसीयमनुष्ठानं सम्पादयन्तः सन्ति । तव मातामहो मातामही च ह्योऽत्र समागतौ । तव कृते आशीर्वाददानार्थं शुभकामनार्थञ्च वयं सर्वे प्रतीक्षारताः स्म । याहि वत्से, मण्डपस्थे स्वासने तिष्ठ ।

(आज्ञा आगच्छति नियतासने च तिष्ठति । वयस्यसतीर्थ्या अपि पार्श्वे तिष्ठन्ति । मातामहः, मातामही, पितामहः, पितामही च नियतासने तिष्ठन्ति ।)


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**आज्ञा–** (समीपं गच्छति अभिवादनं करोति) । पितामहाः ! अभिवादये अहमाज्ञा तव पौत्री, पितामह्यः अभिवादयेऽहं तव पौत्री । मातामहाः अभिवादयेऽहमाज्ञा तव दौहित्री । मातामह्यस्तव एषा दौहित्री साभिवादनं प्रणमति । अद्य मम जन्मदिवसः । भूरि भूरि शुभाशंसा आशीर्वचनानि चाहमिच्छामि सर्वेभ्यो भवद्भ्यः ।

**पितामहः-** शुभाशीर्वचनानि च मङ्गलकामनाश्च वत्से ! दीर्घायुष्मती भव ।

**पितामही–** आशीर्वादाः सन्तु बाले । सुस्वस्थायुष्मती च भव ।

**मातामहः–** शतायुष्मती भव । मदीयं वात्सल्यं चिरं भवेत् । ज्ञानवती, विज्ञानवती, गुणवती भूत्वा चिरकालं यावद् विश्वमनुभूय सुखिनी भव ।

**मातामही–** मङ्गलमयो भवतु तव जन्मदिवसः । शुभं भवतु तवाचरणम् । परिपूर्णास्तु तव मनोभिलाषा । चिरञ्जीव भद्रे ।

(आचार्यस्य पुरोहितस्य च प्रवेशः)

**आचार्यः–** अहो ! मङ्गलमयोऽस्ति दिवसोऽयम् । मदीया प्रिया छात्रा अद्य अष्टमे वर्षे प्रविशतीदं सुखास्पदम् । आज्ञा खलु प्रतिभाशालिनी, शीलवती, कर्मिष्ठा, प्रयत्नशीला च । अहं सगर्वं शुभं कामये ताम् । मंगलमयी शुभकामना तव जन्मदिवसोपलक्ष्ये । छात्रे ! विदुषी भव ।

**पुरोहितः–** (स्वस्तिवाचनं कुर्वन् प्रविशति, आचार्योऽपि पुरोहितेन सह स्वस्तिवाचनं करोति ।)

आनो भद्राःक्रतवो यन्तु विश्वतो दब्धासो अपरीतास उद्भिदः । देवानो यथा सदमिद् वृधे असन्नप्रायुवो रक्षितारो दिवे दिवे ॥

स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्तिनः पूषाविश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्तिनो वृहस्पतिर्दधातु ॥

भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरंगैस्तुष्टुवांसस्तनूभिर्व्यशेमहि देवहितं यदायुः ॥

द्यौः शान्तिरन्तरिक्षं शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिर्वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्मशान्तिः सर्वं शान्ति । शान्तिरेव शान्तिः सामा शान्तिरेधि ॥

यतो यतः समीहसे ततो नो अभयं कुरु । शन्नः कुरु प्रजाभ्यो भयं नःपशुभ्यः ॥

विश्वानि देव सवितर्दुरितानि परा सुव । यद् भद्रं तन्न आ सुव ॥



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सर्वेषाम् स्वस्ति भवतु । नमस्काराश्च सन्तु मदीयाः ।

**आज्ञा–** प्रणामाः पुरोहितवर्याः ।

**पुरोहितः–** नमो नमस्ते शुभकामना च । अद्य तव शुभजन्मोत्सव आयोजित इति सुखमनुभवामि । मदीयाशिषः तव जीवने खलु कल्याणकराः भवेयुरिति मे विश्वासः । प्रयत्नस्तु त्वयाऽपि करणीयः ।

**पितामह–** आस्यताम् पुरोहितवर्य ! अभिवादयेऽहम् । अनुरुणद्धि च जन्मोत्सवानुष्ठानं सम्पादयितुम् ।

(दीपकलशगणेशपूजनपुरस्सरं पुण्याहवाचनं कृत्वा षष्ठिकादेवीं, नवग्रहान्, अष्टचिरञ्जीविनश्च सम्पूज्य रुद्राभिषेकं सम्पादयति पुरोहितः । आचार्यः, पितामही, मातामही, माता च मङ्गलानि गायन्ति । पितामहो यजमानत्वं गृह्णाति । पिता साहाय्ये तिष्ठति। सतीर्थ्यवयस्याः माङ्गलिकं गीतं श्रुत्वा नृत्यञ्च कुर्वन्ति ।)

**पुरोहितः–** जन्मोत्सवानुष्ठानं सम्पन्नम् । सर्वे तिलकं प्रसादं च गृह्णन्तु । आज्ञायाः शुभजन्मोत्सवः पुण्यमयो भवतु । सा चिरञ्जीवतु कीर्तिं चार्जयतु । सिद्धिं ख्यातिं च लभताम् ।

**आचार्यः–** अहन्तु अस्याः शिष्यायाः पराजयमिच्छामि। तवं जन्मोत्सवः शुभारम्भदः स्यात् । जननीजनकौ, पितामहीपितामहौ, मातामहीमातामहौ सर्वे चात्र समागता आगताश्च सम्बन्धिनो मोदन्ताम्, आशीर्वदन्तु, शुभं च चिन्तयन्तु । मङ्गलदो जन्मदिवसो भवतु ।

**पितामहौ–** भद्रमस्तु शिवं चास्तु महालक्ष्मीः प्रसीदतु ।
रक्षन्तु त्वां सदा देव्यःआशिषः सन्तु सर्वदा ।

**मातामहौ–** ॐ श्रीर्वर्चस्वमायुष्यमारोग्यमात्पवभिथात्पवमानं महीयते ।
धनं धान्यं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥

**पितरौ–** अश्वत्थामा बलिर्व्यासो हनुमांश्च विभीषणः ।
कृपः परशुरामश्च सप्तैते चिरजीविनः ॥
सप्तैतान् संस्मरेन्नित्यं मार्कण्डेयमथाष्टमम् ।
जीवेद् वर्षशतं सोऽपि सर्वव्याधिविवर्जितः ।
चिरञ्जीव बालिके !

**वयस्यः–** धन्यः, भव्यः, रमणीयश्च आज्ञाया जन्मोत्सवः । ईदृशमेव सर्वे जन्मोत्सवं कुर्युः । वैदिकी संस्कृतिः, सनातनार्षपरम्परा च धन्या



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भवतु । वर्त्तमानसमयेऽनुकरणकृता जन्मदिवससंस्कृतिः या प्रचलितास्ति सा तु केकच्छेदनदीपनिर्वाणादिद्वारा सम्पद्यते ।

**सखी-** जुष्टप्रसादमिष्टान्नग्रहणं चात्र भवति । वयं न निन्दयामः परसंस्कृतिम् । परमस्यार्थं न परप्रत्ययनेयबुद्धिता । वयं स्वसंस्कृतौ एव सम्पन्नाः । अनार्यं जुष्टमस्वर्ग्यं चैतादृशमनुकरणं वयं नाऽऽवर्तिष्यावहे । आज्ञागृहे सम्पन्नमिदं जन्मोत्सवं दृष्ट्वा वयं समुत्साहिताः स्मः । शुभकामनाशतं समर्पये ।

**सतीर्थ्यः–** बाढमुक्तम् । अस्मदीया संस्कृतिः अस्मद् एव निरन्तरा भवितुमर्हति । धन्यास्ति चाज्ञायाः कुलाचारः । सर्वे वयं ऋषिगोत्रजापत्या इति स्वीकुर्मः । सा प्रथमा संस्कृतिर्विश्ववारा ।

**आज्ञा–** कृतज्ञास्म्यहम् । मदीयाः धन्यवादाश्च । पितामहौ, मातामहौ, मातापितरौ, पुरोहिताचार्या, वयस्यान् सतीर्थ्यान् च प्रति सहर्षमनुगृहीतास्मि । नवमे जन्मदिवसेऽप्येवमेवास्तु ।

**पितामहः–** धन्यवादार्हाः भवन्तः पुरोहिताचार्यवर्याः । धन्यवादार्हाश्चान्ये च येऽत्रागत्यास्माकं हृदयं तोषयन्ति । सर्वेभ्योऽहं भोजनार्थं निवेदयामि । (सर्वे भोजनं गृह्णन्ति, पितामातरौ भोजनवितरणे संलग्नौ स्तः)

**आचार्यः–** आहार एव मनुष्यजीवनस्य परमाधारः । आहारानुसारेण मनस्तथा विचारः प्रभवति । तदनुकूलो व्यवहारः । आज्ञापि ज्ञापितास्ति मयात्रेतिविषये । किमाज्ञे ?

**आज्ञा–** आमाचार्याः ! आहारस्य पृथ्वी- जल- तेजो- वायु- आकाशाभिधपाञ्चभौतिकस्वरूपाणि, अशित- पीत- लीढ- खादित- प्रकाराः, मधुराम्ल- लवण- कटु- तिक्त- कषायरसाश्च मया विदिताः सन्ति ।

**पुरोहितः–** आचार्यवराः किमाज्ञा भगवद्गीतोक्त-त्रिविधाहारविषये बोधिता भवद्भिर्न वा ?

**आचार्यः–** (आज्ञां सङ्केत्य) बाले सात्विकाहारं किमिति जानासि ?

**आज्ञा–** रस्याः स्निग्धाः स्थिरा हृद्या आहाराः प्रायसो यवगोधूमतिल- तण्डुल- फलशाकनिर्मिताः भवन्ति सात्विकाहाराः । आयुः सत्वबलारोग्य- सुखप्रीतिविवर्द्धनाश्च ते भवन्ति ।

**पुरोहितः–** बाढम् । सर्वैरस्माभिः सात्विकभोजनं स्वीकरणीयम् ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**पिता–** गर्वं करोमि आचार्य ! निश्चिन्तोऽहम् । मदीया बालिका तवानुशासनशिक्षया सुसाधिता भविष्यति । धन्यवादाः ।

**आचार्यः–** स्वागतम् । शिष्ये ! सहर्ष तव जन्मदिवसः सम्पादितः । भोजनं च सात्त्विकं, पथ्यं, सुस्वादु च । भोजनादौ च लवणार्द्रकं यद्वितरितं तच्च समीचीनम् । भोजनान्तरं सर्वैः पादशतं गन्तव्यम् । आगत्य च वज्रासने स्थातव्यम् (सर्वे कुर्वन्ति) ।

**मातामहः–** प्रसन्नोऽहम् । अथाज्ञा पाठशालायां गमिष्यति । सा स्वच्छं सनातनसंस्कृति-परिचायकमायुषो हितकरं च वस्त्रं परिधाय विद्यालयं गच्छतु । सपत्नीकोऽहमपि स्वगृहं जिगमिषामि ।

**सतीर्थ्यवयस्याः–** अस्माकमपि विद्यालयगमनसमयः सञ्जातः । अतो वयं शीघ्रं गच्छामः ।

**पुरोहितः–** अहमपि विद्यालयं गच्छामि । कर्मकाण्डविषयेऽद्य मया प्रशिक्षितव्यमस्ति ।

**आचार्यः–** अहो ! धन्यं शोभनं च तव परिधानम् । धन्या चास्माकीनी सनातनसंस्कृतिः । चल, चलाज्ञे ! त्वया साकं हि विद्यालयं गच्छामि ।

(क्रमशः प्रतिष्ठन्ते)

## चतुर्थं दृश्यम्

(स्थानम् विद्यालयः समयो दशवादनः)

(प्राङ्गणे छात्राः गुरून् नमस्कुर्वन्तः प्रविशन्ति, पङ्क्तिबद्धा सत्तो मङ्गलगानायं च सज्जा भवन्ति)

**छात्राः–** प्रणामा अचार्यवर्याः, सुप्रभातमाज्ञे । सुप्रभातं गुरवः ! प्रणतयः सन्ति गुरुभ्य !

**आचार्यः–** सर्वे छात्राः सावधाना भवन्तु । अथ वैदिकी राष्ट्रवन्दना, सरस्वतीवन्दना, नेपालजननीवन्दना च कर्तव्या ।

ॐ आब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः शूर इषव्योतिव्याधी महारथो जायताम् । दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायाताम् निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्ताम् योगक्षेमो नः कल्पताम् ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रवि-रुद्र-पितामह-विष्णु-नुतं, हरि-चन्दन-कुंकुम-पंक-युतम् ।
मुनि-वृन्द-गजेन्द्र-समान-युतं, तव नौमि सरस्वति ! पाद-युगम् ॥१॥
शशि-शुद्ध-सुधा-हिम-धाम-युतं,शरदम्बर-बिम्ब-समान-करम् ।
बहु-रत्न-मनोहर-कान्ति-युतं, तव नौमि सरस्वति ! पाद-युगम् ॥२॥
गुणनैक-कुल-स्थिति-भीति-पदं, गुण-गौरव-गर्वित-सत्य-पदम् ।
कमलोदर-कोमल-पाद-तलं, तव नौमि सरस्वति !
पाद-युगम् ॥८॥

ॐ असतो मा सद्गमय, तमसो मा ज्योतिर्गमय, मृत्योर्माऽमृतं गमय ।
सहनाववतु, सहनौ भुनक्तु सहवीर्यं हरवावहै ।
तेजस्विनावधीतमस्तु मा विद्विषावहै ॥

**आचार्यः-** अथ सर्वे स्वस्वपाठकक्षे प्रस्थानं कुरुत । तालिकानुसारं शिक्षकास्तत्रैव समागच्छन्ति, शिक्षकनिर्देशनानुसारं पठत । घण्टाचतुष्टयान्तरं स्वान् स्वान् सात्त्विकाहारान् भुक्त्वा क्रीडाङ्गणे गच्छत । तत्र तालिकानुसारं क्रीडत ।

(कक्षायां गुरुनिर्देशं धृत्वा छात्राः स्वान् स्वान् पाठान् पठन्ति ।)

## पञ्चमं दृश्यम्

**माता–** अहो वत्से ! त्वमागता ? कीदृशी प्रगतिरद्यतनी ?

**आज्ञा–** सुष्ठु मातः ।

**माता–** तव कृते भृष्टचणकमर्कटान्ननिर्मितं चर्वणाहारं, फलरसं च मया निर्मितम् । प्रथमं जलं पिब, स्वल्पविरामं च कुरु तदनन्तरं मया रचितं स्वल्पाहारं गृहाण ।

(माता कार्येषु व्यस्ता भवति, किञ्चित् वाद्यं ध्यन्यते, पिता प्रविशति)

**पिता–** आज्ञे ! गृहकार्यं सम्पादितम् ? सूर्यार्घ्यं कृत्वा सान्ध्यदीपं ज्वलयितव्यमधुना। अहं देवारार्तिक्यं सम्पादयामि ।

(आज्ञा नमस्करोति देवान्)

आदिदेव नमस्तुभ्यं प्रसीद मम भास्कर ।
दिवाकर नमस्तुभ्यं प्रभाकर नमोऽस्तु ते ॥
तं सूर्यं जगतां नाथं ज्ञानविज्ञानमोक्षदम् ।
महापापहरं देवं तं सूर्यं प्रणमाम्यहम् ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ॐ एहि सूर्य सहस्रांशो तेजोराशे जगत्पते ।
अनुकम्पय मां भक्त्या गृहाणार्घ्यं दिवाकर !
(सूर्यायार्घ्यं च प्रददाति)
(सान्ध्यदीपं च ज्वलयति)
दीपेन वर्धते वर्चो दीपेन वर्धते वपुः ।
दीपेन वर्धते वीर्यं सर्वं दीपेन वर्धते ॥
शुभं भवतु कल्याणमारोग्यं ज्ञानसम्पदः ।
मम पापविनाशाय दीपज्योतिर्नमोऽस्तु ते ॥
नमोऽस्त्वनन्ताय सहस्रमूर्त्तये सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः ॥
(आज्ञा पूज्यान् च नमति)

**माताः–** प्रणतयः पितामहाः, प्रणतयः पितामह्यः, प्रणतयः पितरः, प्रणतयो मातरः ।
(एवं रीत्या सर्वे ज्येष्ठान् प्रत्यभिवादनं करोति, ज्येष्ठाश्च आशीर्वचोभिः अभिषिञ्चन्ति, (सर्वे 'आयुष्मती भव, ज्ञानवती भव, शीलवती भव, सौभाग्यवती भव' इत्यादिना आशीर्वादेन तां संयोजयन्ति ।)
(अतः परं सर्वे परमेश्वरप्रीत्यर्थं नामसङ्कीर्त्तनं कुर्वन्ति)

**माता–** इयं भोजनवेला । अतः सर्वेभ्यो लवणार्द्रकं वितर आज्ञे !
(यथासनं भोजनार्थं सर्वे तिष्ठन्ति । आपोशनं सम्पाद्य भोजनस्थालीमादाय सामूहिकीं प्रार्थनां कुर्वन्ति)
ॐ ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥
ॐ अन्नं ब्रहमा रसो विष्णुः भोक्ता देवो महेश्वरः ।
एवं ध्यात्वा तु यो भुङ्क्ते सोऽन्नदोषैर्न लिप्यते ॥
'सत्यन्त्वर्तेन परिषिञ्चामि इति एवं अमृतोपस्तरणमसि स्वाहा'
(इति विष्णुं ध्यायन् आचम्य पञ्चाहुतीः कुर्वन्ति)
ॐ प्राणाय स्वाहा,
ॐ अपानाय स्वाहा,
ॐ समानाय स्वाहा,
ॐ उदानाय स्वाहा,
ॐ समानाय स्वाहा ॥ इति


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(भोजनान्तरं द्वादशगण्डूषानाचरन्ति सर्वे, ततः
शर्यातिञ्च सुकन्याञ्च च्यवनं शक्रमश्विनौ ।
भोजनान्ते स्मरेन्नित्यं तस्य चक्षुर्न हीयते ॥
इति पठन् सजलं चक्षुःस्पर्शनं कुर्वन्ति ।
अगस्त्यं वैनतेयं च शनिं च बडवानलम् ।
आहारपरिपाकाय स्मरेत् भीमं च पञ्चमम् ॥
(इत्यादि पठन् स्वोदरस्पर्शञ्च साधयन्ति । पादशतं गत्वा आगच्छन्ति ।
आगत्य च वज्रासने तिष्ठन्ति ।)
(पिता पितामहं शुश्रूषति, माता च पितामहीं शुश्रूषति)
(आज्ञा विश्राम्यति, कवितागीतादिकमभ्यासयति, चित्रं च करोति ।)

**पितामहः–** सन्ध्याकाले गृहीतं भोजनं पच्यमानमस्ति । अधुना स्वपनसमयोऽ भूत् । अहं किञ्चित्कालपर्यन्तं बृहदारण्यकोपनिषदध्ययनं करोमि । शेषाः सर्वे क्लान्ताः शयनार्थं गच्छन्तु । तत्पूर्वं वयं सर्वे ईशं स्मरामः ।

ॐ शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं,
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ।
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं,
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥
देवीप्रपन्नार्तिहरे प्रसीद, प्रसीद मातर्जगतोऽखिलस्य ।
प्रसीद विश्वेश्वरि पाहि विश्वं त्वमीश्वरी देवि चराचरस्य ॥
कृष्ण त्वदीयपदपंकज-पञ्जरान्ते,
अद्यैव मे विशतु मानसराजहंसः ।
प्राणप्रयाणसमये कफवातपित्तैः,
कण्ठावरोधनविधौ स्मरणं कुतस्ते ॥
जीवने यावदादानं स्यात्प्रदानं ततोऽधिकम् ।
इत्येषा प्रार्थनास्माकं भगवन्परिपूर्यताम् ।
सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत् ॥
ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ।
ॐ शान्तिः ॐ शान्तिः । ॐ शान्तिः

(पटाक्षेपो भवति) ॥



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

# परिस्थितिचित्रणम्

डिल्लीश्वरभट्टराई

(ततः प्रविशति श्वेतरोमा तपस्विनी, क्षणेनान्या महिलाश्च)

**सर्वा महिला-** (वन्दनमभिनीय) मातः ! वन्दामहे वयम् ।

**तपस्विनी-** सुबुद्धयो भवतः (महिला परस्परं मुखानि पश्यन्ति । तपस्विनी तासां विलासमयं वेषं विलोक्य खिन्नेव दृश्यते)

**विलासिनी-** मातः ! वयं किमपि समाधातुं अपारयन्त्यः समायाताः स्मः, यदि अनुमन्यसे कथयामः ।

**तपस्विनी-** अहं भवतीनामेव, मम सर्वमात्मीयं, न कर्तव्यः, सङ्कोचः । यदृशो विचार उदयते हृदये स सुष्पस्टं प्रकाशनीयो मयि ।

**अरालकेशी-** अस्माकं संस्कृतेः सभ्यतायाः परम्परायाश्च विषये कीदृशी भवदीया भावना ? तां शान्त्या एव मुख्यं प्रश्नं करिष्यामः ।

**तपस्विनी-** आत्मनः संस्कृतौ स्वकीयायां सभ्यतायाम्, स्वीयायां परम्परायां सर्वोऽपि गर्वं करोति । तत्र च वयमार्याः, येषामस्माकं संस्कृतिः संस्कृता, अध्यात्मवादमूला च । अनुभवनिकषोपले परःकोटिभिर्वर्षैः परीक्ष्य सर्वश्रेष्ठां निश्चित्य बुद्धिमद्भिः प्राचीनैः आर्यैः प्रवर्तिता अस्मत्परम्परा, अतोऽत्र आदरभावना वर्तते मम, पृच्छत यूयं यत् प्रष्टव्यं तत् ।

**मदनमञ्जरी-** यस्यां संस्कृतौ यस्यां सभ्यतायां यस्यां परम्परायां किमन्यद् यस्मिन् देशेऽपि वयं घृणां कुर्मस्तत्रैव भवत्या आदरः कृत इति महदाश्चर्यम्। किं भवती स्त्रीणामिमां दीनां हीनां च दशां विलोक्यापि न व्यथते ।

**तपस्विनी-** (क्षणं नेत्र निमील्य पुनरुन्मील्य च) भ्रममयमुपनेत्रं धारयित्वा यो विश्वं पश्यति, सोऽयथार्थं विश्वं पश्यतीति किमाश्चर्यम् ?

**कोपना-** किं तात्पर्यं भवत्याः ? नावगतम् अस्माभिः ।

**तपस्विनी-** यदि नीलेन काचेन व्यवहितया दृष्ट्या श्वेतं वस्त्रं विलोक्यते तदा किंवर्णं दृश्यते तद् वस्त्रम् ?

**कोपना-** अथ किम् ? नीलम् ।

**तपस्विनी-** यदि लोहितेन काचेन व्यवहितया दृष्ट्या ?

**कोपना-** लोहितम् ।

**तपस्विनी-** अथ पीतेन काचेन ?



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**कोपना-** पीतम् ।

**तपस्विनी-** धन्यवादो भवतीभ्यः । वृद्धो विषयो भवतीनाम् ।

**मदनमञ्जरी-** भवती कथयति ज्ञातमस्माकमिति, परं प्रकृते किमायातम् ? एतेन न अववुद्धमस्माकं यदि दयसे अस्मान् तर्हि स्पष्टं कथय मातः !

**तपस्विनी-** यथा श्वेतवर्णस्य प्रत्यक्षे चक्षुरिन्द्रियं शक्तिरहितं कुर्वन्ति बहुवर्णाः काचाश्चक्षुर्व्यवधाय, तथैव मानवजीवनं विज्ञानस्यान्तस्तलं कदाचिदपि लब्धुमपारयन्ती स्वोपनिवेशस्थान् स्वसंस्कृत्या, स्वसभ्यतया, स्वगौरवेण, स्वदेशभक्त्या, सङ्क्षेपेण स्वत्वेन च रहितान् सम्पाद्य प्रतिशोणितकणं दासभावनां पूरयितुं विश्वशोषणेन कुख्यातैरनेकपारावारपारीणैः प्रवर्तिता शिक्षादुहा या कुशिक्षा सा अस्मान् वाक्शक्तिसम्पन्नान् मूकान्, सलोचनान् अन्धान् सकर्णान् बधिरान् सपादान् पङ्गून् सबलान् भीरून् सबुद्धिमत्तान् किङ्करान् सम्पादयति । अतो नायं दोषो भवतीनां स्वाभाविकः, अपि तु स आगन्तुकः ।

(सर्वाः स्वाक्षेपं मन्यमानाः विच्छाया इव भवन्ति ।)

**चारुहासिनी-** मातः ! वयम् असमाहितायाः समस्यायाः समाधित्सया अत्र समायाता, नोपलब्धं समाधानम्, अपि च समुपलब्ध उपालम्भः । नेयमाशाऽऽ सीत् भवतीतः ।

**तपस्विनी-** (अतिशान्तेन भावेन नेत्रे निमील्य) पुत्र्यः ! एष उपालम्भो न । येन प्रकारेण युष्माकं मातरे स्निह्येयुर्युष्मासु तथैव स्निह्यामि अहमपि युष्मासु । परं युष्माकं मातककणां मम च स्नेहे विशेषोऽस्ति । मम स्नेहो युष्मान् उन्नमयितुं समर्थोऽस्ति यदि यूयं तत्पराः । भवन्मातककणां स्नेहो हि सम्भवति अधःपातकोऽपि ।

**अरालकेशी-** मातः ! वयं समाजे पुरुषकृतमत्याचारमवगत्य पुरुषसमाजं शोधयितुं निश्चितवत्यः स्मः । जर्जरां पुणाप्रथां च लत्ताप्रहारेय दूरीकर्तुं बद्धव्रताः स्मः । तस्यामेव कार्यपरम्परायां सर्वप्रथमं पुरुषाणां विरोधे क्रान्तिं कर्तुं वाञ्छामो वयम् । भवत्या अत्र किं मतम् ?

**तपस्विनी-** अहं तु स्मरामि यत् पुंसां विरोधेन स्त्रियः, स्त्रीणां विरोधेन पुरुषा जीवनमार्गे पदमेकं चलितुमसमर्था भवन्तीति । यथा रथः चक्राभ्यामेव चलति तथैव सुखमयं जीवनमपि स्त्रीपुरुषाभ्यामेव सम्भवति परस्परमनुकूलाभ्याम् इति ।

**अरालकेशी-** यदि अत्याचरन्ति ते अस्मासु तदा ?



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**तपस्विनी-** तदा ? तदा ते प्रेम्णा स्नेहेन सद्भावेन च सन्मार्गे प्रवर्तनीयाः ।

**अरालकेशी-** ते के अस्माकं मातः ! ये दृप्यन्तु वयं नमेम ।

**तपस्विनी-** (ईषद् हसतीव नेत्रे निमील्यैव) वत्से ! के न ते पुत्रास्ते ? ये तुन्दे धार्यन्ते, असन्तः काम्यन्ते, उत्सङ्गे निवास्यन्ते, तेषां यत्र कुत्रापि चुम्ब्यते, अपीत्वापि पाय्यन्ते, अभुक्त्वापि भोज्यन्ते, अनिर्वचनीयप्रेम्णा पाल्यन्ते, लाल्यन्ते, पोष्यन्ते, वर्ध्यन्ते । पतयस्ते ये हृदयकल्पितां चिरभावनां साकारयन्ति, अपूर्णं जीवनं पूरयन्ति, स्वकीये हृत्सिंहासने विराजयन्ति, प्रेमकुसुमैः पूजयन्ति, सर्वस्वं च समर्पयन्ति । पितरस्ते ये विश्वं प्रदर्शयन्ति । भ्रातरस्ते ये स्निह्यन्ति । वत्से ! कथय के न ते ?

**विलासिनी-** आस्माकीना समाजिकी समुन्नतिः कथं भवतीति विश्वसिति भवती ?

**तपस्विनी-** भवतीभिर्यादृशी शिक्षादुहा कुशिक्षालुता धृता, तद्विपरीताया मानसिकीं यथार्थसमुन्नतिं सामर्थ्यशालिन्याः शिक्षायाः स्वीकरणेन वसने लग्नं मालिन्यं शोधकेन जलेनैव कुभावनां सद्विचारेण प्रक्षाल्य... ।

**मदनमञ्जरी-** कथं प्रक्षाल्यते कुभावना ?

**तपस्विनी-** तेषां ग्रन्थानामध्ययनेन यत्र जीवनविज्ञानतत्त्वम् ओतं प्रोतं च वर्तते, येषु शास्त्रेषु हिंस्रजन्तुभ्योऽपि अविवेकिनो मानवान् विश्वकल्याणैकप्रवणान् कर्तुं सामर्थ्यमस्ति, येषां ग्रन्थानामनशीलनं सम्पादयन्तः सुधियः सुखं दुःखं च जीवावृक्षस्य कुसुमं मन्वानाः समं पंश्यन्ति ।

**चारुहासिनी-** अहं शङ्के भवत्या सङ्केतिता गीतादयो गहना ग्रन्थाः किलेति ।

**तपस्विनी-** भवत्य उत्सहन्ते ?

(सर्वाः परस्परं मुखानि पश्यन्ति ।)

**मदनमञ्जरी-** (सजृम्भम् अस्वीकृतिसूचिकया मुद्रया) अतिकठिना अतिजटिला च संस्कृतभाषा न शक्यते सुखेन अध्येतुम् । पुनश्च श्रुतवत्य आस्म बी.ए.कक्षायामध्ययनसमये वयं यत् संस्कृतभाषा आवश्यकी न वर्ततेऽस्माकं देशोन्नतये, देशोन्नतये तु आवश्यकता वर्तते केवलम् आङ्ग्लभाषायाः इति । (नासिकां सङ्कोचयति घृणामुद्रया) ।

**तपस्विनी-** सर्वं विश्वं यदा बर्बरयुगे वर्तमानमासीत् तदा भारतवर्षम् उन्नतेः शिखरे विराजमानमासीत् । तत्र आङ्ग्लभाषा कारणमासीदिति पृष्टं भवतीभिः ?


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(सर्वाः परस्परं मुखानि प्रेक्षन्ते ।) इदानीमपि कतिचन रुसादयो देशा भौतिक्यामुन्नतौ केभ्योऽपि देशेभ्यः पश्चान्न सन्ति । तत्रापि किम् आङ्गलभाषैव कारणम् ? इति न पृष्टवत्यो भवत्यः ?

(स्नेहमुद्रया) प्रियाः पुर्त्यः ! कस्याश्चन भाषाया माध्यमेन भवतु कश्चन देशः समुन्नतोऽसमुन्नतो वा नास्माकं तेन प्रयोजनम् । उदाहरणार्थं 'मोहनस्य समुन्नत्यै नितरां प्रयस्यन्ती मोहनसमुन्नतौ मुख्यं कारणं स्नेहमयी मोहनमाता मदनस्य कालिकापुत्रस्य जीवनसमुन्नतौ न भवति नितरामुपयोगिनी तादृशी । तथैवास्माकं प्रयोजनं तु एतद् यत् अस्माकं देशः कथमुन्नतो भवतीति (आविष्टेव गम्भीरस्वरेण) ।

या संस्कृतभाषा विश्वभाषाणां जननी विशेषेण अस्माकं मातृभाषायाः, पितृभाषायाः, राष्ट्रभाषायाः नेपालीभाषायाः ---

यस्यां संस्कृतभाषायामज्ञातायामस्माकं राष्ट्रभाषायाः शुद्धिर्न सम्भवति । अस्माकं राष्ट्रभाषायां यस्याः संस्कृतभाषायाः प्रतिशतं नवतिपदानि विराजन्ते ।

आर्याणामस्माकं जन्मन आरभ्य मृत्युपर्यन्तं सर्वाणि कर्माणि यया भाषया संसाध्यन्ते, यस्यां संस्कृतभाषायाम् आर्यसंस्कृतेरार्यसभ्यतायाश्च निधिः सुरक्षितोऽस्ति, यस्यां संस्कृतभाषायामुपनिबद्धानि दर्शनानि समनुशील्य अस्माकं पूर्वेषां पुरुषाणां बुद्धिमत्तायां चकितं वर्तते सर्वं विद्वज्जगत् ---

ज्ञानविज्ञानरत्नाकरो वेदो यस्यां संस्कृतभाषायां वर्तते, यस्य तुलां विश्वस्य ग्रन्था न गता न गमिष्यन्ति च । सर्वप्रथमं विश्वबन्धुत्वभावना (यस्यां भाषायामुपनिबद्धेन वेदेन) यद्भाषायामयैर्मन्त्रैरुद्घोषिता गम्भीरस्वरेण गिरिशिखरे नदीसङ्गमे च वर्तमानैः ब्रह्मविद्भिः 'मां मित्रस्य चक्षुषा सर्वाणि भूतानि समीक्षन्ताम्, मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे, मित्रस्य चक्षुषा समीक्षामहे' इति । विश्वशान्त्यै सर्वप्रथमं प्रयस्यता प्रातःस्मरणीयानां पवित्रा उद्गारा यद्भाषायां समुपलभ्यन्ते- 'द्यौः शान्तिः ... सर्वं शान्तिः' इति ।

सर्वोदयसिद्धान्तः पुष्पितः फलितश्च यद्भाषायां निबद्धेषु ग्रन्थेषु समालोक्यते, संसारे शब्ददृष्ट्या अर्थदृष्ट्या च महान् महाभारतग्रन्थो यस्या भाषायाः शोभां वर्धयति । आकृत्या लघ्वी परं संसारे वर्तमानानां ग्रन्थानां महत्त्वं स्वकीयेन महिम्नाऽतिलघीयःसम्पादयित्री श्रीमद्भगवद्गीताया यस्यां भाषायां वर्तते । यस्या गौरवशालिता संसारे सर्वैः स्वीकृता वर्तते ।

सर्वेषु धर्मेषु मूर्धन्यः सनातनधर्मो हि सनातनैर्महर्षिभिर्यस्यां भाषायामुपदिष्टो वर्तते लोककल्याणाय । तस्या एव संस्कृतभाषाया अपि भूमौ नेपाले आवश्यकता न वर्तत इति कथयन्त आत्मन आर्यान् कथयितुमपि



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अनधिकारिणस्तेऽनुच्चारणीयनामानो दर्व्यां जलं तापयित्वा मज्जन्तु निर्लज्जाः कृतकमयूराः । ये च पुनर्देशोन्नतये केवलम् आङ्गलभाषाया एव आवश्यकता वर्तते इति कथयन्ति तेषां स्थितये स्थानमेव भविष्यति अस्माकं मातृभूमौ नेपाले। विक्रीतात्मानो विकृतबुद्धयोऽगौरवर्णा नेपालस्था आङ्गला गच्छन्तु स्वकीय इष्टतमे देशे, तादृशानां नेपालिनाम् आवश्यकता नास्ति नेपालोन्नतये । नेपालनाशकास्ते तु इति मे मतिः ।

स्वकीयां जन्मभुवं स्वां सभ्यतां स्वीयां संस्कृतिम् आत्मनो गौरवं च विक्रीयापि तुन्दमुन्नमयितुं ये वाञ्छन्ति ते यावच्छीघ्रं निर्गच्छन्ति जन्मभुवस्तावदेव शीघ्रं भवति देशकल्याणम् ।

**(शान्ततमेन स्वरेण)**

पुत्रिकाः ! यूयमपि यदि वाञ्छथः कल्याणमात्मनः, यदि देशस्य समुन्नतिं कामयध्वे, भाविनीषु सन्ततिषु यदि आत्मगौरवाय किञ्चन वस्तु सुरक्षितं सम्पादयितुं अभिलषथ, यदि च विदेशिनां दृष्टौ स्वकीयेन गौरवेण आदृता भवितुमिच्छथ तर्हि स्वसंस्कृतेः, स्वीयसभ्यतायाः, स्वकीयपरम्पराया आत्मनो मातृभूम्या निजराष्ट्रभाषायाश्च रक्षणसाधनं संस्कृतं पठत पाठयत च । दश पुरुषा यावत् कर्तुं शक्नुवन्ति शिक्षाप्रचारेण देशसमुन्नतिं तावत् कर्तुं शक्नोति महिला एकाकिनी ।

**(मुखं प्रतिविलोक्य)**

कथयत यूयम् एतत् कर्तुं वाञ्छथ ?

**चारुहासिनी-** सामाजिकीं कुप्रथां दूरयितुं स्वीयं देशं समुन्नमयितुं स्वकीयान् देशवासिनो विदेशिनां दृष्टावात्मगौरवान्वितान् सम्पादयितुम् एव कटिबद्धा भूत्वा चालितपादा मातः ! वयं परन्तु भवती येन प्रकारेण ज्ञानाञ्जनशलाकया चक्षुरुन्मीलितवत्यस्माकं तादृशः शिक्षको नोपलब्धोऽस्माभिरद्यावधि समीपे स्थापयितारः, पुनः कदाचन दुग्धे पतितां मक्षिकामिव दूरेऽस्मानेव निक्षेप्तारः ।

**अरालकेशी-** (बाहुमुद्यम्य) सर्वं सत्यम्, यावत्यो नार्यः सम्प्रति ज्ञाततत्त्वा स्मस्तावतीनां अहं स्मरामि न स्यादस्मिन् विषये विमतिरिति, अहं तु एतावत् कथयामि यद् अद्य प्रभृति पुरुषाणां विरोधे विधीयतां क्रान्तिरिति ।

**मदनमञ्जरी-** पुरुषाणां विरोधे क्रान्तिः करणीयेत्यत्र तु नास्ति विवादः, सर्वाः स्त्रियो वाञ्छन्त्येव क्रान्तिं कर्तुम् । उज्ज्वलमुखा मलीमसमानसा हितचिन्तका इव भूत्वाऽहितचिन्तका मनोमोहकाः सन्तः


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सर्वस्वस्य हर्तारस्ते किम् अकृत्यं न कृतवन्तोऽस्मासु ? ... परन्तु विषयोऽयं महत्त्वपूर्णः, बहूनां सहायतां विना सफलो न भविष्यति, सा च सहायता स्त्रीभ्य एव ग्रहीतव्या, विशेषतः पुरुषैः सह अकृतघनिष्ठसम्पर्काभ्यः, यतः पिञ्जरस्थां सारिकां यथेच्छं वाचयन्ति मानवास्तथैव स्वमायाजालवर्तिनीः कामिनीर्यथेच्छं नर्तयन्ति पुरुषाः । अस्माकं कृते तु पुरुषापेक्षयापि पुरुषस्य कृते स्वं जीवनम् अपि अर्पयितुं हसन्त्य एव तत्पराः स्त्रिय एव शत्रवः, ताभ्योऽपि सहायताया आशा न करणीया ।

**विलासिनी-** तर्हि कथं कार्यं सिद्धं भविष्यति ?

**मदनमञ्जरी-** अहं तु नितरां साश्चर्यास्मि यद् अत्रत्या महिलाः कियत्योऽज्ञानिन्य इति, ये पुरुषा अस्मासु अत्याचारं कुर्वन्ति तानेव इष्टदेवताः मन्वते । तेषां मुखे दृष्टिं दत्तवत्यो विस्मरन्ति ततो दृष्टिं निवर्तयितुमपि, तेषां सङ्गतिमुपलभ्य मदिरयेव उन्मत्ता हिताहितविवेकरहितास्तेषामेव सार्वदिकं सान्निध्यं कामयन्ते प्रार्थयन्ति च परमात्मानम्, न केवलं जागरणे स्वप्नेऽपि रममाणा भवन्ति तैः सहैव, हन्त ! केन खलूपायेन पुरुषग्राहेभ्यः स्त्रियो मुच्येरन् ? (इति विषादमुद्रया तिष्ठति)

**चारुहासिनी-** सहचर्यः ! अस्ति अस्मिन् विषये मामकीन एकः प्रस्तावः । इदानीं प्राचीनेषु आधुनिकेषु च विषयेषु निष्णाता एका तपस्विनी अस्माकमेव नगरे समायातास्ति । साऽत्यन्तं जटिलं विषयमपि सरलयतीति श्रूयते तया सहापि विमर्शो विधेय इति तदनन्तरं यदुचितं तद्विधास्याम इति ।

(सर्वाः करतलध्वनिना तामनुमोदन्ते)

॥ यवनिका पतति ॥



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

# तमसो ज्योतिषि

प्रा. तोयनाथपाण्डेयः

पुरुषपात्राणि

१. सूत्रधारः
२. रघुनाथः- १६ वर्षवयस्कः, पश्चात् २४ वर्षवयस्कः (नायकः)
३. मुक्तिबहादुरः- भूमिपतिः, प्रधानपञ्चश्च
४. हरिप्रसादः- ग्रामवासी पञ्चायतसदस्यश्च
५. रुद्रनाथः- ग्रामवासी पञ्चायतसदस्यश्च
६. साहिँला घर्ती- ग्रामवासी पञ्चायतसदस्यश्च
७. बखतबहादुरः- मुक्तिबहादुरस्य कर्मचारी
८. धने तामाङः- मुक्तिबहादुरस्याधमर्णः सेवकश्च
९. निरीक्षकः- काष्ठमण्डपनिवासी
१०. शङ्करः- रघुनाथस्य युवशिष्यः पञ्चायतसदस्यश्च
११. भैरवः- मुक्तिबहादुरस्य पुत्रः १२ वर्षवयस्कः
१२. अधिकारी- भूमिसुधारस्याधिकारी
१३. सखायः
१४. ग्रामवासिनः
१५. कर्मचारिणः
१६. होमनाथः- कश्चिदुत्तमर्णः
१७. मानबहादुरः- होमनाथस्याधमर्णः

## स्त्रीपात्राणि

१. नटी
२. मैया- मातृपितृविहीना १० वर्षवयस्का पश्चात् १९ वर्षवयस्का मुक्तिबहादुरस्य भ्रातृजा (नायिका)
३. सेती- धनेतामाङस्य भार्या
४. ग्रामवासिन्यः
५. बालिका

नान्दी

शारदे सारदे पाहि नो विशारदे ।
भुक्तिमुक्तियुक्तिदे कान्तिदे क्लमापहे !
पीडयामि बाधितान् व्रीडया विभूषितान्


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नवीनमार्गमागतान् विपद्गतान् हिते रतान् ॥
तथा कृतान्तयातनामतीत्य हर्षगामिनः ।
समुन्नतौ समुत्सुकान् शूरवीरसज्जनान् ॥
-शारदे सारदे...
दृष्टिरत्र दीयतां कुतत्त्वकं निपीयताम्
तमोनिमग्नमानसो ज्योतिषि विधीयताम् ॥
आपदः पतन्तु वा विद्युतो हसन्तु वा
देशमानगौरवाय भक्तिरत्र दीयताम् ॥
-शारदे सारदे...

## प्रथमा कोशी[१२]

(नान्द्यन्ते सूत्रधारः)

**सूत्रधारः-** अलमतिविस्तरेण, महानुभावाः, प्रणिपत्य एवमहं विज्ञापयामि अस्मिन् त्रिभुवन-विश्वविद्यालयस्य षष्ठदीक्षान्तसमारोहावसरे किमपि प्रदर्शयितुकामोऽस्मि ।

(नेपथ्याभिमुखम्) कस्कः अत्र भोः ?

**नेपथ्ये-** इहास्मि नेपथ्य-विधा-संलग्ना ।

**सूत्रधारः-** आः... नेपथ्य-विधानम्, नेपथ्य-विधानम्, त्वरया आगम्यताम् अत्र ।

**नटी-** (प्रविश्य) किमर्थं त्वरते भवान् !

**सूत्रधारः-** महीयांसो दर्शका दर्शनौत्सुक्येन ससम्भ्रमा इव लक्ष्यन्ते, तद् आरभ्यतां नाटकम् ।

**नटी-** किन्नाम नाटकं प्रदर्शनीयम् ?

**सूत्रधारः-** तोयनाथपाण्डेयेन सरलैः शब्दैर्नाति-समस्तैः पदैश्च ग्रथितं 'तमसो ज्योतिषि' नाम नाटकं सर्वसाधारणैर्ज्ञेयतया प्रदर्शनीयम् ।

**नटी-** किं तद् दर्शनीयं भवति ?

**सूत्रधारः-** प्रिये ! 'आपरितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम्' इति महाकविकालिदासोक्तिं न स्मरसि ?

**नटी-** नह्येवं वक्तुकामा, परम् अस्मिन् नाटके प्राचीनो विषयो गृहीतः, उत वा नवीनो विषय इति पृच्छामि ।

**सूत्रधारः-** प्राचीनोऽपि नवीनः ।

**नटी-** कथमिव ?

---

१२ कोशीशब्दोऽत्राङ्कपर्यायः ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**सूत्रधारः-** यथा जीर्णं शरीरं विहाय नवीन-शरीरग्रहणे ह्यात्मनो नवीनत्वम्, तथैव अत्रापि । प्रिये ! शृणु, तमसि प्रयुक्तः कोऽपि विधिर्न सम्यक् परिलक्ष्यते तत्र ज्योतिरेव प्रकाशयति सम्पादयति च यथास्थानं यथाकामम् । एतादृशं विश्वविद्यालयादेव ज्योतिर्निःसरति । तमसि निमग्नान् ज्योतीरज्जुः समुद्धरति । समुद्धृतो ज्योतिष्मानेव सर्वकारैः प्रयुक्ता विविधां योजनां सफलीकरोति । यथात्र रघुः । (इत्यर्धोक्ते)

**नटी-** श्रूयतां श्रूयताम्, विक्षिप्तस्य आक्रन्दनमिव श्रूयते ।

**सूत्रधारः-** कथम् इहापि विक्षिप्तः ? (श्रुत्वा) एवम् । तमसि निमग्नः कोऽपि भवेत् ।

**नटी-** आवाभ्यां सङ्गच्छते किम् ?

**सूत्रधारः-** तावत् त्वरया गच्छावः ।

(गच्छतः ।)

(प्रविशति रुधिर-शिरसा रघुनाथ.)

**रघुनाथः-** (विहस्य) हा... हा... हा... शान्तिः क्रान्त्यां लीना, मानवस्य ग्रीवा मलिना, नेपालस्य उर्वरायां भूमौ बीजवापानां कदम्बकं निवसति । शृङ्गिकनकस्य शिरश्छेदेन कनकं विकसति क्रयाद् विक्रयेऽर्घः, वाञ्छति भोगी नूपुराधानेन भोगिन्या निःसर्गम् । (उच्चैर्हसति ।)

(शनै- शनैरवलोक्य बालिकायाः प्रवेशः ।)

**रघुनाथः-** (रुद्धकण्ठेन) किं पश्यसि विधातुर्विधानं वा गीतायाः कर्मयोगम् ? (रोदिति ।)

**बालिका-** कथम् ईदृशीं दशाम् आपन्नः ?

**रघुनाथः-** (उच्चैर्विहस्य) आम्... । अद्यावधि त्वं पूता (भर्त्सयन्) परं स्म एतावत् मानवताम् उल्लङ्घयितुं देवत्वस्य पुलिनाद् दानवताया पुलिनं यावत् सेतुरचनां वाञ्छसि । विविच्य पादौ उन्नमय बालिके ! (बालिका बिभेति ।) न भेतव्यम् ! च्च. च्च. प्राप्ते दानवतायाः कूले सर्वनाशस्ते। देवत्वस्य तीरस्य अदृश्यतां स्मर इदानीं न कदापि प्रत्यागमिष्यसि तत्र ।

**बालिका-** किम् अस्माकं प्रयोजनं प्रत्यावर्तने ?

**रघुनाथः-** आम्.... । अद्यावधि त्वं पूता । (उच्चैर्हसति ।) आगच्छ वन्दे (बालिकायाः करं गृहीत्वा हसति ।) (बालिका रोदिति ।) च्च, च्च, बालिके मा रुदिहि, निवारय नयननीरस्य अपव्ययं, तटबन्धं रचय, कतिपये मरुभूमिहृदयास्तव नयने उभयतः स्थास्यन्ति बिन्दुद्वयेन ते


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्पर्धन्त ऊर्वरत्वेन ।

**बालिका-** अतः परं नाहम् उपहसामि । (प्रणमति ।)

**रघुनाथः-** (रुदन्) भो दानव ! त्वं विचित्रां लीलां रचयसि, धवलहृदयं दूषयसि । हन्त ! एतादृशस्य कोमलाङ्कुरस्य सर्वनाशः । जगति यथा यथा एतादृशानां प्रेतानां छाया प्रवर्धते तथा तथा सरलप्रकृतिं सर्वनाशस्याभिमुखम् आकर्षति । बिभ्यति, क्रोशन्ति, रुदन्ति, उत्पतन्ति च प्रेतच्छायाक्रान्ताः ।

**बालिका-** कथमीदृशीं दशामापन्नः ?

**रघुनाथः-** तव पितृव्यकृपया ।

**बालिका-** तेन ताडितस्त्वम् ?

**रघुनाथः-** अथ किम् ?

**बालिका-** किं विक्षिप्तस्त्वम् ?

**रघुनाथः-** (भर्त्सयन्) तव पितृव्यो विक्षिप्तः । तस्यापि पिता विक्षिप्तः, पुनः पितामहोऽपि विक्षिप्तः, तस्य ... । अहं तु निक्षिप्तः प्रक्षिप्तः प्रेतात्मनि, न पुनर्विक्षिप्तः ।

(उच्चैर्हसति । शान्तिः क्रान्त्यां लीनेति पठति ।)

**बालिका-** नाहम् एवं ब्रवीमि, उपहसितुकामा । (प्रणमति ।)

**रघुनाथः-** दानव ! त्वमेव विजयी, स्वीकरोम्यात्मनः पराजयम्, विरम तावत् किसलयच्छेदात् । (रोदिति ।)

**बालिका-** मा रुदिहि, सम्मार्जयामि वस्त्रखण्डेन ललाटस्य रुधिरं ते । (वस्त्रं खण्डयति बध्नाति च ।) (ततः प्रविशति भैरवः ।)

**भैरवः-** मैयँ ! किङ्करोषि त्वम् ?

**बालिका-** त्वमेव किङ्करोऽसि ?

**भैरवः-** किमर्थमेकाकिनि ?

**बालिका-** न पश्यसि रुधिरस्रावम् अस्य ? यदि तव मम एतादृशी दशा, तर्हि कीदृशी पीडा भवेत् ?

**भैरवः-** अहो ! नवीनाम् उदरबन्धनीं संछिद्य परकीये ललाटे बध्नासि ? तावत्, कथयिष्ये पितरम्, तदा त्वमपि अस्यैव दशां गमिष्यसि ।

**बालिका-** अस्य उदरबन्धनी नास्ति ।

**भैरवः-** जानासि ? पित्रा भृशं ताडितोऽयम् । अस्य सेवया न कुप्यति पिता तुभ्यम् ?

**बालिका-** किमर्थं ताडितः ?



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**भैरवः-** विक्षिप्त इति ।

**रघुनाथः-** (उत्थाय) को विक्षिप्तः ? को विक्षिप्तः ? पिता तव विक्षिप्तः, पितामहो विक्षिप्तः, प्रपितामहोऽपि विक्षिप्तस्ते, अहं तु निक्षिप्तः प्रक्षिप्तः प्रेतात्मनि, न पुनर्विक्षिप्तः । (भैरवः पलायते पतति च ।)

**बालिका-** (रघोर्मुखं विलोक्य) वृथैव स पलायंते । त्वं किमपि न करोषि तम् एवम् ?

**रघुनाथः-** च्च, च्च, नास्ति बालिके किमपि मया सह । (परितो विलोकयन्) एकां लौहमुद्रिकां गृहाण । (वस्त्रे बध्नाति ।) बालिके ! नाहं किमपि कर्तुं समर्थः काष्ठस्य बाहू धारयामि मानवशक्तिविहीनं शरीरमिदम् ।

**बालिका-** पठनेन शक्तिरायातीति भैरवस्य गुरुः कथयति । त्वमपि पठ । (पुनः प्रविशति भैरवो दाण्डिकेन धनेतामाडेन सह ।)

**भैरवः-** अनेनैव ताडितः पातितश्चाहम्, त्वमपि लकुटेन अस्य शिरः खण्डय ।

**बालिका-** हम् । असत्यं वदसि त्वम् । अविश्वास्यम् अस्य कथनम् । स्वयमेव पलायितः, स्वंयमेव पतितः ।

**भैरवः-** इयं त्वस्य सेविका । किमर्थम् अस्याः कथने आयासि । ताडय तं मद्वचनात् ।

**धने-** किं त्वया ताडित एषः ?

**रघुनाथः-** पूर्वमेव अपहृता युस्माभिः शक्तिर्मे । कथं पुनस्ताडने समर्थः स्याम् ? धने ! त्वं न जानासि ? प्रभुतनयः अयम् । अत एव श्वानमिव त्वाम् अत्र आनेतुं समर्थः ।

**धने-** कथं कथम् ? किं मां श्वा इति कथयसि । (जिघांसति ।)

**बालिका-** किं वृथैव हन्तुमिच्छसि ?

**धने-** किमर्थं ताडितो भैरवः ?

**रघुनाथः-** (उच्चैर्विहस्य) न मया ताडितः पातितश्च ।

**धने-** (भैरवं प्रति) तव पित्रा भृशं ताडितः । किं पुनर्मृतस्य मारणेन, गच्छतम् । (उभौ गृहीत्वा गच्छति ।)

## द्वितीया कोशी

(पिटं रचयन्ती सेती दृश्यते ।)

**सेती-** कीदृग् वंशखण्डी जीर्ण इव प्रतिभाति ।
ना. ना. ना. ना. ना. ना. ना.



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हु हु हु हू हू हू हू
स्मर्तव्या हि प्रीतिस्ते, गातव्या च गीतिस्ते ।
(प्रविश्य धने वंशखण्डानि प्रक्षिपति ।)
आः (बिभेति दृष्ट्वा), कथं चौर इव प्रविष्टः ?

**धने-** सम्यगभिहितं त्वया अनवरतं चोरयामि हृदयं ते ।

**सेती-** अयमेव दण्डश्चौरस्य । (वंशखण्डेन ताडयति ।)

**धने-** (किञ्चिद् दूरं गत्वा शूर्पस्थितं कदलीद्वयं गृहीत्वा) लकुटदण्डस्त्वया दत्तः, गृह्यतामर्थदण्डः । एकां तामाशयति, द्वितीयां स्वयमश्नाति, हसतः ।)

**सेती-** किं रघुः सत्यं विक्षिप्तः ?

**धने-** अस्माकं स्वामी कथयति । अहं न शङ्के तादृगिति ।

**सेती-** अत्यन्तं सरलो वराकः ।

**धने-** तस्य सर्वस्वमपहृतं स्वामिना ।

**सेती-** पापात्मा तव स्वामी ।

**धने-** मा ब्रूहि यदि शृणुयाद् वयमपि प्रक्षालितसर्वस्वकरा भविष्यामः ।

**सेती-** कोऽपि नास्ति ।

**धने-** सेति !

**सेती-** आम् !

**धने-** अहमपि सेवाकार्यं त्यजामि ।

**सेती-** किमर्थम् ?

**धने -** अहं क्षान्त्या कर्म करोमि चेत् स्वामी जीवन् मृत इति भर्त्सयति, प्रवचनात् जल्पकः, मौनिभावान् मूकः, समीपे स्थिते प्रगल्भः, दूरतः स्थिते अप्रगल्भ इति च स नितरां भर्त्सयति । अनवरतः परिश्रमो वर्तते, तथापि यशो न ददाति । आ... त्यजामि ।

**सेती-** नहि नहि यदि तथा करोषि, अस्मिन् ग्रामे वासो न स्यात् ।
(मुक्तिबहादुरः प्रविशति ।)

**धने-** (क्षणं विचिन्त्य हृदयं सन्ताड्य) अन्यतो गमिष्यावः ।

**मुक्तिबहादुरः-** कुत्र गमने विचारः ?

**धने-** अहो कथं स्वामिन् !

**सेती-** नहि नहि स्वामिन् ! एतत् पिटादिकं विक्रेतुं भञ्ज्याङ्गं परिहृत्य अन्यतो गन्तुं वाञ्छति ।

**मुक्तिबहादुरः-** न भविष्यति विक्रयः । ममावश्यकता एष, प्रेषय सर्वम्, इमाः



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कदलीश्च ।

**सेती-** स्वामिन् ! कदल्यस्तु भुक्तशेषाः, कथं स्वामिने समर्पयामि ।

**मुक्तिबहादुरः-** का हानिः ?

**सेती-** स्वामिन् ! पूर्वं बहुवारं पिटादिकमर्पितम् । इदानीं तु दुर्गोत्सवः समीपे वर्तते, गृहे वृद्धा श्वश्रूः ननान्दरश्च वर्तन्ते, अस्य मम चावश्यकता नूतनवस्त्रस्य अतो विक्रेयाणि एतानि । (इत्यर्धोक्ते)

**मुक्तिबहादुरः-** अलमलम्, दुर्गोत्सवार्थे दास्यामि ऋणम्, सर्वं प्रेषय मद्वचनात् । (गच्छति, तौ दम्पती परस्परं पश्यतः ।)

## तृतीया कोशी

(मुक्तिबहादुरस्य गृहाङ्गणम्)

(बद्धं रघुं मुक्तिबहादुरो लकुटेन ताडयति ।)

**हरिप्रसादः-** मा ताड्यताम् अधिकं श्रीमन् ! मरिष्यति ।

**मुक्तिबहादुरः-** का हानिरस्य मरणेन ?

**रुद्रनाथः-** मारणेनापि को लाभः ?

**मुक्तिबहादुरः-** शत्रुर्विनश्यति ।

**साहिँला घर्ती-** न भवते द्रुह्यति । अस्य ग्रामवासादिकस्य स्थितिर्न समीचीना । अत एव विक्षिप्त इव प्रतिभाति ।

**मुक्तिबहादुरः-** (सङ्क्रुध्य) मया निर्मिता स्थितिरियम् । सर्वज्ञ इव प्रजल्पसि ? अस्यैव पित्रा गृहीतस्य ऋणस्य परिणामः अयम् । ऐश्वर्यार्धं दत्त्वा त्वमेव रचय अस्य सुस्थितिम् ।

(भैरवो मैयाम् रघुमिव बध्वा नयतिस्थापयति तत्रैव ।)

**भैरवः-** पितः ! अवलोक्यताम् । (हसति ।)

**मुक्तिबहादुरः-** (सङ्क्रुध्य मैयां सन्ताड्य) किं युष्माकं क्रीडास्थलम् ? (धने मैयां बन्धनान् मोचयति ।) अत्यन्तं प्रगल्भा इयम् ।

**साहिँला घर्ती-** अनाथा वराकी ।

**मुक्तिबहादुरः-** अस्याः पित्रोर्निधनकारणम् अहमेव ?

**साहिँला घर्ती-** न ह्येवं वक्तुकामः ।

**मुक्तिबहादुरः-** त्वमेव नीत्वा परिपालय एनाम् ।

**साहिँला घर्ती-** स्वामिन् ! सत्यं प्राप्नोमि यदि ।

**मुक्तिबहादुरः-** न केवलं वचसा पत्रेण गृह्यताम् । बखतबहादुर ! लिख्यता



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पत्रमेकम् ।

**बखतबहादुरः-** कया रीत्या ?

**मुक्तिबहादुरः-** रीतिं न जानासि तथापि लेखकस्त्वम् ! धिक् (तारस्वरेण) अस्य स्वायत्तीकरणे मैयायाः ।

**बखतबहादुरः-** नात्र ममाभिप्रायः ।

**मुक्तिबहादुरः-** तर्हि किम् ?

**बखतबहादुरः-** कियता मूल्येन ?

**मुक्तिबहादुरः-** साधु साधु (क्षणं विचिन्त्य) एते किं कथयन्ति ?

**हरिप्रसादः-** स्वामिन् ! पशोरिव कन्याया विक्रये को विधिः ?

**मुक्तिबहादुरः-** पत्रे मा लिख्यताम्, केवलं वचसा परिपालने मूल्ये का हानिः ?

**हरिप्रसादः-** कथ्यतां घर्तीमातुल !

**घर्ती-** न तथा समृद्धिमानहम् ।

**मुक्तिबहादुरः-** कुत्र यातं तव खोलाखेताभिधेयं क्षेत्रम् ?

**घर्ती-** तेनैव स्वनाम धारयामि ।

**मुक्तिबहादुरः-** तर्हि कोऽपि द्वितीयोपायोऽनुष्ठीयताम् ।

**घर्ती-** अर्थं विना ?

**मुक्तिबहादुरः-** सार्थम् ।

**घर्ती-** श्रीमन् ! श्रूयतां मद्वचनं याथार्थ्येन कथयामि । अजीगर्तस्य पुत्रं शुनःशेपं पशुमिव क्रीत्वा हरिश्चन्द्र इव न हन्तुमिच्छामि । अपि तु शकुन्तलाम् इव अश्रुद्वयेन धृत्वा कण्व इव स्नेहेन परिपालयामि ।

**रुद्रनाथः-** (हसन्) तपोवनदर्शनाय पशूनामाखेटाय च प्राप्तो दुष्यन्तः प्राप्तः शकुन्तलया । अत्र तु दारुवनावलोकिनः तरुणीमृगयानिपुणाः हालिका दुष्यन्ताः प्राप्यन्ते ।

**घर्ती-** समयः समानयति तदनुरूपं दुष्यन्तम् ।

**मुक्तिबहादुरः-** अर्थं विना सर्वा योजना निष्फला स्यात् ।

**घर्ती-** यथा भवते रोचते (मुक्तिबहादुरस्य पत्नी गौंथली प्रविशति ।)

**गौंथली-** एते पुरुषनामधारिणो दैवात् पुच्छविषाणहीनाः पशवः स्व-स्वगृहिणीं वञ्चयित्वा भुक्तस्य पाचनाय परस्परमालपन्ति । मातुल ! नयैनाम् । (अर्पयति ।)

**घर्ती-** पत्रं विना ?

**गौंथली-** लिख्यतां पत्रम्, किं पश्यसि वखते ?

**मुक्तिबहादुरः-** कथितपूर्वोऽयम् ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**धने-** पञ्चविंशत्या क्रमेण वारत्रयं मयापि गृहीतं शतद्वयम्, तत्र वर्षत्रयमनवरतं सपरिश्रमं श्रीमतां कृतं कर्म । सर्वं मेलयित्वा लिख्यतां नवीनमृणपत्रम् ।

**मुक्तिबहादुरः-** किं किम् ? क... क... कथं कथम् ? तव पित्रा गृहीतं शतद्वयमिति। किं पीत्वा आगतोऽसि यत् सहस्रद्वयस्थाने शतद्वयं लपसि । (ऋण-पत्रं प्रक्षिपति ।)

**धने-** कथं प्रभो ! पित्रा सप्तदशवारं कथितं शतद्वयमिति । अहो ! सहस्रद्वयम् । केवलं बलीवर्दं क्रेतुं शतद्वयमेव । अहमपि साक्षिस्थाने अस्मि ।

**मुक्तिबहादुरः-** तव पित्रा वारत्रये अष्टादशशतरुप्यकाणि द्यूतक्रीडायां नाशितानि।

**बखतबहादुरः-** अत्र लिखितानि द्विसहस्ररुप्यकाणि वर्तन्ते ।

**धने-** (हरिप्रसादं प्रति) साक्षिस्थाने भवानपि वर्तते । धर्मं स्मृत्वा यज्ञोपवीतं स्पृष्ट्वा कथ्यतां सहस्रद्वयं किम् ?

**हरिप्रसादः-** अयमागच्छामि । (गच्छति) ।

**बखतबहादुरः-** मूर्ख ! धर्मस्मरणे का वार्ता, अत्र लिखितानि द्वे सहस्रे, यत्र कुत्रापि गच्छ वाधिकरणे गच्छ निश्चयेन दातव्ये द्वे सहस्रे ।

**धने-** तामाङपुत्रो मृतः । (शिरस्त्राणेन मुखं छादयति ।

**मुक्तिबहादुरः-** (बखतं प्रति) लिख्यतां सहस्रद्वयाधिकपञ्चसप्तत्या नवीनम् ऋणपत्रम् । पुनर्विक्षिप्तस्यास्य विषये किं क्रियते ?

**बखतबहादुरः-** ताडनेन न किमपि फलति ।

**रुद्रनाथः-** ममापि कथनम् एतावदेव ।

**मुक्तिबहादुरः-** तर्हि किं क्रियते ?

**बखतबहादुरः-** एकं नुहारक्षेत्रम् अवशिष्टम् अस्य, तदपि गृह्यताम् ।

**मुक्तिबहादुरः-** (रुद्रनाथं प्रति) कथम् ?

**रुद्रनाथः-** यथा भवते रोचते ।

**मुक्तिबहादुरः-** सर्वाणि पत्राणि लिख, अन्तर्गत्वा क्षणमागमिष्यामि (आसक्ताः सर्वे लेखने, मैया मौनेन गत्वा रघुं बन्धनाद् मोचयति ।)

**गौंथली-** (प्रविश्य) घर्तीमातुल ! गृह्यताम् अस्या वस्त्रपोटलिका । (ततः प्रविशति भैरवः ।)

**भैरवः-** मैये ! त्वं त्यक्तासि । अधुनैव परगृहं प्रविशसीति मम पित्रोरालापनेन ज्ञातम् । किमर्थं गच्छसि त्वम् ?

**मैया-** न जानामि ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**भैरवः-** मा गच्छ, कया सह क्रीडिष्यामि । तारस्वरेण रुदिहि, ततो न प्रेषयिष्यन्ति ।

**मैया-** जानासि ? रोदनेन तु पूर्वं पूर्वमिव बहु ताडयन्ति । माता नास्ति पिता नास्ति, (क्षणं विविच्य) कथय भैरव ! मृता जनाः कुत्र गच्छन्ति, तैः सह सङ्गन्तुं न शक्यते ?

**भैरवः-** अस्माकं ग्रामम् इव अन्यग्रामं गच्छन्ति मृताः । तैः सह सङ्गमनाय स्वयमपि मर्तव्यम् ।

**मैया-** तर्हि, इदानीमहं म्रिये मातापितृभ्यां सङ्गत्य त्वया साकं क्रीडनाया गमिष्यामि । न भवति किम् ?

**मुक्तिबहादुरः-** (प्रविश्य) सम्पन्नं सर्वम् ?

**बखतबहादुरः-** मुद्राकर्म केवलम् अवशिष्टम् ।

**मुक्तिबहादुरः-** तदपि समाप्यताम् ।

**बखतबहादुरः-** धने ! उत्तिष्ठ देहि मुद्राचिह्नम् ।

**धने-** (रुदन्) तामाडपुत्रो मृतः । (करं प्रसारयति, उभयोः अङ्गुष्ठयोः मुद्राम् आदत्ते बखतः ।)

**मुक्तिबहादुरः-** तस्यापि (रघोः स्थानं दर्शयति ।), कथं कथं कुत्र गतो विक्षिप्तः किं भग्नः सः ? (परितः अवलोक्य) शीघ्रं बद्ध्वा आनीयताम्, ताड्यताम्, मार्यताम् । (रुद्रबखतौ निर्गच्छतः ।) (घर्तीं प्रति) त्वमपि नय एनाम् ।

**घर्ती-** (उत्थाय) मैये ! गच्छावस्तावत् स्वगृहम्, नमस्कुरु मातापितरौ (मैया नमस्कृत्य, स्वक्रीडनकानि मृगयित्वा भैरवाय समर्पयति ।)

**भैरवः-** मैये ! मा गच्छ । (ताम् आकर्षति ।)

**मुक्तिबहादुरः-** विरम तावद् दुष्ट !

**भैरवः-** (रुदन्) मातः ! प्रवेशय एनाम् अन्तः, मा प्रेषय ।

**गौँथली-** आगमिष्यति त्यज इदानीम् (पुत्रमाकर्षति ।)

## चतुर्थी कोशी

**रघुनाथः-** श्रीमन्, किं क्रियते तस्य नाम श्रुत्वा मुक्तिबहादुर इति कथयन्ति सर्वे ।

**निरीक्षकः-** तर्हि सर्वेषां ग्रामवासिनां मुक्तिं वाञ्छसि ? (हसति ।)

**रघुनाथः-** श्रीमन् वहाम्यहं चर्मपेटिकाम् ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**निरीक्षकः-** भारवाहो मया सह गन्तुं न शक्नोति, भोज्यादिकं संस्थाप्य अस्मिन् स्वहस्ते धारयामि । नात्र कष्टम् ।

**रघुनाथः-** श्रीमन् ! कष्टम् अहम् अनुभवामि रिक्तहस्तत्वात् । मयि कृपा अस्ति चेद् वोढुं वाञ्छामि तत् ।

**निरीक्षकः-** तथा आग्रहश्चेद् गृहाण । (ददाति ।) कथय सविस्तरमात्मन इतिवृत्तम् ।

**रघुनाथः-** सम्प्राप्ते मयि चतुर्थे वर्षे दिवङ्गतो जनक इति मात्रा कथितम् । समयोऽयमेव मुक्तिबहादुरस्य कुदृष्टेः । सम्प्राप्ते मयि द्वादशे वर्षे मातापि पितृपथम् अनुययौ ।

**निरीक्षकः-** रघो ! मया कथितं विहाय नान्यः पन्था विद्यते ।

**रघुनाथः-** तथा करोमि सेवावृत्तिं परिगृह्यापि पाठशालायां प्रविश्य पठामि ।

**निरीक्षकः-** एवम् । द्वित्राणि दिनानि मम गृहे स्थास्यसि ।

**रघुनाथः-** अनवरतं वाञ्छामि श्रीमतामनुग्रहम् ।

**निरीक्षकः-** यथाशक्यं सहयोगं कर्तुं न विस्मरामि ।

(निर्गच्छतः ।)

## पञ्चमी कोशी

नववर्षानन्तरम् २०२१ वैक्रमाब्दे

(पञ्चायतसभा)

**मुक्तिबहादुरः-** अत्रत्या अधिकाः सदस्या मम विपक्षे गता इति तर्कयामि । नास्य शुभावहः परिणामो युष्मत्कृते । सम्यग् विविच्यताम् । अहं पञ्चप्रधानः । पूर्वपूर्वम् इव अधुनापि स्वस्थानं सुरक्षितं मया ।

**हरिप्रसादः-** दुष्कर्मणा स्वस्थानं सुरक्षितमिति मा स्मर्यताम् ।

**मुक्तिबहादुरः-** मा जल्प, तवापि ईदृशी शक्तिः ?

**रुद्रनाथः-** समयेन व्यवस्थया च दत्ता शक्तिः ।

**मुक्तिबहादुरः-** दारुच्छेदन एव शक्तिर्युष्माकम् ।

**शङ्करः-** शोषकोऽविवेकी च छिद्यते ।

**मुक्तिबहादुरः-** त्वमपि ? (उच्चैर्भर्त्सयति ।)

**शङ्करः-** नाहम्, न चायम्, न च सर्वे सदस्याः, न ग्रामवासिनः, न च प्रान्तवासिन एव, अपितु सर्वे अधिराज्यवासिनो यतन्ते शोषकोच्छेदनाय । (धने, मैया, सेती समागच्छन्ति । मैया कानिचित्



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पत्राणि घर्तीहस्ते स्थापयति ।)

**मुक्तिबहादुरः-** विरम तावद् हालिकपुत्र !

**शङ्करः-** आसनस्य मर्यादां परिपालयतु भवान् ।

**मुक्तिबहादुरः-** गोपालकर्मणा वीतजीवनस्त्वं मां मर्यादां शिक्षयसि ?

**शङ्करः-** गोपालकर्मणा पाशुपाल्येन कृषिकर्मणा च ग्राम्यजीवनं धारयन्ति सर्वे, ते एव अस्य ग्रामपञ्चायतस्य सदस्या भवितुम् अर्हन्ति न च दुराचारी पापात्मा शोषको द्यूतकरः कन्याविक्रयी च ।

**मुक्तिबहादुरः-** (आसनादुत्थाय) विविच्य मुखम् उद्घाटय दुष्ट ! एतानि अलीकविशेषणानि हि मृत्युपथं प्रापयिष्यन्ति त्वाम् । दूरम् अपसर । धने ! चूर्णय अस्य शिरो लकुटेन । धने ! पालय मद्वचनम् ... । किं तवापि अस्मिन् ग्रामे वासो नाभिप्रेतः ? (सदस्यान् प्रति) किं शृणुथ ? पश्यथ, नास्ति अत्र कोऽपि हितकरो मम । सञ्चूर्णयामि लकुटेन शिरो हि तस्य ।

**घर्ती-** श्रीमन् ! न रोषदर्शनावसरः अयम् । न कोऽपि लाभो मिथ्याप्रभावेण । (आसने स्थापयति । सभायां सर्वेषामधिकारो वचसाम् आदाने प्रदाने च ।

**मुक्तिबहादुरः-** किं सभायाम् परुषवचनानां प्रयोगस्य अपि अधिकारः ?

**घर्ती-** स तु त्याज्यः ।

**रुद्रनाथः-** पूर्वं भवता प्रयुक्तम् ।

**मुक्तिबहादुरः-** अहं तु प्रमापयामि स हालिक इति ।

**शङ्करः-** अहमपि प्रमापयामि, शृणुत । निशि बालकान् यूनो वृद्धान् च आहूय तेभ्य ऋणं दत्त्वा द्यूतं कारयित्वा मासत्रयाभ्यन्तरे वा षण्मासाभ्यन्तरे पशुभूम्यन्नादिकं गृह्णाति एषः । किं नायं दुराचारः ? नेदं द्यूतम् ? यं प्रति अस्य कुदृष्टिः पतति, तस्य क्षेत्रे अङ्कुरितानि अन्नानि च एषः गोमहिष्यादिभिः खादयति, किं नायं पापात्मा ? एकाकिनी सेती अस्मात् स्वसतीत्वरक्षणाय दशवारं पतिता, किं नायं दुराचारो व्यभिचारो वा ? रघोः सर्वस्वं मिथ्यापत्रादिभिः अनेन हृतम् । किं नेदं पापकृत्यम् ? शतद्वयस्थाने सहस्रद्वयकरणम् अनेन बहुवारं कृतम् । किं नेदं शोषककर्म ? धने जन्मद्वयेऽपि मुक्तिं न गच्छति अस्य ऋणात् । स्वभ्रातुः पुत्रीं दशवर्षारूढाम् अनाथां चायं परहस्ते विक्रीणीते । एतत् तु अत्रत्याः सर्वे जानन्ति । किं तद् सत्कर्म अस्ति ? एतादृशानि अनेकानि उदाहरणानि अस्य पापाचारस्य सन्ति । (ततः



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रविशति भूमिसुधाराधिकारी, सर्वे उत्थाय अभिवादयन्ति ।)

**अधिकारी-** कया गत्या चलति व्यवस्था ?

**मुक्तिबहादुरः-** श्रीमन् ! सम्यक् प्रचलति ।

**अधिकारी-** अत्रत्या जनाः तुष्टाः सन्ति ?

**मुक्तिबहादुरः-** सुखिनः सोत्साहाश्च सर्वे ग्रामम् उन्नतिदिशं नयन्ति ।

**शङ्करः-** श्रीमन् ! किञ्चिद् अहमपि विवक्षुः ।

**अधिकारी-** निःसङ्कोचं कथ्यताम् ।

**शङ्करः-** अत्रत्या जनाः सुसन्तुष्टाः न सन्ति, अस्य कारणं पञ्चप्रधान एव ।

**मुक्तिबहादुरः-** मिथ्या वदति श्रीमन् ! अयम् ।

**अधिकारी-** श्रूयतां श्रूयताम्, (शङ्करं प्रति) तत् कथम् ?

**मुक्तिबहादुरः-** श्रीमन् ! मां 'दुराचारी व्यभिचारी' इत्यादिशब्दैः विशिष्य एष आसनस्य मर्यादाम् उल्लङ्घयन् वर्तते ।

**शङ्करः-** यानि वक्तुकामः अहं तानि तस्य प्रमाणानि एव ।

**अधिकारी-** (शङ्करं प्रति) विरम तावत् त्वम् । त्वं कथय धने ! त्वं निवेदय स्वदुःखं प्रथमम् । कथय... कथय निःसङ्कोचं कथय ।

**मैया-** सेति ! त्वमेव निवेदय आत्मनि घटितं सर्वम् ।

**सेती-** (शनैः शनैः सलज्जम्) श्रीमन् ! अहं तु बहुकष्टेन सतीत्वं रक्षयन्ती अस्मि । वारं वारम् माम् आक्रामति एष भूस्वामी । मम पतिम् अपि कदापि ऋणाद् न मुञ्चति ।

**धने-** (हस्तेन भूमिं ताडयति ।) प्रभो ! शतद्वयस्थाने सहस्रद्वयं मिथ्या लिखितम्, द्वादशवर्षेभ्योऽनवरतम् अस्य कर्म कृतं तथापि एष मां न मुञ्चति ।

**अधिकारी-** देहि ऋणपत्रम् अस्य (मुक्तिबहादुरो ददाति ।) (अवलोक्य) को हरिप्रसादः ?

**हरिप्रसादः-** अहं श्रीमन् !

**अधिकारी-** श्रूयतां मद्वचनम् । कस्याम् अपि अवस्थायां न भेतव्यम् । ईश्वरं संस्मृत्य घटितं सत्यं व्यावर्ण्यताम् । किमनेन सहस्रद्वयं गृहीतम् ?

**हरिप्रसाद-** रुद्रनाथौ - सर्वमसत्यम् । केवलं पञ्चसप्तत्यधिकं शतद्वयं गृहीतम् ।

**बखतबहादुरः-** अहमपि साक्षी श्रीमन् ! सहस्रद्वयमेव गृहीतम् ।

**मैया-** श्रीमन् ! भागिनेयोऽयं तस्य ।

**अधिकारी-** लिख्यताम् अस्य पृष्ठे सर्वं गृहीतम् इति । (मुक्तिबहादुरो लिखति ।) धने ! गृहाण पत्रम् । अतः परम् अनिच्छया न करणीयं कार्यम् अस्य ।


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पञ्चसप्तत्यधिकशतद्वयेन द्वादशवर्षपर्यन्तं कर्म कृतम् अस्य ?

**धने-** (हृदयं सन्ताड्य) जय जय !

**शङ्करः-** रघोरपि तथैव मिथ्यारचनादिभिः लुण्ठितं सर्वस्वम् ।

**अधिकारी-** कः स रघुः ?

**घर्ती-** श्रीमन् ! अधुना नास्ति अत्र । त्रिभुवनविश्वविद्यालयस्य दीक्षान्तसमारोहे वर्तते, श्व एव आगन्ता ।

**शङ्करः-** स एव अस्य ग्रामस्य उन्नतेः कारणम् । समये समय अस्मान् निर्दिशति विकासाय ।

**घर्ती-** (मैयां निर्दिश्य) इमामपि शिक्षितां विधाय महिलासङ्घटनस्य नेतृत्वे प्रयुक्तवान्, अस्या अर्थे सर्वं व्ययं स एवं करोति ।

**अधिकारी-** इयं का ?

**घर्ती-** मम धर्मपुत्री, स एव अस्या पितृव्यः । (मुक्तिबहादुरं दर्शयति ।)

**शङ्करः-** एतेन विक्रीता ।

**अधिकारी-** कथम् ?

**घर्ती-** शतप्रस्थं शालिधान्यं प्रतिवर्षम् अस्या मूल्ये दातव्यं मया, परं पत्रम् अन्यथा लिखितम् ।

**अधिकारी-** देहि पत्रम् ।

**मुक्तिबहादुरः-** श्रीमन् ! पत्रं तु विनष्टम् । परम् अस्य कथनम् अलीकम् ।

**अधिकारी-** कथं नष्टम् ? कारागृहं वाञ्छसि ?

**मुक्तिबहादुरः-** प्रभो ! शरण्यो भवान् । (ददाति ।)

**अधिकारी-** (अवलोक्य) नववर्षपर्यन्तं गृहीतानि सर्वाणि धान्यानि प्रयच्छ अस्मै । नो चेत् कारागृहं गमिष्यसि । उत्तमर्णो होमनाथः कः ?

**होमनाथः-** अहम् अस्मि श्रीमन् !

**अधिकारी-** तव पञ्चशतं रुप्यकाणि मानबहादुरेण विवाहाय गृहीतानि ?

**होमनाथः-** एवम् एवं श्रीमन् ! दशकशतदत्तधनस्य अद्यावधि पणम् एकम् अपि कलान्तरं न दत्तम्, न च मूलम् । भूमेरायोऽपि नार्पितः ।

**मानबहादुरः-** श्रीमन् ! दशकलान्तरस्थाने चत्वारिंशत् प्रस्था धान्यानां गृहीताः । प्रतिवर्षं मया समुपार्जितम् अन्नं च एष बलाद् नयति ।

**अधिकारी-** सर्वम् असत्यं वदसि, मया सर्वं ज्ञातम् । पञ्चश्रीकस्य सर्वकारस्य नियमानुरूपेण यत्प्रतिज्ञातम्, तत्सर्वं त्वया दातव्यम् । त्वत्सदृशाः कतिपये दुर्जनाः सर्वकारस्य सदिच्छां मलिनीकुर्वन्तोऽसत्यं शस्त्रीकृत्य साधुजनान् प्रहरन्ति । अस्माकं नेपालेश्वरो महेन्द्रनृपतिः



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सकलाधिराज्यवासिनां तमसो ज्योतिः प्रापयितुम् उन्नमयितुं स्वदेशं च अनवरतं यतते । परं दुर्जना न बुध्यन्ते ।

**सर्वे-** एवम् एवम् ।

**अधिकारी-** अवशिष्टं कार्यं द्वितीयदिने करिष्यामि ।

॥ इति ॥

## षष्ठी कोशी

मार्गे (रघुनाथस्तस्य सखायश्च प्रविशन्ति ।)

**प्रथमः सखा-** रघुनाथ ! धन्यो धन्यो धन्योऽसि ।

**द्वितीयः सखा-** धन्योऽसि रघुनाथ !

**तृतीयः सखा-** तुभ्यं धन्यवादं प्रयच्छामि रघो !

**रघुनाथः-** भवन्त एव धन्यवादार्हाः ।

**प्रथमः सखा-** स्नातकोत्तरपरीक्षायां भवान् सर्वप्रथमस्थानं प्राप्तवान् । कथं वयं धन्यवादार्हाः ।

**रघुनाथः-** एतत्तु भवत्सदृशां सखिजनानाम् सदनुकम्पया, अन्यथा पर्वतीयतृणं पुष्पस्य रूपं कथं प्राप्नुयात् ?

**द्वितीयः सखा-** अतः परं का वाञ्छा ?

**रघुनाथः-** ग्रामस्य सेवायां जीवनं यापयिष्यामि ।

**तृतीयः सखा-** तेन कर्मणा बौद्धिको विकासो न सम्भवति ।

**रघुनाथः-** सखे ! 'अयमेव बुद्धेर्विकासः' इति मन्ये ।

**प्रथमः सखा-** तत् कथम् ?

**रघुनाथः-** अनक्षरा अज्ञानिनश्च बहवो जनाः तृणवद् अङ्कुरिताः सन्ति, तृणवद् विकसन्ति यथासमयम्, नीरसतां प्राप्नुवन्ति च काले, अन्ते विनश्यन्ति च । न कोऽपि जानाति तेषां नामानि अपि । यदि कोऽपि मालिकस्तत्र सम्भवेत् तेषु कतिपये पुष्पाणि इव राष्ट्रस्य आह्लादका भवन्ति, यैश्च गौरवं प्राप्नोति राष्ट्रम् ।

**द्वितीयः सखा-** तर्हि भवान् ग्रामवासिनां मालिककर्म वाञ्छति ?

**रघुनाथः-** एवम् ।

**प्रथमः सखा-** सुकुमार एष विचारः । भवतः प्रेरणया पञ्चायतसदस्या अपि सुन्दरं कार्यं कुर्वन्ति । अस्माकम् एष विदितो विषयः ।

**तृतीयः सखा-** (किञ्चिद् विहस्य) मैयायाः का वार्ता ?


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**रघुनाथः-** सा तु मम शक्तिरेव । शक्तिं विना न कः अपि प्रभुः कार्यसम्पादने ।

**प्रथमः सखा-** निःसंशयम् । वयमपि भ्रमणाय आगमिष्यामः किञ्चित्कालानन्तरम् तव ग्रामम् ।

**रघुनाथः-** अवश्यम् । अस्मादेव ग्रामः शोभनां दशां गमिष्यति । अनुज्ञां वाञ्छामि गमनाय ।

**सर्वे-** गम्यताम् अर्थसिद्धये । (गच्छति ।)

## सप्तमी कोशी

**हरिप्रसादः-** अद्यास्य ग्रामस्य महोत्सवदिनम् । प्रतिवर्षं स्मृतिदिनं भविष्यति ।

**रुद्रनाथः-** सत्यम्, तादृशीं दुर्दशाम् आपन्नो ग्रामः एतादृशम् अभ्युदयपथं यास्यतीति केन ज्ञातम् ? सर्वं भवतो निर्देशनम् ।

**रघुनाथः-** न तदेव कारणम् अत्र । सर्वकारैः प्रदत्ता कल्याणकारिणी व्यवस्था तथा उन्नयनाभिलाषिणो ग्रामवासिनश्च अत्र हेतुभूता एव ।

**शङ्करः-** सत्यं वदति भवान् । त्रिभुवनविश्वविद्यालयस्य स्नातकोत्तरपरीक्षायां सर्वप्रथमं स्थानं गतो भवत्सदृशो ग्रामबन्धुः प्राप्तो ग्रामवासिभिः उच्चाभिलाषिभिः ।

**रघुनाथः-** सर्वं सत्यम् । परम् अहम् अस्मिन् क्षणे (मैयां प्रदर्श्य) 'पठनेन शक्तिः आयातीति भैरवस्य गुरुः कथयति, त्वमपि पठ' इति अस्याः प्रेरणादायकं वाक्यं स्मरामि ।

**घने-** अहमपि किञ्चित् कथयामि ।

**रघुनाथः-** कथय कथय ।

**घने-** घर्तीमातुलोऽपि अत्रैव वर्तते । मैयाया रघोश्च विवाहो भवेद् इति अहं वाञ्छामि । वैवाहिकस्य सम्बन्धस्य प्रस्तावश्च अस्मिन्नेव महोत्सवे प्रसरेत् ।

**सर्वे-** प्रस्तावः समीचीनः ।

**रघुनाथः-** कथम् ?

**घने-** सर्वं कार्यम् अहं सम्पादयामि ।

**रघुनाथः-** का विशेषता एतादृशकर्मणः सम्पादने । ग्रामस्य उन्नत्यै कार्यसम्पादने प्रतिज्ञां कुरु । इयम् एव वार्ता ।

**घर्ती-** मम मैयायां तादृशं स्वत्वं न वर्तते यादृशम् अत्र भवतः, यथा कथयति अत्र भवान् ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**रघुनाथः-** भवता सम्यक् परिपालिता रक्षिता च एषा । अस्याः साक्षात् पिता एव भवान् । यद्यपि मया अस्या वस्त्रान्नपठनादीनां व्यवस्था कृता। परं भवतः अनुज्ञाम् उल्लङ्घ्य को विहितविधानः स्यात् ?

**मैया-** (रघुं प्रति) यद् अस्माद् वर्षाद् अधिकारिणाम् आज्ञानुसारेण सर्वे धान्यानि भवते ददतीति भवतो भूकर्षकाः कथयन्ति । तत् कुत्र स्थाप्यते ?

**रघुनाथः-** यत्र त्वं वससि तत्रैव स्थापय ।

**धने-** अत एव मया कथितम् 'युवयोर्विवाहो भूयात्' इति । सुन्दरं गृहम् एकम् अहं रचयामि तत्रैव धान्यमपि स्थाप्यते ।

**हरिप्रसादः-** सम्यग् अभिहितवान् धने । नूतनगार्हस्थ्यम् उपभुज्यताम् ।

**रघुनाथः-** (मैयां प्रदर्श्य) इयं मयि शक्तिरूपेण स्थिता । नीरक्षीरयोः इव आवयोः सम्बन्धः । परम् इदानीम् अहं नूतनगार्हस्थ्यम् उपभोक्तुम् असमर्थः। यावद् अत्रत्यः कश्चिदपि जनो विनर्णं विवाहं न सम्पादयति तावद् अहमपि न ।

**रुद्रनाथः-** भीष्मप्रतिज्ञा सञ्जाता ।

**मैया-** नैषा भीष्मप्रतिज्ञा ग्रामसेवायाः प्रवृत्तिरियम् । एकीभूय करणात् सम्पद्यते मनोरथः ।

**शङ्करः-** क्रियते तदपि, परं ग्रामस्य कलङ्क इव मुक्तिबहादुरः पञ्चप्रधानस्य स्थानम् आरुह्य सर्वं विकासकार्यं रुणद्धि । केवलं ग्रामवासिषु कलहम् उत्पाद्य भ्रष्टाचारम् आचरति ।

**रुद्रनाथः-** एतादृशां दुराचरणैः क्वचित् कल्याणकारिणीम् अपि व्यवस्थाम् अज्ञा ग्रामवासिनो न अवगच्छन्ति ।

**रघुनाथः-** व्यवस्था एषा समस्तानपि सन्मार्गे नयति । यदि न गच्छन्ति ते सन्मार्गम्, तर्हि ते शिक्षितैः त्यज्यन्ते । अतः सर्वे स्वकीये कार्ये दत्तचित्ता भवन्तु ।

**हरिप्रसादः-** (मैयां प्रदर्श्य) अनया प्रथमपत्न्यां वर्तमानायां निश्चितोऽपि गोपालस्य द्वितीयविवाहो विनाशितः ।

**रघुनाथः-** न एतदेव महिलासङ्घटनस्य कार्यम् ।

**रुद्रनाथः-** किमन्यत् ?

**रघुनाथः-** अन्यापि वर्तते ग्रामस्यावश्यकी क्रिया ।

**हरिप्रसादः-** श्रोतुं वाञ्छामः ।

**रघुनाथः-** श्रूयताम्, विधीयताम् । पिटकशूर्पादीनां निर्माणं तव


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नेतृत्वे स्थापयामि । (सेतीहस्ते वंशखण्डं स्थापयति ।) वस्त्राणां निर्माणच्छेदनरचनादयः, सुस्वादुभोजनस्य पाकशिक्षा, कोष्ठादीनां मण्डनम्, आदेयप्रदेयस्य विवेचनम्, गृहे चायव्ययोः सङ्ख्या, एतत् सर्वं तव नेतृत्वे स्थापयामि । (मैयायै पोटलिकामेकां ददाति) गृहस्य गृहाङ्गणस्य कलात्मकं मण्डनम्, वैयक्तिकस्य सार्वजनिकस्य चोपवनस्य निर्माणम्, तत्र फलपुष्पाणां व्यवस्था, जलानां स्रोतः प्रपा च, एतत् सर्वं भवत्याः नेतृत्वे स्थापयामि । (रुद्रनाथाय लघ्ववदारणं ददाति ।) कृषेः नवीना वैज्ञानिकी च व्यवस्था, शालेयस्य यव्यस्य माष्यस्य मौद्गीनस्य कौद्रवीणस्य तथा शाकशाकिनादीनाञ्च ज्ञानम्, मलजलादीनां व्यवस्था च एतत् सर्वं भवतो नेतृत्वे स्थापयामि । (हरिप्रसादाय लोष्टभेदनं ददाति ।) मार्गादीनां कुल्यादीनाञ्च व्यवस्था तव नेतृत्वे स्थापयामि । (धने हस्ते बृहदवदारणं स्थापयति ।)

**धने-** अहं करोमि, सर्वान् आहूय कार्यं करोमि ।

**रघुनाथः-** एवम् आशासे । पशूनां वृक्षाणाञ्च व्यवस्था भवतो नेतृत्वे स्थापयामि । (घर्तीहस्ते दामनीं स्थापयति ।) स्वास्थ्यसम्बन्धिनो विविधविषया तथा औषधानां व्यवस्था च एतत् सर्वं तव नेतृत्वे स्थापयामि । (पुस्तकं पोटलिकां ददाति शङ्कराय ।) शिक्षासम्बन्धिन्यां व्यवस्थायां युष्माकं सेवायां चात्मानं नियोजयामि साधनसाक्षिकतया सर्वैः प्रतिज्ञा कर्तव्या ।

**सर्वे-** कृताः प्रतिज्ञाः, कार्यं वा साधयामोदेहं वा पातयामः ।

(जवनिका पतति ।)

(अत्र सर्वे स्वस्वकर्तव्यस्य कर्मणः सूक्ष्मप्रकारं रचयन्तो दृश्यन्ते ।)

भरतवाक्यम्

माहेन्द्री समुदारता प्रसरति कोशीव या गण्डकी
स्वार्थं तद्धि परार्थमेव यतनं यस्या भवेत् सर्वदा ।
नेपाले जलदेव यच्छति सदा यज्जीवनं वाञ्छितं
देशे वाञ्छति शास्त्रसंस्कृतिकृषेरुत्कृष्टतां शोभनाम् ॥

(वि.सं. २०२६ मा त्रिभुवनविश्वविद्यालयद्वारा प्रकाशित 'सुरभि', पृष्ठ- ७६-९१)



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

# मातृहत्याधारम्

प्रा.तोयनाथपाण्डेयः

(नान्द्यन्ते प्रविशति सूत्रधारः)

**सूत्रधारः-** अद्य महोत्सवं सफलीकर्तुमुपस्थितान् सम्मान्यान् महानुभावान् प्रणिपत्य विज्ञापयामि यत् कालः अयम् अस्माकं निर्माणकालः। अपि च तस्मिन् प्रथमं सरलतायाः स्थानम्। किमु सरलमार्गम् एव उन्नतमार्गापेक्षया कामयन्ते, सर्वे गन्तुञ्च सुखेन पारयन्ति।

**नटी-** आर्य ! सर्वे सज्जीभूताः कलाकाराः।

**सूत्रधारः-** आम् प्रिये ! सरलमार्गगमने विज्ञाप्यन्ते आर्यमिश्राः।

**नटी-** कोऽभिप्रायो वाक्यस्य।

**सूत्राधारः-** सरलसंस्कृतेन लिखितं श्रीतोयनाथपाण्डेयस्य मातृहत्याधारम् नाम नाटकं प्रस्तूयते।

**नटी-** तर्हि स्वल्पज्ञैरपि सुखेनावगम्येत।

**सूत्राधारः-** आम्, तदैव लेखकेन सफलश्रमेण भूयते।

(नेपथ्ये शब्दं श्रुत्वा)

प्रिये ! त्वरयन्ति कलाकाराः। अनुमतिं प्रार्थयावो गन्तुम्।

(इति निष्क्रान्तौ)

## प्रथमं दृश्यम्

**जमदग्निः-** (दग्धां पर्णशालामवलोक्य) ईदृश्यवस्था पर्णशालायाः हस्तस्य च मम। सा वै दुष्टा कारणमस्याः। (इतस्ततो भ्रमति।)

**विश्वावसुः-** प्रसीदतु प्रसीदतु महागुरुः। आनीतम् इदम्।

**जमदग्निः-** किम् आनीतम् ?

**विश्वावसु-** अनुलेपनम् इदम्।

**जमदग्निः-** भवतु (हस्तं प्रसारयति।)

**विश्वावसुः-** अहो ! भीतिप्रदोऽयम् अभिघातः।

**जमदग्निः-** तुच्छजीव ! केवलं स्नेहबुद्ध्या बाह्वभिघातस्तव दृष्टिपथे समागतः। विज्ञानेनान्तःस्थं क्षतं ज्ञातुं परं न पारयसि। मनोविज्ञानेन आन्तरिकभावनाया ज्ञानमेव विज्ञानम् अस्मदृषिकुलानाम्।

**विश्वावसुः-** एवमेतत्।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**जमदग्निः-** ननु पाककला कथम् अस्माभिः ज्ञेया ?

**विश्वावसुः-** नहि तपोधनानाम् एतत् कर्म ।

**जमदग्निः-** मध्याह्ने प्रयाता स्नानाय किमर्थं चिरयति माता ते !

**विश्वावसुः-** अपूर्वो विलम्ब आचरितोऽद्य ।

**जमदग्निः-** तर्कयामि कस्मिन्नपि व्यभिचारे तया समालिङ्गितोऽयं कालः ।

**विश्वावसुः-** क्षम्यतां महागुरुः । अनिष्टम् आपततं तर्कयामि ।

**जमदग्निः-** कथमिव ?

**विश्वावसुः-** एकाकिनी पदवीम् आरण्यकीं गता व्याघ्रभल्लूकादिभिराक्रान्ता इव ।

**जमदग्निः-** अत्रापि स्नेहबुद्धिस्ते ।

**विश्वावसुः-** प्रसीदतु प्रसीदतु महागुरुः । वन्यजन्तुषु तपोधनपरिवारबुद्धिः कथम् उद्भवति ! ते तु व्यवहरन्ति समानं सर्वेषु प्राणिषु ।

**जमदग्निः-** न ह्येतत् । परिस्थितिम् अन्यां शङ्के । किं नाम विषयवासनाजन्यो न ते मातरि दोषः ?

**जमदग्निः-** असम्भवं मन्ये तपस्विजनधर्मपत्नीषु एतं दोषम् ।

**विश्वावसुः-** मौनमेव अवलम्बस्व तुच्छजीव !

## द्वितीयं दृश्यम् (मार्गे)

(घटं धारयन्ती रेणुका प्रविशति ।)

**रेणुका-** अहो ! अत्याहितम् । अतीव चिरायिता अहम् । यथा रविः तापदः भूभागस्य अस्य प्रत्येकं रेणुकायै क्रुध्यति, मुखेन आरक्तेन तथैव प्रचण्डो जमदग्निर्मह्यम् । कथं पश्यामि पीताऽऽतपाक्रान्तां जटां जमदग्नेः शटामिव सिंहस्य, कण्ठस्थां तस्य रुद्राक्षमालां वृत्ताकारपृष्ठमिव सर्पस्य, लम्बमानौ बाहुदण्डौ अपराधचण्डौ इव । कथं शृणोमि तस्य मुखान्निःसृतानि परुषवचनानि नन्दन्ति इव अशिक्षितैः ताडिता मृदङ्गाः ? कथमुत्तरं विज्ञापयामि क्षतकरस्य अविरलकृतप्रश्नस्य ? मयापि अनुचितम् अनुष्ठितम् अद्य, मलत्यागेन अशुचिशरीरा श्राद्धपाकाय मध्याह्ने स्नानार्थं गता इयमस्मि प्रत्यागच्छन्ती । हन्त ! किं करोमि अनपराधेषु अपि कृशानुप्रतिमः स्वामी किं पुनर्मयि कृतापराधायाम् ? कथमुपगच्छामि भर्तारम् ? अनन्यशरणायाः का गतिः ?



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

## तृतीयं दृश्यम्

**रेणुका-** (प्रविश्य पर्णशालाम्) अविह ! अविह ! कथं कथं पर्णशालाया नामावशेषम् ?

**विश्वावसुः-** किं कृतम् इदम् अद्य मात्रा ? किम् आपतितं विलम्बस्य कारणम् ?

**रेणुका-** अकारणेनैव ।

**विश्वावसुः-** नैतद् युज्यते कर्तुम् । वयम् अपि तिलमधुपुष्पेभ्यो गताः । ब्राह्मणभोजनाय चुल्लिकायां स्थापिते तैलतप्तभाण्डे कालशाकं निदधति पितरि तस्माद् निःसृतया ज्वालयाश्छदनस्य एतादृशी दशा । हस्त एकोऽपि दग्धः पितुः ।

**रुमण्वान्-** (पितुरन्तिकं प्रविश्य) अहो ! इयं माता ।

**जमदग्निः-** (अवलोक्य) किम् आचरणम् एतत् ? कुत्र गतासि ? न ज्ञायते किमद्य श्राद्धदिनम् ? को हेतुः विलम्बस्य ? (अन्तिकं गत्वा) किमर्थं मौनम् अवलम्बसे ? आमन्त्रितो गतोऽभुक्त एव आत्रेयः । स्नानमात्रेण आगतायास्तव कथं दीर्घकालो व्यतीतः । किमर्थं नाभिभाषसे चाण्डालि ?

**रेणुका-** समाप्तस्नानायाः प्रत्यागच्छन्त्या मम उपरि काकेन विष्टा पातिता, द्वितीयवारे सर्पेण अवरुद्धो मार्गः ।

**जमदग्निः-** मिथ्याभाषिणि ! एकविंशतिवारं यातायातपर्याप्तस्त्वया विलम्बितः कालः । मूर्खं मन्यसे मां ? सत्यं वद ।

**रेणुका-** सत्यं विज्ञापयामि क्षम्यताम् । सपत्नीकं चित्ररथं राजानं जलक्रीडासक्तं दृष्ट्वा तत्र गमने विघ्नरूपिणी भविष्यामि इति मत्वा प्रतीक्षितः कालः ।

**जमदग्निः-** विस्तरेण व्याख्यायतां न पुनः समासेन ।

**रेणुका-** यावद्धि नदीतटः प्राप्तो नद्याम् उभौ जलक्रीडासक्तौ राजदम्पती सहसा दृष्टिगोचरे समागतौ, न गन्तव्यं क्रीडास्थले स्त्रीपुरुषयोरिति विटपेन अन्तरिता ।

**जमदग्निः-** ततस्ततः ।

**रेणुका-** वर्धितक्रीडास्वादस्य राज्ञो गभीरं जलं गच्छतो हस्त एकः समाकृष्टो निवारयन्त्या राज्ञ्या, ततस्तेन अभिहितः 'कातरे ! का हानिः ? गच्छावस्तावद्' इति । तत्र गमने अनिच्छन्त्याः राज्ञ्याः कपोलः


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तेन आकृष्टः । 'किं कृतम् इदम् ? अपस्रियताम्' इत्युक्त्वा यावद्धि पृष्ठतः सा अपासरत् अपतत् च एकशृङ्गिमत्स्योपरि । ततस्तया समालिङ्गितः पतिः क्रन्दन्त्या भीतध्वनिना 'परित्रायतां परित्रायतां महाराजः' इति । ततस्तेनापि समालिङ्ग्य सा चुम्बिता । प्रसीद स्वामिन् ! तदवलोक्य रोमाञ्चिताहं मोहम् उपगता ।

**जमदग्निः-** ततस्ततः ।

**रेणुका-** ततस्तीरम् उत्तीर्य राजा राज्ञी च परस्परं वेशभूषादिकं समाप्य अन्योन्यं प्रेम्णा ददृशतुः । राज्ञ्याः शृङ्गारतिलकं व्रणम् इति व्याजीकृत्य स तस्याः कपोलसमीपं स्वमुखं नीतवान् । सापि प्रणयकुपिता पलायितुम् ऐच्छत् । राजापि दृढं प्रगृह्य बाहुभ्यां तां चुचुम्ब । तयापि तथैव आचरितम् । एतद् द्रष्टुम् अपारयन्ती अहं पुनः मोहम् उपागता ।

**जमदग्निः-** ततस्ततः ।

**रेणुका-** ततो मोहान्मुक्तया मया यावद् नयने उद्घाटिते तावद् उभौ दृष्टिपथे नागतौ । ततः स्नात्वा प्रत्यागतास्मि ।

**जमदग्निः-** आम् इदमेव विस्तृतं व्याख्यानम् ? राजानं दृष्ट्वा विकृतं तव मनः । किं नास्ति सत्यम् ? कथय किमुत्तरम् ? किमर्थं न वदसि चाण्डालि ?

**रेणुका-** प्रसीद स्वामिन् । भवत्सदृशां महायोगिनां समक्षं न कोऽपि लाभो मिथ्यावादेन । सत्यं स्वामिन् ! मनोहरम् अतीव रूपं राज्ञः । विशालं चत्वरम् इव ललाटम् शुकशिशोः इव नासिका, कुरङ्गस्य इव नयने, सुपुष्टौ कपोलौ, श्रेणीबद्धा द्विजाः, धृतदिव्यकुण्डलौ सुकर्णौ, दिव्यवेशभूषायुक्तं शरीरं कस्याः मनो न हरति । का कथा स्वभावसौन्दर्यप्रियाणाम् अस्मत्सदृशानां नारीजनानाम् । प्रसीद महर्षे ! भवतो मनसि च विकारम् उत्पद्येत यदि धृते स्त्रीशरीरे ।

**जमदग्निः-** वेश्या असि, सत्यं वेश्या असि । रुमण्वन् ! श्रुतं त्वया विस्तृतं व्याख्यानम् ? किं पश्यसि व्यभिचारिण्या मातुर्मुखम् ? खण्डद्वयं विधेहि पापपूर्णाया अस्याः शरीरम्, येन हृदा व्यभिचरितं तस्मिन् हृदि छुरिकां निखातय । अहं तु एतादृश्या व्यभिचारिण्या मुखमपि द्रष्टुं नोत्सहे ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**रुमण्वान्-** प्रसीदतु महागुरुः । तप्तेन रोषेण दुर्वासाः स्वयमेव दह्यते । सम्यग् मननीयोऽयं विषयो न सामाजिकी भवतां वाणी । इयं जननी मे । नाहं प्रहर्तुं शक्नोमि । इयम् अस्ति छुरिका ।

**जमदग्निः-** (विश्वावसुं प्रति) को विवेकस्ते ?

**विश्वावसुः-** अयमेव ।

**जमदग्निः-** न मम आवश्यकता अस्या ग्रहणे । केवलं जलबिन्दुद्वयेन भस्मसाद् विश्वस्य कर्तुं प्रभवामि यैः पुत्रैः पिता नाम किल एवं नाद्रियते, शीघ्रं दुःखावर्ते पतत यूयम् ।

**परशुरामः-** (प्रविश्य) (आत्मगतम्) किम् अनुचितम् अनुष्ठितम् अग्रजैः ? अश्रुतपूर्वोऽयं चण्डः शब्दः प्रवहति पितुः मुखात् । सङ्क्रुध्यति किं मह्यम् अपि ? पितुः प्रसन्नता फलदायिनी इति विहितम् एतत् कष्टम् । न पीता जलकणिका अपि अत्र । (प्रकाशम्) नमो महागुरवे । (पादयोः पतति ।)

**जमदग्निः-** उत्तिष्ठ न तवापि प्रयोजनम् । तवापि विवेको भविष्यति अग्रजानाम् इव ।

**परशुरामः-** महागुरो ! मम जनको गुरुश्च भवान् एव । अनन्यशरणोऽहम् । न साधारणो जनको भवान् अपि तु येन विश्वस्य परिचायके नेत्रे उद्घाटिते । भवत्सदृशाद् योगिराजाद् जन्मना धन्यः अहम् । भवति प्रसन्ने मत्तः सर्वे देवप्रमुखाः प्रसन्नाः । सर्वथा पालयामि महागुरोः आज्ञाम् ।

**जमदग्निः-** दृढप्रतिज्ञः असि अस्मिन् ?

**परशुरामः-** अस्मि ।

**जमदग्निः-** सत्यम् असि ?

**परशुरामः-** अस्मि ।

**जमदग्निः-** करोषि ?

**परशुरामः-** करोमि महागुरो ! सर्वथा करोमि । यदि कृतं प्रतिज्ञाया भ्रष्टं तदा उपहरामि इदं शिरः ।

**जमदग्निः-** आम् तर्हि परशुना अनेन छिन्धि तव जनन्याः शिरो वा मम । उन्नमय परशुम् । राम ! प्रतिपादय प्रतिज्ञाम् ।

**रेणुका-** राम ! बालोऽसि कथं मातृहत्यायै दृढप्रतिज्ञः ? पित्रोः आज्ञापालनं नाम


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पुत्रस्य परमं कर्तव्यम् । परं क्रोधोपहतविवेकस्य पितुर्न । शक्नोषि चेत् पितरं प्रशमय । तात ! पश्य मया सर्वं जीवितम् अस्मिन् गृहकृत्ये व्यतीतम् । पाकाद् आरभ्य भाण्डसंस्कारादिकर्म मयैव विहितम् अद्यावधि । यच्च यावच्च कर्म गृहस्य एताभ्यां बाहुभ्यां सम्पादितम् । उत्थाय ब्राह्मे मुहूर्ते न विश्रान्तम् अर्धरात्रं यावद् एकपलम् अपि । केवलं तव पितुः सेवया यापितः कालः । प्रत्येकं युष्माकं जन्मनि गृहकृत्याद् निवर्त्य दिनदशकमेव विश्रान्तिसुखम् अनुभूतम् । प्रतिपद्य महायोगिनं भर्तारं विविधसुखस्य महती धृता आशा, परं तव पितुर्मम कृते महासक्तेर्मिथ्योपलब्धिः । प्रथमप्रवेशाद् अस्य आश्रमस्य सुखशब्दोऽपि परकीयः संवृत्तः । ज्ञात्वापि विहितां सत्यसेवां वाक्यमेकम् अपि प्रशंसाया नोष्ठगतं तव पितुः । केवलम् अत्र श्रुता क्रोधोपहतचेतसः तव पितुः भर्त्सना, दृष्टे च रोषसंरक्तलोचने । राम ! त्वया अपि अनुभूत एव एष विषयः ।

**जमदग्निः-** एतत् कर्तव्यं ते । सर्वासां गृहिणीनां सनातनी क्रिया एषा । राम ! प्रविश मातुः वचने, स्मर प्रवञ्चनाम् एव । कीदृशी धूर्ता वर्तते त्वन्माता । धूर्ते ! त्वया सह कृतेन प्रियालापेन अपहासेन च कमपि मां न अवगच्छसि । धिक् ! प्रियालापम् उपहासं च, यौ हि शक्तिशालिनम् अपि तृणम् इव दर्शयतः ।

**रेणुका-** न प्रियालापेन परम् अविरलकृतपरिभवेन ।

**जमदग्निः-** मौनमवलम्बस्व चाण्डालि ! राम ! सुखस्य आध्यात्मिकस्य उन्नतिशिखरे प्रापयितुं तव मातरम् कृतनिश्चयः आसं परं कथम् ? श्रुतं त्वया चित्ररथं दृष्ट्वा अद्य मोहम् उपगता एषा । (स्वगतम्) कतिपयानि वाक्यानि जानाति । कीदृशी वेश्या ? (प्रकाशम्) वेश्ये ! स्वल्पा अपि व्यग्रता महता रूपेण व्याख्याता किमर्थम् अद्य कृतो व्यभिचारो न व्याख्यातः । जानासि ? यथा आजीवनं पयःपुष्टशरीरः अपि एकदिनस्य विषभक्षणेन नश्यति तथैव आजीवनं कृतसेवापि त्वया नाशिता अद्य व्यभिचारेण ।

**रेणुका-** (अश्रूणि प्रमृज्य) कीदृशी कथा ! तिलतुल्योऽपि अपराधः शैलपरिमितः सम्पादितः । नास्ति लज्जा ? भार्याया अन्यथाकरणं शास्त्रसम्मतं किम् ? अस्या बुद्धिर्बलञ्च नास्ति किं कर्तुं शक्नोति इति भवेद्



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विवेको भवतः । परम् अहं सुशिक्षिता पित्रा । जायापत्योः स्थानं जानामि सम्यक् । परं न जानाति भवान् जायास्थानम्, यज्ञपशुः इव मा स्मर्यतां भार्या । उच्चकुलजा सुखेन लालिता अपि पितृवेश्मनि जानामि नैपुण्येन अस्त्रविद्याम् । मत्त एव गृहीता शस्त्रविद्या रामेण। मया प्रेरितः प्रविष्टो धनुर्विद्यायाम् एषः । किमपि न जानाति भवान् रसं कामविद्यायाः, अर्थविद्यायाश्च ।

**परशुरामः-** प्रतिपद्य स्त्रियो जन्म न शोभते अधिकजल्पनं भर्त्रा सह कर्णकटुः प्रलापश्च ।

**रेणुका-** एकद्विवारं चञ्चलं मनः कस्य न स्खलति । पुत्रीं सरस्वतीं दृष्ट्वा धाता अपि पुरा मुग्धः । न प्रदत्तो दोषोऽत्र । मानसिकापराधे कथं शारीरिको दण्डः ।

**जमदग्निः-** चौरस्य तारः स्वरः ? राम ! किं चिन्तयसि ? किं शृणोषि ? किं पश्यसि दुराचरणम् ? नोत्सहे व्यभिचारिण्या मुखम् अपि अवलोकयितुम्, छिन्धि छिन्धि अस्याः शिरः । (परशुरामो निःश्वस्य परशुं गृह्णाति ।)

**विश्वावसुरुमण्वन्तौ-** राम ! राम ! धैर्यं धारय स्मर विश्वस्य अनित्यताम् । महापापाचारे मा गच्छ । मातृहत्यया मुनिकुलं मा दाहय । (रामः परशुं त्यजति मोहं च गच्छति ।)

**जमदग्निः-** राम ! राम ! (जलं सिञ्चति ।) राम ! मातृस्नेहेन आच्छन्नं ते हृदयम्, छिन्धि मम शिरः । उच्चालय परशुम् । न करोषि ? भवतु। अहमेव देहत्यागं करोमि । (पद्मासने वसति ।)

**परशुरामः-** क्षमस्व क्षमस्व महागुरो ! करोमि करोमि सर्वथा आज्ञायाः पालनम्। (परशुं गृहीत्वा मातरं गच्छति ।)

**रेणुकाविश्वावसुरुमण्वन्तः-** राम ! क्षमस्व क्षमस्व, मातृहत्यया न कोऽपि लाभः ते।

**परशुरामः-** क्षम्यताम्, न स्वाधीनोऽयं जनः, स्मर्यतां भर्तृदेवपादाः । (छिनत्ति मातुः शिरः । पतितां मातरं दृष्ट्वा शिरः पितुः समीपमानीय शनैः शनैः पतति मूर्च्छया ।)

**जमदग्निः-** (विहस्य) धन्यवादार्हो मत्कनिष्ठः । वसुधे ! वह मत्कनिष्ठम्, सफला ते वहनक्रिया । वायवः ! सेवयत मत्कनिष्ठम्, सफला ते जीवसेवा। मेघाः ! सिञ्चत मत्कनिष्ठम् । तेजः ! समागच्छ मत्कनिष्ठम् ।


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आकाश ! रक्ष मत्कनिष्ठम्, प्रापय अस्य यशः त्रिभुवनम्। धन्यवादार्हो मत्कनिष्ठः । महासङ्कटे अपि पालितं पितुर्वचनम् । (अन्तिकं गत्वा) उत्तिष्ठ वत्स ! मोहम् अपनय (जलं सिञ्चति) । चिरञ्जीवी भव । प्रसन्नोऽस्मि, हृदयात् प्रसन्नोऽस्मि । वरं ब्रूहि ।

**परशुरामः-** महागुरो ! प्रसन्ने भवति सर्वञ्च मयि वर्तते । तथापि पितृपादानाम् अनुग्रहं वाञ्छामि ।

**जमदग्निः-** कथय कथय निःशङ्कं सर्वम् ईप्सितम् ।

**परशुरामः-** प्राप्स्यामि ननु ?

**जमदग्निः-** अवश्यं योगबलेन तपसो व्ययेन च सर्वं सम्पादयामि हृद्गतं तव ।

**परशुरामः-** तर्हि माता जीवतु मे । आसादयेत् पुनरपि भर्तुः प्रेमसुखं चाध्यात्मिकम् । गतमोहौ भ्रातरौ च भवेताम् ।

**जमदग्निः-** तथास्तु राम ! तथास्तु उत्तिष्ठ योजय शिरो मातुः । (परशुरामः शिरो योजयति ।)

**जमदग्निः-** (जलं सिञ्चति ।) उत्तिष्ठ रेणुके !

**रेणुका-** (शनैः शनैः उत्थाय) उद्दीपितज्योतिरस्मि, विजयन्तां भर्तृपादाः । (पादयोः पतति ।)

**जमदग्निः-** जीव (पुनः पुत्रौ जलं सिञ्चति ।) उत्तिष्ठतम् । गलितशेषशापौ भवतम् ।

**उभौ-** (उत्थाय) अनुभूतशापदुःखाद् मुक्तौ स्वः । विजयन्तां पितृपादाः ।

**जमदग्निः-** वर्धेथाम् (रामं प्रति) किं ते भूयः प्रियं करवाणि ?

**परशुरामः-** अतः परम् अपि प्रियम् अस्ति । तथापि इदम् अस्तु ।

भरतवाक्यम्

भार्या भर्ता च शश्वत्प्रणयपरिचितौ स्नेहबुद्धिं दधाना-
वन्योन्यं पार्वतीशाविव समरसिकौ योगिनौ नित्यमास्ताम् ।
प्रत्नां नूत्नां च विद्यां नरपतिजनतादेशभूत्यै स्मरन्तु
नेपालेशो महेन्द्रो विधिविहितनयो राजसिंहः प्रशास्तु ॥

(२०१७ तमे वैक्रमाब्दे प्रकाशितम् 'जयतु संस्कृतम्', वर्षं-१, अङ्कः- ५, पृष्ठम् ५-१०)



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

# निशापुरेशायनम्

प्रा.डा. ध्रुवप्रसादभट्टराई

(भव्यः प्रासादः । गौराङ्गानां वैदेशिकनेतृणाञ्च चित्रैः सभाकक्षः अलङ्कृतः, वैद्युतप्रकाशेन नितरां प्रकाशितश्च, परं पुरे अहोरात्रं सर्वत्र निर्दीपनम् । मध्ये घूर्णासन्दिकाम् अधितिष्ठति निशापुरेशः । मुखे तम्बाकुनलिका वर्तते । क्षणे क्षणे धूमं निष्कासयति । अप्सरायमाणाः परिचारिकाः शनैः शनैः परिचालयन्ति व्यजनम् । परितो भटाश्चाटुकाराः अनुचराश्च विराजन्ते भीषणकायाः । सूर्यग्रहणं प्रारब्धम् । युगपदेव श्रूयते बहिः कोलाहलध्वनिः ।)

**द्वारपालः-** (प्रविश्य कातरस्वरेण) जयन्तु प्रभुवर्याः ! सेवकगण आगतोऽस्ति। भवतां कृपया मेलनं कामयते ।

**निशापुरेशः-** के सन्ति तत्र ?

**द्वारपालः-** रक्षिणः, प्रभुवर्याः ! चिराय प्रतीक्षमाणाः सन्ति ।

**निशापुरेशः-** आनय तान् शीघ्रम् ।

**द्वारपालः-** यद् आज्ञापयन्ति प्रभुचरणाः ! (निर्गच्छति)

**रक्षिणः-** (प्रविश्य सामूहिकस्वरेण) स्वस्ति कृपानिधानेभ्यः ! दुर्लभदर्शनेन कृतकृत्याः स्म, जीवनं सार्थकं मन्महे ।

**निशापुरेशः-** तथास्तु । (तर्जनीं तीक्ष्णीकृत्य) कोऽयं जनः ? वः पुरतस्तूष्णीं तिष्ठति । माम् अपि नाभिनन्दति । रुग्णोऽहङ्कारी वा क एषः ?

**रक्षिप्रमुखः-** (जनं सङ्केत्य) एष मूर्खः, निरक्षरश्च । भवादृशैः सह वक्तुं नास्ति अस्या भाषा, अर्हता च । दण्डनाय जनोऽयं भवतां पुरतः उपस्थापितः । आज्ञां याचामहे ।

**निशापुरेशः-** किमकरोत् एष जनः ?

**रक्षिप्रमुखः-** अयं धूमपानसेवकः प्राणेशाः ! असो ताम्बाकुवर्तिकां प्रज्वाल्य धूमम् उदडाययत् । तेन प्रभुपादानां तनुमनोनन्दिनीनां विहरणमार्गः प्रदूषितः । विधौ धूमपायिने शतरूप्यकाणां दण्डनं व्यवस्थितं भवद्भिः । किं कुर्याम् ! वयम् आज्ञापरायणाः !

**निशापुरेशः-** तदस्ति चेद् दण्ड्यताम्, वित्तदण्डेन सह वर्षावधये कारावासे चासौ स्थापनीयः । तेन अन्ये धूमपायिनः शिक्षेरन् ।

**रक्षिणः-** (समूहस्वरेण) यदाज्ञापयन्ति करुणावताराः ! (प्रणम्य निर्गच्छन्ति, मौनाचारी बलेन बाहुं निगृह्य नीयते)



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**द्वारपालः-** (प्रविश्य) नमो महामतिभ्यः, केचिद् जना मेलितुम् इच्छन्ति, 'अतिदूरादागताः स्मः' इति वदन्ति। 'दर्शनदानेन नोऽनुग्रहीष्यन्ति भवन्तः' इति तेषां निवेदनम्। किं वाच्यम् ?

**निशापुरेशः-** प्रेष्यन्तां ते अचिरात्।

**पणनकरनेता-** (भूमौ प्रणिपत्य) महामेधाविनः ! स्वीकुर्वन्तु स्वदासानां प्रणतिततिम्।

**निशापुरेशः-** (तम्बाकुनलिकां मुखादपसार्य, कासित्वा च) के यूयम् ? कुतः किमर्थम् अत्र समागताः ? अहं किं कुर्याम् ?

**पणनकारनेता-** जयन्तु निशाचरभाग्यविधातारः ! भवतां कृपया सर्वाणि शुभदानि एव साम्प्रतम्। वयं ते एव जना ये भवतो घूर्णासन्दिकायां उपवेशयितुं सर्वाणि कर्माणि अकुर्म। इदानीं किञ्चिद् निवेदयितुकामाः स्मः।

**निशापुरेशः-** (हृष्टाकृतिं प्रदर्श्य ईषद् विहस्य च) स्मृतम् ! स्मृतम् ! अलं बहुना, धन्या यूयं मम प्रेष्ठाः। मत्सेवां काम् इच्छथ ?

**पणनकरनेता-** (सोत्साहम्) प्रभवः ! पूर्वम् अस्माकं स्वामित्वे ये उद्योगा आसन् ते सम्प्रति भूमिसाद्भूताः। तेन वयं भवताम् अनुचराश्च अलाभान्विताः, श्रमिकास्तु अनाथत्वम् एव अलभन्त। इदानीं तम्बाकुवर्तिकोत्पादनशालां स्थापयितुम् इच्छामः। तेन भवतः शुभलाभः, भावात्कानां कृते च विशेषलाभः। सङ्घटनलाभाय च उद्योगोऽसौ फलदायी सेत्स्यति। अत्र भवच्चरणानुमतिं निवेदयामः। एतदेव कारणमत्र अस्माकम् आगमनस्य। दासेषु दयां तन्वन्तु दयासिन्धवः !

**निशापुरेशः-** (चाटुकारान् विलोक्य) तदेव भविष्यति। युष्माकं का सम्मतिः ? किम् उचितं भवेत् ?

**चाटुकाराः-** (समवेतस्वरेण) सत्यं, सत्यम्, अवश्यं भविष्यति।

**निशापुरेशः-** तत् क्रियताम्। एतदर्थं यूयं पुरस्य पक्षतः सर्वाणि सौविध्यानि प्राप्नुयात। युष्माभिः सह अहं सदैव वर्ते।

**पणनकराः-** महती कृपा कृपासिन्धूनाम्। (सर्वे निष्कामन्ति)

**द्वारपालः-** (प्रविश्य) वनपाला अपि आगताः सन्ति बहिः। तैः सङ्क्षिप्तमेलनं प्रार्थ्यते। किं वाच्यं, परमप्रभवः ?

**निशापुरेशः-** (चलभाषोपकरणे समयं पश्यन्) तेऽपि प्रवेशयन्ताम्।

**वनपालाः-** (सपङ्क्ति प्रविश्य एकस्वरेण) प्रभुपादानां चरणधूलिं वन्दामहे,



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दासानुदासा वयम् ।

**निशापुरेशः-** का वार्ता ! उच्यताम् ! किमर्थम् समागताः ?

**वनपालप्रमुखः-** (नम्रीभूय) विशेषवार्ता वर्तते प्रभुचरणाः । पङ्क्तेरेकं जीर्णवस्त्रं जनं सङ्केत्य) कीदृशो दण्डः प्रदातव्यः अस्मै जनाय ! आज्ञां याचामहे ।

**निशापुरेशः-** कः अयं जनः किमर्थं दण्डनीयः ? किम् अकरोत् एष जनः ?

**वनपालप्रमुखः-** एषः काष्ठापराधी महाभागाः !

**निशापुरेशः-** (साश्चर्यम्) काष्ठापराधी ! कः अर्थः काष्ठापराधिनः ?

**वनपालप्रमुखः-** अनेन अत्रभवतां श्यालकस्य शूकरोद्यानस्य काष्ठं विनाशितम् । असौ ततः काष्ठखण्डं छित्त्वा लेखनीं निर्मितवान् । तया किञ्चिद् विलिख्य आत्मानं पण्डितं मनुते । कथयति- 'स्तोत्रकारोऽहम्' । काष्ठखण्डस्य प्रच्छेदनाद् उद्यानस्य सौन्दर्यमेव व्यपगतम् । एतदर्थम् एव एष दण्डभाग् महाप्रभवः !

**निशापुरेशः-** किं दण्डनीयम् अस्मिन् अपराधिनि ? (भटान् लक्ष्यीकृत्य) कथ्यताम् कीदृशो दण्डः प्रदातव्यः ?

**भटप्रमुखः-** (उत्थाय) यदाज्ञापयन्ति भवन्तः, तदेव उचितम् । भवतां दण्डादेशः अस्य कृते तु कृपाफलं भवेत् ।

**निशापुरेशः-** अस्य लेखनी त्रोट्यताम् । सर्वाणि स्तोत्राणि विदार्य मलमञ्जूषायां क्षिप्यन्ताम् । जनोऽयं सहस्ररूप्यकैः प्राप्तदण्डो विधातव्यः । अस्य कृते इत्यलम् ।

**वनपालः-** (प्रणम्य) तदेव करिष्यामहे प्रभुवर्य ! मार्गं साधयामस्तावत् । (बहिर्गच्छन्ति)

**द्वारपालः-** (प्रविश्य) कृपासिन्धवः ! बहिरपरसमूहः तत्परो वर्तते । तेऽपि दुर्लभदर्शनं मेलनञ्च आकाङ्क्षन्ति ।

**निशापुरेशः-** कीदृशो जनसमूहः ? प्रतिदिनं बहवो जनाः समायान्ति मेलनाय । काठिन्यं जायमानं वर्तते इदानीम् । किं ब्रुवन्ति ?

**द्वारपालः-** स्वल्पं समयं व्यवस्थापयतु भवान् । 'अत्यावश्यककार्यम् अस्ति, क्षणमेव मेलिष्यामः' इति कथयन्तः सन्ति । हस्तेषु झोलिकाश्च वहन्तस्ते मल्लायमाना विलोक्यन्ते ।

**निशापुरेशः-** (ष्ठीवनं निपीय) आहूयन्ताम्, आहूयन्तां सर्वे । सुहृदो भवेयुः । स्वागतवचनं कथय ।

**द्वारपालः-** यदाज्ञा प्रभुवर्याणाम् । (निर्गच्छति)



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**वनपालकाः-** (झोलिकाः समीपं समर्प्य) जयन्तु भाग्यविधातारः । भवत्सदृशैः महापुरुषैः सह मेलनेन बलिष्ठभाग्याः स्मः ।

**निशापुरेशः-** (अभिवादनं प्रत्यावर्त्य) के यूयम् ? पूर्वं परिचिता इव मन्ये । अत्र आगमनस्य प्रयोजनं किम् ? निःसङ्कोचं कथयत ।

**वनपालप्रमुखः-** (अञ्जलिं प्रबाध्य) वयं भवत्पादानामेव कर्यकर्तारः । यदा भवद्भिः निर्वाचने प्रत्याशिता उद्घोषिता तत एव वयं भवतां कार्यकर्तार स्मः । भवतां विजयाय परसम्पदः अवगुण्ठिताः, जनाश्च घातिताः अस्माभिः । भवन्तः कथम् अस्मान् विस्मरन्ति ! (सहसा निशापुरेशपत्नी सभाकक्षं प्रविशति, झोलिकां नीत्वा अन्तःपुरं प्रयाति च ।)

**निशापुरेशः-** (शिरः प्रघूर्ण्य) जानामि जानामि ! सर्वं जानामि । कथं यूयं विस्मर्तुं शक्यध्वे ॥ मम प्राणायमानाः सखायः । कास्ति युष्माकं स्थितिरधुना ? मया कीदृशः प्रत्युपकारः कर्तव्यः ? आत्मानं युष्माकं सेवकं मन्ये ।

**वनपालप्रमुखः-** (उपगच्छति, नियतश्राव्येण) इदानीं काष्ठस्य मूल्यं नितरां वर्धितमस्ति स्वामिवर्याः ! भवन्निर्वाचनक्षेत्रे साम्प्रतम् अपि विशालवृक्षवद् वनम् अवशिष्टं वर्तते । तस्य विच्छेदनेन विक्रयेण च विपुलं धनं प्राप्यते, येन अपरं निर्वाचनं जेतुं सुकरं भविष्यति । निर्वनभूमौ भवताम् अस्मत्सदृशानां भक्तानां स्वामित्वं पञ्जीभवेत् । भूमिहीनानं जनानां नाम्नि कार्यकर्तॄन् तत्र निवास्य मतम् अवाप्तुम् अपि शुभावसर आपतेत् । अवशिष्टभूमेः विक्रयेण प्राप्तशुल्कमपि भवत्सेवायाम् अर्प्यते, यथा अधुना समर्पितः । (झोलिकानयनप्रकोष्ठं दर्शयति)

**निशापुरेशः-** (सहर्षम्) तथैव अस्तु । यद् वाञ्छथ तत् कुरुत । तत्र न कोऽपि अवरोधः करिष्यति । यदि कोऽपि करिष्यति तमहं लोकान्तरं प्रापयिष्यामि । एष महान् बुद्धिविलासः युष्माकम् ।

**वनपालकाः-** (एकस्वरेण) तथैव कुर्मः । भूयोऽपि सर्वत्र विजयं लभन्तां भवन्तः । भगवत्कृपा च सदैव अक्षुण्णा भवतु युष्मासु । (निर्गच्छन्ति, निशापुरेशश्च शौचालयं गत्वा प्रत्यागच्छति)

**द्वारपालः-** (अञ्जलिं बध्वा) प्रभुचरणाः ! नगरासुरः समागतो वर्तते । तेन सह विपुलसमूहश्च समागतः । वस्त्रेण वचनेन च बहुपठिताः प्रतिभान्ति । ते मेलनाय लालायिताः सन्ति । कीदृशी आज्ञा



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रोतव्या तैः । किं वक्तव्यम् ?

**निशापुरेशः-** नगरासुरः समायाति ? अयं तु मम हर्षस्य विषयः । आनय, आनय, त्वरेण समादरेण च आनय । अहमपि तं मेलितुं चिराय लालयितः आसम् । (द्वारपालो निर्गच्छति, नगरासुरोऽन्ये च ससम्भ्रमं प्रविशन्ति)

**नगरासुरः-** स्वस्ति अन्नदातृभ्यः । (अन्यानपि तथैव उच्चारयितुं निर्दिशति)

**अन्ये-** (एकस्वरेण) स्वस्ति अन्नदातृभ्यः !

**निशापुरेशः-** (मन्दं शिरः प्रचाल्य) कीदृशम् अस्ति नगरम् ? सर्वं समीचीनम् अस्ति न वा ? पेयजलस्य, अवकरव्यवस्थापनस्य च कीदृशी स्थितिः ? नगरवासिनो हृष्टाः सन्ति ? आगमने कथं विलम्बः ? इदानीं तु मध्याह्नकालः ।

**नगरासुरः-** सर्वं सुन्दरं, समीचीनञ्च अस्ति । भवदनुकम्पया अनुबन्धकाः सर्वे पुरसभायां मनोनीताः । मार्गं कृष्णपत्रीकतुं नास्ति, मार्गे शिलाखण्डानि रेणवश्च बाहुल्येन सन्ति । तेन यानं शनैरेव चलति। तदेव कारणं विलम्बस्य । सर्वं समीचीनं सदपि नगरसभ्यतायाम् अनभ्यस्तैः जनैः एका समस्या सृष्टा, सा कथं समाधातव्या ? इत्यत्र सविमर्शं भवतां सम्मतिं याचितुम् अत्र समागतोऽहम् ।

**निशापुरेशः-** का समस्या सृष्टामूर्खैः पर्वतगृहैः ?

**नगरासुरः-** (समूहं सङ्केत्य) इमे समस्याम् अनुभवन्तो महानुभावाः । एतेषामेव पीडां निवेदयामि । भवन्तः अपि विदन्ति एव अस्मत्पुरस्य मध्यभागे मन्दिरं वर्तते । तत्र कतिचनमूर्खैर्नगरस्य सम्मतिं विना गोशाला च स्थापिता । पार्श्वभागे वसतिर्वर्तते । (पुनः समूहं सङ्केत्य) इमे महानुभावाः तत्रैव निवसन्ति । इदानीं तत्रत्यानां जनानां प्रतिनिधिरूपेण मया सह भवत्सन्निधौ सम्प्राप्ताः सन्ति । एतेषु प्राध्यापकाः, चिकित्सकाः, शिल्पिनः, अधिवक्तारः, मानवाधिकारवादिनः, राजनीतिज्ञाः, बुद्धिजीविनश्च विद्यन्ते । गोशालायाः गोमयगन्धजातपीडा एव एतेषां परिवाराणां च समस्या । अदृष्टगावो बाला गोपुच्छेषु तरलायमानं गोमयं दृष्ट्वा भोजनमेव परित्यजन्ति । किं बहुना भद्रमहिलानां समस्या इतोऽपि भीषणतरा । गोमयगन्धेन ता नासिकाम् आच्छाद्य चलन्ति । एतदहं भूयोभूयो निगदितः एभिः समाजस्य अग्रणीभिः । पुरस्य कर्णधारभूतानाम् एतादृशानां जनानां दुःखानुवेदनं तु सर्वैरपि



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शीघ्रं सावधानेन श्रोतव्यम् । येन न केवलं मम, भवादृशानामपि राजनीतिर्दक्षिणा भवेत् । अत्र किं कर्तव्यम् ? समस्या कथं समाहिता स्यात् ?

**निशापुरेशः-** इयं तु विकरालसमस्या । सर्वोपायैः शीघ्रं समाधेया । (हस्तौ उत्थाप्य) यूयमेव कथयत किं करणीयम् ? एतस्मिन् सङ्कटे ? (नगरासुरः समूहं पश्यति, वक्तुं च निर्दिशति)

**समूहस्य अन्यतमः-** (नगरासुरं लक्ष्यीकृत्य) अस्माकं स्वामी तु भवानेव । भवतो मनीषामण्डितं परामर्शभूतं वचनमेव अस्माकमपि कथनम् । प्रभुचरणानां सन्निधौ निगद्यताम्, वयं सर्वे समर्थयामहे तत् ।

**नगरासुरः-** एवं चेद् गोशाला ततो विस्थापनीया धर्मप्राणाः !

**निशापुरेशः-** कथं विस्थापनीया ? गावः, वृषभाः, तर्णकाश्च किं कर्तव्याः ? सर्वे उपायाः निर्दिश्यन्ताम्, नगरासुर !

**नगरासुरः-** जना इदानीं गवां पालनात् पलायमाना दृश्यन्ते । मार्गेषु स्वेच्छया परित्यागः अपि नोचितः, येन यानदुर्घटनायाः कारणम् उत्पत्स्यते । वने नीत्वा मोचितव्याः एष एव सर्वोत्तमोपायः ।

**निशापुरेशः-** केनोपायेन वनं प्रापयितव्याः ? वनं तु अतिदूरं वर्तते, वन्यजन्तवो न मारयिष्यन्ति ? गोहत्यापराधो न सम्भवेत् ?

**नगरासुरः-** चिन्तां मा कुर्वन्तु भवन्तः । ट्रकयाने सर्वाः एकत्र प्रबाध्य वनं नेतव्याः । वन्यजन्तवो न मारयिष्यन्ति । भवताम् आखेटवृत्त्या ते पूर्वमेव मारिताः । यदि केचन जीविताः मारयिष्यन्ति तदपि नास्ति चिन्ता गोहत्यापराधस्य । यतो हि त्यक्तधर्मे पुरे वसामो वयं सर्वे । एतादृशे पुरे यः कोऽपि मर्तुं सुखेन मारयितुं च शक्यते । नास्ति तत्रापराधो दण्डो वा । गवां तु दलमपि नास्ति, ताः किं विकारयिष्यन्ति अस्माकम् ?

**निशापुरेशः-** (तालवादनं कृत्वा) उचितम्, उचितम् । ततो गोशाला रिक्तैव स्थापनीया ?

**नगरासुरः-** नहि, नहि, रिक्ता न विधेया । आयार्जनस्य उपाय विधातव्यो भवति । आयेन विना किं खादितव्यम् ?

**निशापुरेशः-** कीदृशः उपायः आयार्जनस्य ? मह्यं को लाभः ?

**नगरासुरः-** (समूहं प्रति अभिमुखो भूत्वा) कीदृश उपाय लाभकारी भवेत् ? परामृश्यताम् अत्रभवतां पुरतः !

**बुद्धिजीवी-** गोकुलं विस्थाप्य अपि गोशाला रिक्ता न स्थापनीया । अस्माकं



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नगरं सांस्कृतिकनगरम् । संस्कृतेः संरक्षणाय अपि अस्माभिः किञ्चित् कर्तव्यम् । तत्र एको गोमयपिण्डः स्थापनीयः, यं शुष्कपीण्डं दृष्ट्वा पुरा अत्र गोवंश आसीदिति अस्माकं सन्ततिः स्वसंस्कृतिं जानीयात् । पर्यटकाश्च अस्माकं पुरस्य संस्कृतिसंरक्षणोपायं दृष्ट्वा प्रसन्नचेतसो भवेयुः । श्रूयताम्, इदानीं निशापुरे श्वव्यापारो वृद्धिङ्गतो वर्तते । एभिः परिवारस्य सदस्यत्वं प्राप्तमस्ति । युवभ्यो वयस्केभ्यो वृद्धवृद्धाभ्यः पिष्टकप्राणेभ्यः, शिशुभ्यः अपि श्वानो रोचन्ते । अधुना श्वानो वित्तचित्तानां नागरिकाणां मित्रपात्रतां बिभ्रति । नगरे चौर्यनिवारस्य अपि श्वान उपयोगिनः । शुनः अन्येऽपि ज्ञाताज्ञाता लाभाः सन्ति । गोसन्ततयो दानस्वरूपेण निःशुल्कमपि दीयन्ते, श्वसन्ततयस्तु विक्रीयन्ते इत्यतोऽर्थकारिणः एव । शुनां मलमूत्रादिकमपि गोमयवद् दुर्गन्धं न वितनोति । एतेषां मलपिण्डोऽपि गोभ्यः स्वल्पतरः । अतः श्वव्यापारो महान् लाभकारी, अर्थार्जनप्रधानश्च । यतो हि एतेषाम् उत्पादन-लालन-पालन-शालायाः संस्थापनं पुरेऽस्मिन् परमावश्यकी । तेन पुरमिदं न केवलं श्वसु आत्मनिर्भरं भवेत्, तन्निर्यातकर्तृ च सम्भवेत्, महानुभाव !

**नगरासुरः-** बुद्धिजीवी, बुद्धिजीवी एव । नान्ये अस्य स्थानं मानं, प्रतिष्ठां च प्राप्नुवन्ति । समुचितम् उदीरितं महानुभावेन । तत्र श्वशाला एव स्थापनीया, सञ्चालनीया च ।

**निशापुरेश-** तदेव भवतु । शृणु, नगरासुर ! शालायाः सञ्चालकोऽपि एष एव दूरदर्शी बुद्धिजीवी नियोक्तव्यः । येन श्वानोऽपि वर्धेरन्, आयार्जनं च समृद्धिं लभेत । योजनामिमां पुरविकासस्य प्राथमिकतायां स्थापयिष्यामि, एष पुरसमृद्धेः अन्यतमः आधारः ।

**नगरासुरः-** (करबद्धो भूत्वा) प्रयामः प्रभुपादाः ! इदानीम् । भवन्निर्देशनं पालयामि ।

**निशापुरेशः-** प्रयाथ तावत् । (सर्वे निर्यान्ति)

**द्वारपालः-** (प्रविश्य) स्वामिवर्य ! अपरसमूहोऽपि अस्मिन्नेव काले उपतिष्ठते। किञ्चिद् वक्तुम् इच्छति । याचनाश्च प्रस्तोतुकामो दृश्यते ।

**निशापुरेशः-** कति जनाः सन्ति समूहे ?

**द्वारपालः-** चत्वारः, श्रीमन्तः !

**निशापुरेशः-** (क्लान्तस्वरेण) इदानीं तु भोजनस्य समयः । सर्वेषां कार्याणां



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यथाशक्यं सम्पादनं मम प्रवृत्तिः । वार्तया मेलनेनैव कथम् अशेषदिनं यापयामि ! श्व आगन्तुं कथय ।

**द्वारपालः-** (शिरः उन्नमय्य) लोकरञ्जकाः ! इदानीं तु खग्रासग्रहणस्य समयः । लोकः ग्रहणवेलायां न भुङ्क्ते । एतस्मिन्नेव मुहूर्ते किं भोजनमुचितं शास्त्रविचक्षणाः !

**निशापुरेशः-** (किञ्चित् संस्मृत्य इव) क्षणमात्रम् अभुक्त्वापि स्थातुं शक्नोमि । ग्रहणवेलायां भोजनमेव वर्जितं वा अन्यदपि ! मया औषधं तु सेवितव्यमेव । लोकः किम् आचरति ? सम्प्रति द्रव्यमपि अभोज्यम् ?

**द्वारपालः-** नहि नहि, महामेधाविनः ! सर्वं भोज्यमेव अन्नं विहाय ।

**निशापुरेशः-** भवतु तावत्, आगन्तॄन् आनय शीघ्रम् ।

(द्वारपालः बहिर्याति)

**शिक्षाधिकारी-** (प्रविश्य) प्रणमामि महाशयाः ! (सहैवागतं जनं दर्शयित्वा) एष भवतः कलङ्कयति । जनोऽयं दण्डनीयः ।

**निशापुरेशः-** कोऽयं किं करोति ? कथं मां कलङ्कयति ?

**शिक्षाधिकारी-** कृत्रिमप्रमाणपत्रधारी पुरुषः एषः श्रीचरणाः । असौ प्रतिवेशिपुराद् यथेच्छं प्रमाणपत्राणि प्रणीय आनीतवान्, सर्वकारीयसेवायां च असौ प्रविष्टः । एतत् सर्वं रहस्यं साम्प्रतमेव अभिज्ञातम् । कीदृशो दण्डो दातव्यः अस्मै ? एतदेव निर्णेतुं भवतां पुरतोऽसौ आनीतः ।

**निशापुरेशः-** (उत्कण्ठया) कस्य क्षेत्रस्य निवासी अयम् ? कुलवंशगोत्राणि कानि ? कस्यां जातौ जातः ? कस्य दलस्य कार्यकर्ता ? अस्मद्दलस्य सदस्यत्वं लब्धवानस्ति न वा ? कम् उपसमूहं समर्थयते ? अस्माद् जनात् अस्मभ्यं लाभोऽस्ति न वा ? अधिकारिन् !

**शिक्षाधिकारी-** (पुरुषं निर्दिश्य) कथ्यतां सर्वं परमविवेकिनां विद्याप्रेमिणां प्रभुपादानां समक्षम् ।

**पुरुषः-** (निर्भयम्) अहं भवद्दलस्यैव पूर्वकार्यकर्ता । क्षेत्र-कुल-वंश-गोत्रादिकमपि भवतामेव अनुगच्छामि । कर्मकरवर्गे भवताम् उपसमूहस्य एकाकी नेता अहमेव । एष मम पैतृकव्यापारः । यस्य लाभो भवद्भिरपि पूर्वं प्राप्तः, अधुना विस्मृतः । प्रभुवर्यैः स्वप्रमाणपत्राणां प्राप्तये यः शुल्कजीवो नियुक्तः तस्य मध्यस्थोऽपि एष एव जनः । भवन्तोऽधुनावधि एतत् सर्वं न जानन्ति । भवतां



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सम्बन्धिनां बान्धवानां च कृतेऽपि अहं विविधश्रेणीनां प्रमाणपत्राणि आनीतवान् अस्मि । यदि ते सुपथमूल्येन क्रेतुम् ईहन्ते तर्हि. सर्वेभ्यो विक्रेतुम्, क्रीत्वा अन्येभ्यः, पुरेभ्यः आनेतुं चाहं समर्थः। यदाज्ञापयन्ति श्रीमन्तः ।

**निशापुरेशः-** (किञ्चिद् विचार्य) किं विधेयम् ? शिक्षाधिकारिन् ?

**शिक्षाधिकारी-** (निशापुरेशस्य मनो विज्ञाय) एष नितराम् अनुभवी जनः, सर्वसमर्थश्च । निशापुरेऽपि एतादृशानां जनानां समादरो न विधीयते तर्हि कुत्र अस्य कौशलं फलदायि भवेत् ? निशापुरस्य विकासः कथं सम्भवेत् ? एतदेव विचार्य निर्णेतव्यम् । अहं तु उपदास एव । भवतामाज्ञां शिरसि वहामि, विवेकशिरोमणयः !

**निशापुरेश-** (गभीरस्वरेण) बाढम्, सत्यं वदति । दुःखेन असौ अनुभवं समार्जयत् । अस्य उचितः सम्मानः कर्तव्यः । अस्यानुकूलं पदं पुरे रिक्तं नास्ति सम्प्रति ?

**शिक्षाधिकारी-** अस्ति, प्रभुवर्याः ! अवश्यम् अस्ति ।

**निशापुरेशः-** कुत्र किं पदम् अस्ति अस्य सम्मानानुकूलम् ?

**शिक्षधिकारी-** आम्, भवद्विरोधिनां कृत्रिमप्रमाणपत्रधारिणाम् अनुसन्धानाय समितिः सङ्घटिता वर्तते । दलविवादेन संयोजको नियुक्तो नास्ति इदानीम्, समितेः कार्यं मन्दायमानं वर्तते । तेन भवद्विरोधिनां मनोबलं वर्धितमस्ति । तत्र असौ किं भवेत् ?

**निशापुरेशः-** तर्हि असौ तत्रैव नियोक्तव्यः । सर्वं कार्यं सफलं भवेत् । अस्मिन् ये जना आशङ्कन्ते तेऽपि निवार्यन्ते । विरोधिनोऽपि दण्ड्यन्ते। मम प्रभुत्वञ्च वर्धते ।

**शिक्षाधिकारी-** उचितो निर्णय विवेकधुरिणाम् । शिक्षाया विकासस्य एतत् क्रोशशिला सेत्स्यति ।

**निशापुरेशः-** (वामहस्तम् उत्थाप्य) गच्छ, गच्छ । इदानीं मम भोजनस्य समयः ।

**शिक्षाधिकारी-** यदाज्ञापयन्ति, पुरप्राणाः ! (द्वावेव बहिर्गच्छतः, नेपथ्ये जनसम्मर्दस्य समाघोषः श्रूयते)

**जनसम्मर्दः-** निशापुरं जयतु, निशापुरेशाश्चिरं जीवन्तु ! अनाथाः नाथाः जायन्ताम् । वृद्धाः समृद्धाः भवन्तु पुरं पूर्णताम् अलभत ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

# योजनगन्धा

प्रा.डा. नवराजकट्टेलः

पात्रपरिचयः

योजनगन्धा : पोतवाहकस्य पुत्री, कृष्णद्वैपायनस्य माता ।

पराशर : वसिष्ठस्य पौत्रः, शक्तेः पुत्रः, कृष्णद्वैपायनस्य पिता ।

## प्रथमं दृश्यम्

स्थानम्- सेतीमाद्योर्निकटम्, नाविकस्य कुटीरसमीपम् । समयः- मध्याह्नः ।

(तत्र मधुरो वेदध्वनिश्श्रूयते, मधुरो वाद्यध्वनिः गुञ्जति, नद्याः कलरवश्चानुभूयते । परितः सुन्दरं, शान्तं घनवनं, मत्तमयूराणां कूजनं मनो रञ्जयति, कोकिलकलनादो मनो विनोदयति । नद्यास्तटे एकस्सुघोषो दरीदृश्यते । तत्र प्रविशति एकः गौरवर्णः, जटामण्डितः, सधौतवस्त्राः समात्त-कमण्डलुकः रविकर इव तेजस्वी पराशरनामा महर्षिः)

पराशरः अयि ! भो ! के सन्त्यत्र पोतवाहाः ! अये कर्णधार ! कुत्र विराजसे ।

(सत्रिपुण्ड्रः, सधौतः पराशरः साभिनयं परितः त्वरया गच्छन्, उच्चैः स्वरेण) अरे नौकाजीविनः ! के सन्ति अत्र । एष वशिष्ठपौत्रः, शक्तिसूतो नद्याः पारं जिगमिषति ।

(घोषनिकटं गत्वा) केऽपि जनाः न सन्ति ! किं खलु निर्जनोऽयं देशः । रे पोतवाहाः क्व तिष्ठथ !

(सोद्वेगम्) झटित्यागच्छ ममाग्रे नोचेत् ... ।

(सत्त्वरं परितो भ्रमति)

योजनगन्धा

(नेपथ्ये) भो आर्य ! एषा आगच्छति ।

(स्थूलनयनी, शिरसि वनपुष्पा, यौवनाङ्कुरभारालसा, आजानुवस्त्रवेष्टिता, सकङ्कणा, सनौकादण्डहस्ता बाला आगच्छति)

एषा अबला बाला चारुनयना क्षमां याचते । भो ऋषिवर्य ! क्षणमस्मिन्नासने तिष्ठ, पयोस्तक्रं वा पिब, आगमिष्यतो मम पितरौ । (स्मितं विहस्य, साभिनयम्) तिष्ठतु भवान् । अलङ्करोतु अमुं घोषं, पावयतु कुलं, रञ्जयतु जीवनम् । भो भवान् ! मा क्रोधं वर्धय । क्रोधो विनाशकारणम् ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**पराशरः-** (साश्चार्यं नटति) केयं बाला ! कुतश्चागता ! भो बाले ! बालवद् दरीदृश्यसे, वार्ताङ्करोषि वृद्धवत् ? । व्यथयति मम मनः, आलोडयसि मां किम् ! विमोहयसि मां किम् ! (समधुरम्) सत्वरं पारङ्गमनीयमस्माभिः । क्व ते पितरौ ! बाले !

**योजनगन्धा-** भो आर्य ! अहं नाविकपुत्री ! भवादृशं तापसं ऋषिप्रवरं दृष्ट्वा मोमुद्यते मम मनः । मा क्रोधं कुरु । मम माताऽरण्ये प्रयाता गवाञ्चारणाय । अस्माकं गोष्ठे गावः, अजाः, महिष्यः, मेषकाश्च सन्ति । सा गाश्चारयति, घासमाहरति । सा आगच्छन्ती भवेत् ।

**पराशरः-** (सस्मितं समधुरञ्च) क्व गतस्ते जनकः, कश्चालयति नावं, ब्रूहि ! ब्रूहि ! मया सत्वरं गमनीयं हिमप्रदेशं हिमाह्ववर्षं वा ।

**योजनगन्धाः-** आर्य ! मम तातश्चालयति नावं, स मत्स्य इवास्ति जलक्रीडायाम् । अधुना स केदारान् प्रस्थितः, सहलः, सवृषभः, सबीजश्च बीजवपनाय । अहमेकाकी एवास्मि, गङ्गातीरे, भवदीयेन पदरजसा रञ्जितेन मोमुद्यते घोषः, भवतो मन्दहास्येन मनो माद्यति मम, क्षणं तिष्ठ । भो तपोधन ! अस्माकं कुलं पवित्र कुरु ।

**पराशरः-** (साभिनयं नटति, खं विलोक्य) केयं खेचरे ! मां विमोहयति । व्योम्नि कः किं घोषयतीव प्रतिभाति । अव्यक्ते ब्रह्मणि किं विस्फोटकमिव स्फोटयति, किं व्यनक्ति ! पूर्वरङ्गमिव रङ्गम् । (सावेगम्) बाले ! त्वं किं मां नौकायां नैव पारं नयसि ! नय सत्वरम् । मयि त्वरा वर्त्तते ।

**योजनगन्धा-** (सस्मितम्) भो आर्य ! अहन्तु अप्रशिक्षिता, तत्र कार्ये बाला एव । नाहं पारये नावं चालयितुम् । तीव्रधारया शीघ्रं वहन्त्यां, महत्यां गण्डक्यां लघुपोतं चालयितुं न प्रभवामि । जलक्रीडां करोमि । नद्यां चिक्रीडिषामि । पोतम् चालयामि । परन्तु मां रुणद्धि तातः । अहञ्च जलप्रवाहं दृष्ट्वा बिभेमि भो आर्य !

**पराशरः** (जनान्तिकम्) केयं बाला मामन्तःप्रेरयति । कुतः केयम् ! 'एकोऽहं बहु स्याम्' ! कः किमनागतं संसूचयति ! (किञ्चित् उन्मिलिताक्षः क्षणं विमुह्यति)

**योजनगन्धा-** (साट्टं विहसति) ह ह ह ह ! किं मूर्च्छाङ्गतः, आर्य ! किं समाधिङ्गतः ! किं पलायिता चेतना, पलायितस्तदिन्द्रियग्रामः !

**पराशरः** (पराशरः परितो भ्रमन् गगने हस्तौ प्रसार्य ध्यानेन विलोकयति, साभिनयं नटति) आं भो ! औपरिचरेयि ? ध्यानं स्मारयति पूर्वजातिम् । 'संस्कारसाक्षात्करणात् पूर्वजातिज्ञानम्' । किं बिम्बयति आकाशः, किं



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रतिबिम्बयति प्रकाशः ! मां 'दूरङ्गमय, तन्मे मनश्शिवसङ्कल्पमस्तु !' इति स्मारयति । बाले ! त्वं नौकां नेतुं शक्नोषि । मया ज्ञातं भूतं, भव्यं, भवच्च यत् ।

(सगद्गदया, सप्रेम्णा) नय बाले नय, मां तारयितुं शक्नोषि, मां विस्तारयितुं शक्नोषि, मम जीवनस्य संरक्षणं कर्तुं प्रभवसि ।

**योजनगन्धा-** आर्य ! नैव बुध्यते भवतो रहस्यमयी वार्ता । भवतो रसमयं श्रुतिमधुरं कथनं श्रुत्वा मम मनश्चोत्फुल्लायते । गात्राणि स्फुरन्ति । वपुः कोषाणि विजृम्भन्ते, मनो माद्यति । रोमहर्षः प्रजायते । परन्तु नाहं नौकां वोढुं शक्नोमि नाविक इव, अपि तु भवतः सान्निध्येन स्वप्न इव शान्तम् आनन्दञ्चानुभवामि ।

**पराशरः** मत्स्यगन्धे ! मां नौकायां नय, मया गमनीयः शैत्यप्रदेशः । तत्र तपस्तप्त्वा ध्यानेन ब्रह्मणि लीनो भविष्यामि । येन मन्त्रद्रष्टारो ऋषयः सच्चिदानन्दब्रह्मणि लीनाः ।

**योजनगन्धा-** पश्यतु दूरं ऋषिः, अत्र कदा भल्लूकानां, कदा हरिणानां, कदा व्याघ्राणां समूहः जलपानाय वा इतस्ततो गमनाय आगच्छन्ति । तेभ्योऽहं बिभेमि ।

**पराशरः** मा भेतव्यं, मत्स्यापाङ्गि ! अहिंसाप्रतिष्ठायां सर्वभूतवैरत्यगो जायते । अवैरभावे श्वासं निरुध्य स्थाणुवत् स्थीयते चेत् ते भयरहिता अग्रे गच्छन्ति ।

(तत्र भल्लुकानां समूहः शनैः शनैः ततः गच्छन्नस्ति, मत्स्यगन्धा तं दृष्ट्वा भीता भवति, द्ववावेव मौनं तिष्ठतः भल्लूकानां ध्वनिः, कलरवः, वाद्यध्वनिश्च श्रूयते, प्रकाशः कदा मन्दायते, कदा दीर्घायते । (मत्स्यगन्धा नौकां चालयितुं नैवेच्छति । परन्तु पराशरः सस्नेहं नौकाचालनाय विवशं करोति । पराशरः योजनगन्धायाः हस्तं निष्पीड्य गङ्गां प्रति गच्छति ।)

## द्वितीयं दृश्यम्

स्थानम्- सेतीमाद्योस्तटस्थानौका । समयः- मध्याह्नस्यान्तिमकला ।

(द्वयोर्गङ्गयोः सङ्गमो दृश्यते । नदीतीरे नौका दृश्यते । परितो वनानि, हिमशृङ्खलाश्च दृश्यन्ते । योजनगन्धा नौकादण्डं दधाना नौकायामधिरोहति ।)

**योजनगन्धा-** (सभीतेव ससम्भ्रम्) भो ! भो ! ऋषिवर्य ! मया कदापि पूर्णरूपेण नौका नैव चालिता । यदि नदीवेगेन दुर्घटना जायते चेत् आवयोर्जीवनं



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

परिसमाप्तं स्यात् ।

(तौ नौकायां स्तः । मधुरं वाद्यवादनध्वनिर्गुञ्जति, मन्दं गीतं विश्रूयते। पराशरोऽभय-मुद्रायां शान्तं मौनं तिष्ठति, विद्युच्चकास्ति । सा नौकां चालयितुं बिभेति)

**पराशरः** कल्याणि ! सुभगे ! मा भैषीः । वयं सर्वे सञ्चितकर्मणः फलं लभामहे। शृणु कामरूपे !

आयुःकर्म च वित्तञ्च विद्या निधनमेव च ।
पञ्चैतान्यपि सृज्यन्ते गर्भस्थस्यैव देहिनाम् ॥ (हितोपदेशः)

**योजनगन्धा-** (परितो विलोकयन्, सलज्जया, सभीतया च) भो शाक्तेय ! भवान् ऋषिरसि, कोविदोऽसि, किं किं कथयसि नाहं जाने । मां किमर्थं मोहयसि ?

**पराशरः** (सशान्तम्) मम चेतनायां दिव्यं स्फुरणमजायत । दैवीप्रेरणया मम मनसि वासनाया व्युत्थानमभवत्। शुभा च वेला। शुभं ह्यरणिमन्थनम्। ऋतुदानाय मम चेतोऽकामयत । अतोऽहं मोहयन्नस्मि बाले ! आगच्छ ममोरसि सुभगे !

(पराशरः साभिनयं पाणिं समादाय समाकर्षति, वाद्यध्वनिश्श्रूयते)

**योजनगन्धा-** (सलज्जयाभिनीय) ऋषिवर्य ! किमेतत् भवति शोभते ! हन्त ! छलपूर्वकं वा बलपूर्वकं मम सतीत्वहरणं करोषि ! ऋषय एव मन्त्रवेत्तारः, ते धर्मशासकाश्च भवन्तीति मया श्रुतमासीत् । अधुना कथं वैपरीत्यम् । अनग्न्याधानपूर्वं ऋतुदानं निषिद्धं शास्त्रे विहितमिति श्रुतं मया, ऋषिप्रणीतनियमं कथमतिक्राम्यसि ! पितरि निवेदयामि, राज्ञि निवेदयामि ! हं हं ! (हूङ्करोति सव्रीडया)

**पराशरः** सुभगे बाले ! माल्लेयि ! अधुना सौमुहूर्तिकी वेला । इदं पवित्रं स्थानं । हिमालयाद् दक्षिणस्यां दिशि, सेतीमादीनद्योः कालीसरस्वत्योः वा गङ्गयोः साधुसङ्गमे नौकायामेव ऋतुदानं कर्तव्यम्। आवयोश्शुक्रशोणितयोः निषेकेण आर्यावर्तस्य दीपः समुदेष्यति। स बाल आहिमालयात् हिमाह्ववर्षात् विश्वं शिक्षयति, विश्वगुरुर्भविष्यति। सः शिशुर्वेदस्य समुद्धर्ता, विभाजकश्च, धर्मार्थकाममोक्षपुरुषार्थचतुष्टयस्य सम्पोषको भविष्यति बाले ! तवापि यशोवर्द्धनं भविष्यति ।

**योजनगन्धा-** (सस्मितेन सव्रीडया च) शाक्तेय ! किं विलपसि पथिक ! कथमहं स्वधर्मं परित्यजामि ! धर्मे हि लोकाः प्रतिष्ठिताः इति विज्ञातम् । धर्मो रक्षति रक्षित इति विश्रुतम् । धर्महानिर्नैव कर्तव्या ।


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अहमधुनापर्यन्तमक्षतयौवना अपूर्वपतिका चास्मि ।

**पराशरः** (स्मितेन) हे आद्रिकेयि ! एषा विशिष्टा दैवीघटना । न धर्महानिर्भवति अनया । अपितु सनातनवैदिकमार्गस्य रविरुदेष्यति, स बालो वेदानां विभाजकः संरक्षकश्च भविष्यति । असतः सत्यं गमयिष्यति, तमसो ज्योतिषं गमयिष्यति, मृत्योरमृतङ्गमयिष्यति । बाले त्वं अक्षतयौवनानन्यपूर्वा च भविष्यसि । आगच्छ मम वक्षसि, आश्लिष्टा भव ममोरसि ! (बलात् समाकर्षति)

**योजनगन्धा-** (सव्रीडया क्रोधमुद्रया, नौकादण्डं उत्थाप्य) नाहं विश्वसिमि । स्मश्रुघनजटायोगिकल्पाः पुरुषाः ग्रामे, पर्वतेऽरण्ये पर्यटन्ति, मोहयन्ति च ग्राम्यजनान् । लोभयन्ति सरलान् अशिक्षितग्राम्यमर्त्यान् । कोमलभावभरितमहिलागणं छलयन्ति योगिकल्पाः ।

(हस्तौ नैव सरतः, मनसि 'मम करौ उत्क्षेपणापक्षेपणौ, आकुञ्चनाप्रसारणौ नैव कुरुतः, ओ ! पादौ अपि नैव सरतः, सिद्ध एव ऋषिर्भवेत् किम् ! परन्तु नैव भेतव्यं, मां खेदे निमज्जयति खलु हैषः । समुद्धरणीयम् अस्माद्घोराच्च सङ्कटात्' पादौ च पीडयतः ।)

**पराशरः** (ससम्भ्रमं सोद्वेगञ्च) बाले ! गन्धकालि ! किं प्रलपसि । अयामृषिः शक्तिपुत्रः, वशिष्ठपौत्रः, ब्रह्मणः प्रपौत्रो नैव मिथ्यां भाषते । तस्य सत्यसिक्ता दृष्टिः सत्यं प्रकाशते, सत्यपूतः पराशरः यन्निगदति सत्यं गदति । भूतं, भव्यं, भवच्च यत् सत्यं विलोकयति ।

**योजनगन्धा-** (सोद्वेगम्) नाहं विश्वसिमि योगिकल्प ! आदृश्यन्तेय ! भवादृशा योगिकल्पा यायावरा नौकातरणे कति समागच्छन्ति कति ! ते किं किं जल्पन्ति, किं किं विलपन्ति, किं तेषामनुधावनं कर्तव्यं खलु मया ! भवतः कथने किं प्रत्यक्षानुमानशब्दप्रमाणानि सन्ति ! मम पितरौ किं कथयतः ! प्रतिवेशिन्यः किं भणिष्यन्ति ! देवपुराच्च देवाः किमनुशासन्ति, पितृलोकात् पितरः किम् अनुभविष्यन्ति ! (रौद्रमिव सस्मितं नटति)

**पराशरः** (सस्नेहम्) बाले! योऽन्तःप्रविश्य मां प्रेरयतीश्वरः। 'क्लेशकर्मविपाकाशयै-रपरामृष्टपुरुषविशेष ईश्वरः' मां नियोगं विदधाति, स 'पूर्वेषामपि गुरुः कालेनानवच्छेदात्' । मामित्थमेव आज्ञापयति वेदमाता गायत्री । सैव विश्वजननी, सृष्टिस्थितिलयहेतुभूता सनातनचितिशक्तिः ।

**योजनगन्धा-** (साश्चर्यम्) चितिशक्तेरनुभवः कथं जायते ऋषिवर !

**पराशरः** कामरूपे ! तव बुद्धौ यत् चैतन्यं प्रतिभाति सैव चितिः । 'चितिः



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वतन्त्रा विश्वसिद्धिहेतुः' सैव 'स्वेच्छया स्वभित्तौ विश्वमुन्मीलयति'। प्रकृतिपुरुषात्मको मायासम्बलितश्चैतन्यो मां प्रेरयति बाले ! सा मामन्तःकरणे इत्थमेव आज्ञापयति बाले ! एतद् महदाश्चर्यं मत्कृतेऽपि बाले ! मायामयोऽसौ कापटपुरुषः रौद्ररूपं धारयति, त्वाञ्च माञ्च विदारयति। (द्वौ रौद्रमुद्रायां नटतः)

**योजनगन्धा-** (सक्रोधम्) अरे भिक्षुक ! यायावर ! किमधिकं जल्पसि ! किम् अतिमन्यसे ! स्वयमेव नय नौकाम्। तर तरण्या। भञ्जय जलधाराम्। मानय मनोधाराम्।

**पराशरः** अरे मत्स्यगन्धे ! अरे भामिनि ! मां विलोकय, मम मनसि उन्मीलय। नयनयोः नम (अभयमुद्रायां नयने उन्मील्य) ओम्। ओम्।

(विचित्रं वातावरणं जायते, परितः वेदध्वनिः समागच्छति, योजनगन्धायाः मनसि कामवृत्तिरुदेति)

**योजनगन्धा-** (साश्चर्यं सकौतुकम्) सत्यमेतत् ! कथं विश्वसिमि ! प्रमापयतु भवान् केनापि चाकचिक्येन चमत्कारेण। पारावारे जनाश्च सन्त्यधुना। ते किं कथयिष्यन्ति ! सज्जाहं। मम जन्म तु मत्स्याज्जातम्, अतो मम शरीरान्मत्स्यगन्धो वाति। अतः ऋषिप्रवरैःसह कथं ऋतुमथनं कर्तुं प्रभवामि।

**पराशरः** बाले ! मा भीता स्याः। (अभयमुद्रायाम्) ऋतुमन्थनोत्तरं तव कुमारित्वमक्षतं भविष्यति। मत्स्यगन्धे ! मत्संसर्गात् योजनगन्धा भवसि, रूपवती भवसि। पश्य परितो नीहारावृतं सर्वं, न केऽपि परिलक्षयन्त्यावाम्। सज्जीभव कल्याणि ऋतुमन्थनाय।

(मन्मथ उभयोर्मनसी मथ्नाति। परितो धूमो व्याप्नोति, तयोश्छाया दृश्यते। हस्तान्नयनाच्च ज्योतिषः पिण्डं गत्वा शिरसि, नयनयोः, हृदि च प्रविशति। सा मोहङ्गता इव दृश्यते, वाद्यध्वनिश्श्रूयते। पुनर्निहारिका विलीनायते पूर्ववत् नदी दृश्यते।)

**योजनगन्धा-** (प्रसन्ना सा सव्रीडया सलज्जयाचाधोमुखं कृत्वा) ऋषिवर ! मम जीवनं किं भवति ? भवान्तु यायावरोऽस्ति, शैत्यप्रदेशे तपोवने स्थित्वा धारणाध्यानसमाधौ लीनो भविष्यति।

**पराशरः** (अभयमुद्रायाम्) त्वमनन्तजीवा वेदगर्भा भवसि, यशोवती भवसि, पुत्रवती भवसि। कुलमाता भवसि। राजमाता भवसि। शतसंवत्सरं ते जीवनम्। तव पुत्रे भारतवर्षमाविशवञ्च ज्ञानप्रकाशं तनोति, त्वाञ्चामृतां कारयिष्यति।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(मधुरं वाद्यं श्रूयते । सा सलज्जया भ्रामं भ्रामं ऋषिं नमति । कलरवः श्रूयते । जलरवो विमोहयति । धूमः परितो व्याप्नोति ॥ ओंकारध्वनिश्श्रूयते । प्रकाशो विविधरागेण रङ्गं रञ्जयति । नेपथ्ये अनेक मन्त्रा उच्चरितश्श्रुयन्ते ।)

(उपह्वरे गिरीणां सङ्गमे च नदीनाम् ।
धिया विप्रोऽअजायत । (शु.य. २६।१५।)
(पारकोटेऽन्यतीर्थञ्च वर्तते पुण्यदायकम् ।
माद्रिकाशुक्लगण्डक्योः सङ्गमे शङ्कराभिधम् ॥
तपश्चकार तत्रैव पराशरमहामुनिः ।
पराशरगुहा तत्र तपःसिद्धिप्रदायिनी ॥
जज्ञे मत्स्योदरीपुत्रस्तत्र द्वीपे पराशरात् ।
पुराणसंहिताकर्ता वेदशास्त्रप्रवर्तकः॥)
(हिमवत्खण्डे गण्डकी महात्म्यम् अ. ५ को ५४, ५५ र ५६)
(तिमिरायते । पराशरबीजाय नमः)
(नमोऽस्तु ते व्यास ! विशालबुद्धे, फुल्लारविन्दायतपत्रनेत्र ।
येन त्वया भारततैलपूर्णः प्रज्वालितो ज्ञानमयः प्रदीपः ।)

(इति गुञ्जति, पटाक्षेपश्च जायते)

॥ इति पाराशर्य-नवराजकट्टेलविरचितं 'योजनगन्धा' नाम नाटकम् ॥



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

# प्रतिष्ठा

प्रा.डा. नवराजकट्टेलः

**पात्रपरिचयः**

| | |
|---|---|
| प्रतिष्ठा | चिन्तानाथस्य पुत्री चिन्तानाथः प्रतिष्ठायाः पिता |
| जयन्ती | सखी, भूमिका, अभिमा प्रतिष्ठायाः सहयोगिन्यौ, |
| यज्ञराजः | चिन्तानाथस्य पूर्वनाम सविता : प्रतिष्ठायाः पूर्वनाम |

## प्रथमं दृश्यम्

**समयः-** अपराह्नः । स्थानम्- चिकित्सालयस्य उपचारकक्षे (प्रतिष्ठा, जया, विजया, प्रमदादयाश्छात्राः १२ कक्षां समुत्तीर्य सर्वकारस्य छात्रवृत्तिं प्राप्य छात्रावासे स्थित्वा प्राधीत्य काश्चन चिकित्सकः, स्थपतिः, अधिवक्ता, प्राध्यापकः, शाखाधिकृतश्चेत्यादिपदे विराजिताः सन्ति । विक्षप्तः पिता कुत्रास्ति सा न जानाति सोऽपि पुत्री कुत्रास्ति न जानाति । पितृपुत्र्योः आकस्मिकरूपेण चिकित्सालये सङ्गमो जायते)

**प्रतिष्ठा** (खिन्नतया परिभ्रमन्) अद्य महती दुर्घटना जाता, बहवो यात्रिणः अङ्गभङ्गाः, बहवो मृताश्च । पञ्चविंशतिजना अत्रोपचाराय समानीताः सन्ति । अस्माकं कर्तव्यमेव येन केनापि एताषामार्तजनानामुपचारः, तेषां स्वास्थ्यलाभश्च भूयात् । अद्य कोऽपि अवकाशे गृहे नैव तिष्ठेत्, आरात्रं पीडितानां सेवा विधेया । (तत्र जनशङ्कुलं ज्ञायते, न दृश्यते, मृतानां स्वजना रुदन्तः सन्ति, इतस्ततः कुर्वन्तः सन्ति)

**भूमिका** (श्वसन्तम्) महोदये ! मया कुत्र गन्तव्यं, किं कार्यं सम्पादनीयम् । अत्र बहवो जनाः हताः, क्षतविक्षताश्च सन्ति । किं कर्तव्यविमूढाहम् ।

**प्रतिष्ठा** (शीघ्रतया) गच्छ तत्र सप्तमाङ्कस्य शय्यायां शुप्तो रोगी व्रणपीडया रुदन्नस्ति । (मनसि 'प्रथमाङ्के पञ्जीकृतो रोगी च रुदन्नस्ति, तत्र गच्छामि')

**भूमिका** भवत्याः सहयोगं का करिष्यति प्रतिष्ठे !

**अभिमा** (सस्मितम्) प्रष्ठियाः सहयोगमहं करोमि ।

**प्रतिष्ठा** (प्रसन्नतया उपचारोपकराणि प्रगृह्य व्रजति) वृद्धपितः ! का घटना सञ्जाता ! पितः भवतो व्रणं तु नाधिकमस्ति, अत्याहितं मा विधेयम् । (मनसि 'अत्यन्तं कष्टकरमस्ति, भीतिदं व्रणमस्ति' इति) पितः किञ्चित् हसतु, पीडारहितमस्मीति स्मरतु । शीघ्रं स्वास्थ्यलाभं कारयित्वा त्वां



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गृहं प्रेषयिष्यामि। चिन्ता मा विधेया। चिन्तानाथः (विचित्रभावेन) का मां पितः इति मधुरेण स्वरेण सम्बोधयति ? किमाश्चर्यम् ! मम तु दुर्दैवात् सर्वो नष्टः। (मनसि-हिंस्रकदलैः पत्नी घातिता, अहं विक्षिप्तः, पुत्री आसीत्, सापि जीविता स्यात् अस्मिन्नेव वयसि भवति स्म)। अश्रुं विमुञ्चति) हतभाग्योऽहं कथं त्वया 'पितः' इति जीवनरसमयेन कोमलपदेन सम्बोधितः पुत्रि !

**प्रतिष्ठा** (सस्मितम्) वृद्धपितः ! मा रोदिहि, अत्र वह्व्यः पुत्र्यः सन्ति। चिन्ता मा विधेया। (अन्ये चिकित्सका अपि आगच्छन्ति, निर्दिशन्ति, व्रजन्ति, सा व्रणस्य परिष्कारमुपचारञ्च करोति, अभिमा उपकरणानि आनयति, नयति च)भवतः परिवारजना कुत्र सन्ति पितः !

**चिन्तानाथः** (अश्रूणि विमुच्य) पुत्रि ! अहमेकाकी एव समागत, एकाकी एव पर्यटन्नस्मि, एकाकी एव इतो व्रजिष्यामि। एषैव प्रकृतिसृष्टिप्रणाली।

**प्रतिष्ठा** (विकृताकृत्या) क्षन्तव्याऽहं पितः। औषधं क्रयाय के सन्ति ? तेऽत्र सन्ति चेदहं किं विधातव्यं, किमौषधं क्रेतव्यमिति तान् निर्दिशामि।

**चिन्तानाथः** (दीनवचसा) पुत्रि ! अधुनात्र केऽपि न सन्ति, त्वमेव मम पुत्री, मां जीवय, मां पुनर्जीवनं देहि। (सा पितरं, बाल्यवयं, मातरं, बाल्यवयं स्मरति) किमर्थं चित्रायसे पुत्रि ! (स प्रतिष्ठां, बालपुत्रीं, जायां, बालपुत्रीं स्मरति)।

**प्रतिष्ठा** (सत्त्वरम्) किमपि नहि। भवत उपचारेऽर्थस्य व्यवस्था कथं विधेया इति मम मनसि चिन्ता नृत्यति। अधुनाहमेव द्रव्यस्य व्यवस्थां सम्पादयामि, पश्चात् किं कर्तुं पार्यते द्रक्ष्यामि। भवतो वचनानि आकृतिश्च किमर्थं मां समाकर्षति ?(इतस्ततः करोति, जनान्तिकम् 'यदि पिता जीवितः स्यादित्थमेव वयसि मम पितापि भवति स्म' इति उच्चारयति)।

**चिन्तानाथः** (हस्तावुत्थाय किञ्चित् कथनायोत्सुको दृश्यते, वक्तुं नैव शक्नोति) पुत्रि ! अहं यायावरः मम शरीरमेव धनम्। मम वचनमेव धनम्।(अश्रूणि विमुञ्चति) ममापि ममापि ...पुत्रि ! (अटति) सा....मम ...। असारे खलु संसारे न सन्ति च ममात्मजाः। मेचीं व्रजामि कालीञ्च हिमं पर्वतमस्तकम्॥

**प्रतिष्ठा** (सा चित्रायते, दीपस्य विविधा स्थितिर्दृश्यते, वाद्यध्वनिश्च श्रूयते) भवतो गृहं कुत्रास्ति पितः ! गृहस्थजीवनं नैव यापितं, परिवारस्य सदस्या भवेयुः ते किं कुर्वन्तः सन्ति ?(मनसि 'किमर्थं मां समाकर्षति



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एषो वृद्धपुरुषः, पूर्वमेव परिचितं स्यादिव') कथयतु किञ्चित् ।

**चिन्तानाथः** (अश्रूणि विमुच्य मनसि -किमर्थं बालेयं मां समाकर्षति पूर्वमेव परिचितं स्यादिव) आसन्, भवेयुः, तैः विस्मृतोऽहं, मया च विस्मृता ते । मम कारुण्यमयं जीवनमस्ति श्रुणोषि बाले ! अहन्तु यानेन शैत्यप्रदेशं गच्छन् आसम् । मार्गे दुर्घटनाऽभवत् । सव्रणोऽहं उपचाराय अत्र आनीतः स्याम् । (स पुनश्च मूर्च्छायते, परीक्षणं करोति, उपचारयति च । दैन्यसूचकं वाद्यं गुञ्जति, प्रकाशः सरति, छायायां कथां कथयन् दृश्यते, पुनः तिमिरायते ।) 'पुत्रि ! समागच्छ, अहं मम जीवनस्य गाथां श्रावयामि' इति । ध्वनिः श्रूयते । स पुनर्मूर्च्छायते) ।

## द्वितीयं दृश्यम्

समयः - रात्रौ । स्थानम् - कस्यद्ग्रामस्य प्रकोष्ठे

(सघनतिमिरे प्रकाशः क्रमशः प्रदीप्यते । घोषो दृश्यते । तत्र काश्चनच्छात्राः सविता, जयन्ती, जया पठन्त्यो विमर्शयन्त्यो दरीदृश्यन्ते । एका 'इयं सृष्टिः कथं समागता ? अपरा 'इयं खलु परमाणुसङ्घटनेन तस्य विस्फोटनेन च जाता' अपरा 'अस्मिन् विस्फोटनसिद्धान्ते सप्तप्रश्ना उत्थिता अतो रश्मिसिद्धान्त आविष्कृतः' । प्रतिष्ठा 'श्रुता किं पुनश्च कृषकाः, गृहिण्यः, शिक्षकः, प्रहरी च व्याजेन मारिताः । मानवहत्यायाः शृङ्खला कदा पर्यन्तं चलिष्यति' । विद्युद् द्योतते, विस्फोटनस्य ध्वनिः श्रूयते, मेघो गर्जति, दैन्यसूचकं वाद्यञ्च श्रूयते)

**यज्ञराजः** (प्रविश्य) अयि ! भो ! के सन्त्यत्र गृहाश्रमे । (साक्रोशम्, परितः त्वरया गच्छन्, उच्चैःस्वरेण) अरे ब्रह्मवादिन्यः ? किं कुर्वत्यः सन्ति, बाला मम वार्ता नैव श्रुता ? कियद्वारं मया ध्वनिः कृतः ! (सक्रोधम्) झटिति ह्यागच्छ पुत्रि । (रौद्ररूपेण परितो भ्रमति) ।

**सविता** (सहास्यं, साभिनयम्) भोः पितः ! किमर्थं भवान् रौद्ररूपेणात्र समागतः ? अहं अग्रजाभिः सह पठन्त्यस्मि । अग्रजाः विदुष्यः सन्ति, ता मां पाठयन्ति, तथैव आचार्याश्च सन्ति पाठनाय । सशिष्टं वदतु भवान् ।

**यज्ञराजः** (सक्रोधम्) अयि पुत्रि ! अजाभिः गोभिश्च क्षेत्रं प्रविश्य धान्याङ्कुराः नाशिताः, त्वम् अत्र समागत्य वार्तां कृत्वा तिष्ठसि, आत्मजे ! मातापि



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गृहकृत्यैः श्लथा भवेत् । हाय्या भव । तव पठनेन किं भवति ? नार्यस्तु गृहदीपकाः एव । तव विवाहस्य प्रस्तावः समीचीनपरिवारात् समागतः । अहं तु विवाहाय तत्परोऽस्मि ।

**सविता** (सभीति) जनक ! अग्रजोऽप्यस्ति गृहकृत्य-सम्पादनाय । स अजा गोचारणाय प्रभवतु, स पठनेऽपि दत्तचित्तो नास्ति । धूर्तैः सह तस्य व्यवहारो दृश्यते । रात्रौ च कुत्र गच्छति, न ज्ञायते । विवाहस्य प्रस्तावः समागच्छेत् परन्त्वहं पठित्वा स्नातको भूत्वैव विचारं करिष्यामि पितः !

**यज्ञराजः** (सक्रोधम्) अग्रजस्य वार्तां मा कुरु, स तु कुलपुत्रोऽस्ति । स तु वंशं विस्तारयति, पितॄन् तारयति, पुन्नामनरकात् त्रायते इति पुत्र इति पुराणप्रसङ्गे मया पण्डितमुखात् श्रुतम् । एवञ्च पुत्र्याः विवाहः पितुः परमकर्तव्यं दायित्वञ्च, प्रस्तावं स्वीकुरु ।

**सविता** (साश्चर्यं नटति) पितः ! पुं नाम नरकात् त्रायते इति व्युत्पत्तौ एव पुत्री शब्दोऽपि व्युत्पाद्यते । पुत्री अपि वंशं विस्तारयति, पितॄन् तारयति । उद्वाहिता पुत्री गृहस्थमुद्दीपयति । उभयोः कुलयोर्गृहदीपिका भवति । परन्त्वहं स्नातकं कृत्वा पितुराज्ञां स्वीकरोमि ।

**यज्ञराजः** (सक्रोधम्) पुत्रि ! अधिकं मा ब्रूहि, नार्याः पठनेन किमपि न भवति । विवाह्य पतिगृहं गन्तव्यं, पतिसेवा कर्तव्या, पतिरेव नारीणां देवता मता, तत्र श्वश्रूश्वसुराणां सेवा कर्तव्या, गृहकृत्यं सम्पादनीयं, गृहस्थाश्रमे अजागोमहिषाणां पालनपोषणं कर्तव्यं, कृषिव्यवस्था विधातव्या, अभ्यागतानां सेवा कर्तव्या, एतानि कार्याणि सम्पादयितुं विद्यां विनैव शक्यते, किमर्थं पठनीयम् ।

**सविता** (सरोषम्) पितः ! भवान् किं कथयति, माम् अज्ञानस्य महान्धकारे निमज्जयितुं वाञ्छसि ! अहं भवत आत्मजास्मि, भवतोऽशोऽस्मि । अहं भवतः वंशमुद्दीपयामि । यथासमयं विवाह्य पितृकुलं पतिकुलञ्च पावयामि विस्तारयामि च ।

**यज्ञराजः** (सक्रोधम्) आत्मजे ! अधिकं मा ब्रूहि, (ताडयति) गच्छ गोष्ठं, घासादिसङ्ग्रहं सम्पादय । (प्रतिष्ठा रुदति) । पाचनादिक्रियापि कुरु ।पश्चाद् विवाह्य पुत्रादिकमुत्पाद्य तेषां पालनं पोषणं विधातव्यम् । तदवसरे तव पुस्तकं न सहाय्यं जायते ।

**जयन्ती** (सोद्वेगम्) पितः ! किमर्थम् अत्र समागत्य कोलाहलः क्रियते ! किं सविता भवतः पुत्री नास्ति ? सा सम्यक्तया पठन्ती अस्ति । अवसरः



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लभ्यते चेत् पुत्र्याऽपि समाजं राष्ट्रञ्च परिवर्तयितुम् अग्रे नेतुं च शक्यते । तयापि पितृवंशस्य राष्ट्रस्य च नाम ख्यापयितुं पार्यते ।

**सविता** (सकरुणम्) पितः ! सर्वदैव मां किमर्थं धक्ष्यसि ? पुत्री पठति, पाठयति, गृहकृत्यञ्च सम्पादयति, पुत्रस्तु पठति खेलति एव । पठनेऽपि मनोयोगं नैव ददाति । यः कोऽपि पुत्रीं न पाठयति चेत् पठिता कुलवधूः कथं समुद्वाह्यते ! पठिता कुलवधू नो चेत् कथं कुलं दीपायते ? कथं गृहस्थसुखं लभ्यते ?

**यज्ञराजः** (सरौद्रम्) नाधिकं ब्रूहि बाले ! प्रथमं गृहकृत्यं सम्पादय, तदनु अवकाशो लभ्यते चेत् पठ । अस्माकं माता, पितामही, प्रपितामही, वृद्धप्रपितामही च निरक्षरतयैव गतवत्यः, परन्तु तासां गृहस्थजीवनं सम्यक्तया प्राचलत् । अस्माकं कुले न नरीणां पठनपाठनस्य परम्परा दृष्टा ।

**सविता** (साश्चर्यम्) जनक ! किं कथयति भवान्, प्राचीनकालादेव नारीशिक्षा प्राचलत्, नो चेत् गार्गी, मैत्रेयी, कात्यायनी, घोषा, मदालसा, अनेका नार्य विदुष्यः कथमभूवन् ? अथ च जनकस्य ब्रह्मसभायां गार्गी कथं महर्षिं याज्ञवल्क्यं हुङ्कृतवती ? । अनेका वेदमन्त्र- द्रष्ट्र्य ऋषिकाः सन्ति । पठनपाठनस्य परम्परा नासीत् चेत् कथं इमे विदुष्यो जायन्ते स्म !

**यज्ञराजः** (सोद्वेगम्) भवेयुः, विदुष्यः जायेरन्, तथापि गृहव्यवहारस्तु न प्रचलति । उदरपूरणं न जायते, जीवनवृत्तिस्तु न अग्रे प्रसरति । अतः कार्यं करणीयं, क्षेत्रं कर्षणीयं, घासः कर्तनीयः, भारो वोढव्यः, असौ व्यवहारः एव शिक्षामूलम् । सद्विचारः, सदाचारः

**सद्व्यवहारः** एव गृहस्थमूलम् (पिता गच्छति, प्रतिष्ठा रौति) ।

**सविता** (सदार्द्र्यम्) पिता यत् कथयतु, रात्रौ पठित्वापि परीक्षामुत्तीर्य उच्चशिक्षायां गन्तव्या । उच्चशिक्षार्जने यदि छात्रवृत्तिर्लभ्यते चेत् मां कोऽपि पठनात् अवरोद्धुं न शक्नोति । पठनाय गृहं परित्यज्यापि सर्वं प्रयत्नसम्भवं करोमि ।

**जयन्ती** (प्रसन्नतया) त्वया या प्रतिज्ञा विहिता सैव तवोत्कर्षस्य कारणं भविष्यति । कर्मणैव मानवः सिद्धिं विन्दति । सङ्कल्प एव परिणामस्य कारणम् । कर्मणो भाग्यस्य चोदयं याति चेत् भविष्यस्य कनकद्वारमुद्घाटयितुं शक्यते, सफलता च मिलति ।

**जया सविता !** सवितेव तव जीवनं सवितरति । यत्नो विधेयः ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**सविता** (सकारुण्यम्) सखे ! अहं परितो दुःखसागरे निमग्ना । बाल्ये एव जननी दिवङ्गता । विमात समागता । परन्तु तस्या मनसि मातृत्वं नास्ति । सापि मां तर्जयति, पिता पठनेन किं भवतीति निगदति । अहं 'विद्ययाऽमृतमश्नुते' परामपराञ्च विद्यां ज्ञात्वा ऐहिकं पारलौकिकञ्च दिव्यपथं समुज्वलयितुं वाञ्छामि ।

**यज्ञराजः** (सोद्वेगम्) यूयं वार्तां कुर्वन्तो वर्तध्वे, निशा समागता । पुत्रि ! स्वकीयं गृहकृत्यंसम्पादनाय गच्छ । सावधानतया कार्याणि कुरु । अद्यापि ग्रामेऽतिथयः समागताः सन्तीति श्रूयते । (यवनिकायाः पृष्ठभागे कोलाहलः श्रूयते । क्षणान्तरं विष्फोटनस्य ध्वनिः श्रूयते, रङ्गं धूमायते, कोलाहलायते च । विद्युद् द्योतते । प्रकाशः कदा तिमिरायते, कदा प्रदीप्यते, जना इतस्ततः कुर्वन्तः सन्ति । परस्परं ते 'पितः !, पुत्रि !, सखे जयन्ति ! सखे सवितेः !' इति गदन्ति । करुणाकरो वाद्यध्वनिर्गुञ्जति) ।

## तृतीयं दृश्यम्

समयः- सन्ध्यायाम् स्थानम्- औषधालयस्य प्रकोष्ठम्

(तिमिरे प्रकाशपुञ्जः क्रमशः प्रसार्यते, करुणामयं वातावरणं दृश्यते, कारुण्यं वाद्यञ्च गुञ्जति । प्रकाशः सरति, कुत्रचिच्छाया, कुत्रचित् प्रकाशः)

**प्रतिष्ठा** (अश्रूणि विमुच्य) पितः ! किमभवत् ? उत्तिष्ठोत्तिष्ठ ! किं रहस्यं कथयन्नासीत्, चेतनामेहि, (उपकरणेन परीक्षणं करोति, उपचारस्य विविधप्रयत्नम् करोति, सहयोगिन्योऽपि समागच्छन्ति)

**चिन्तानाथः** (श्वासकाशं बाधते, शनैः शनैः) बहवो जनास्तत्र घातिताः, अहमौषधालये षट्मास यावत् स्थितवान् । पत्नी, पुत्रः, पुत्री च तत्रैव घातिताः इति श्रूयते । पुत्री तु जीवितासीदिति भणन्ति जनाः, उपचाराय काष्ठमण्डपं नीता, परन्तु सा जीविता, मृता, विलुप्ता वा नाहं जाने । अनेक वर्षपर्यन्तं मया सा अन्विष्टा, कुत्रापि सा नैव लब्धा ।

**प्रतिष्ठा** (दैन्यभावेन) मम गृहमपि ग्रामे एवासीत्, तत्र विष्फोटनेन गृहं ध्वंसतं जातम्, माता, अग्रजः, पिता तत्रैव पञ्चत्वं गताः इति भणन्ति



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जनाः । अहञ्च अनाथत्वात् सर्वकारीयसौविध्ये अधीत्य, पश्चात् छात्रवृत्तिं लब्ध्वा चिकित्साविज्ञानमपठम् ।
पितुर्मातुश्च आशीर्वादेन, ईश्वरस्य कृपया, स्वस्य श्रमेण च अहमत्रेदानीमस्मि ।

**चिन्तानाथः** (अवरुद्धेन स्वरेण) पुत्रि ! ममापि पुत्री जीविता स्यात् त्वमिव तव वयसीव जायते स्म । तस्यापि पठनेऽतीव रुचिरासीत् । परन्तु अहं नारीभिः किमर्थं पठनीयं, पठनेन को लाभः इति वदामि स्म । मम मौढ्यात् तस्या भावना, पठनपाठनञ्च क्षतविक्षतं जातम् ।

**प्रतिष्ठा** (सशङ्कम्) भवतः पुत्र्या नाम किमासीत् पितः !

**चिन्तानाथः** (किञ्चिद् विचार्य) वयं सवितेति वदामः स्म । तस्याः कपोले तिलकमासीत् ।

**प्रतिष्ठा** (क्षणं विचार्य, मनसि 'मामपि जनाः सवितेति गदन्ति स्म, तिलकमासीत्, शल्यक्रिया-क्रमे तिलको गतः') सर्वकारस्य निकाये गत्वान्वेषणं नैव विहितम् ? कथं सा लुप्ता जायेत । भवतो नाम ग्रामे किमासीत् ?(स्मृत्वा, विचार्य) यज्ञराजः वदन्ति स्म जनाः ? शकुन्तला

**चिन्तानाथः** (रोमाञ्चितो भूत्वा) आम् भवती कथं ज्ञातवती ! मां जनाः यज्ञराजः इति कथयन्ति स्म । त्वं मम बाला सवितौव भवितव्या ! (साश्चर्यम्) वत्सले ! आगच्छ मम कुक्षौ । एषः तव दुष्टः कठोरो मूर्खः पितास्ति (हस्तावुत्थापयति, रुदति च) ।

**प्रतिष्ठा** (रोमाञ्चिता) पितः ! त्वमेव मम पितासि । विष्फोटनपश्चात् सव्रणाऽहं ग्रामादत्र समानीता, अत्रैव उपचारो विहितः, अत्रैव स्थित्वा कतिवर्षं कष्टं सोढ्वा सर्वकारीय सौविध्ये समधीता । पितः !स्वस्थो भवतु, मृत्युं विजित्य व्युत्थितो भवतु, पितः ! व्युत्थाय मां पश्य, मम कार्यं पौरुषं च पश्य भो ! मत्कृते त्वमेव पिता, त्वमेव मातासि । मातुः ममताया अनुभवो नैव लब्धः । पिता मां पितृत्वं मातृत्वञ्च ददातु ।

**चिन्तानाथः** (किञ्चिद् व्युत्थाय रुदन्) पुत्रि ! अमुं दुष्टपितरं क्षमस्व । मौढ्येन मया दुर्वाच्यमपि उक्तम् । पठने निरुद्धा त्वम् । सोढव्या पुत्रि ! परिश्रमेण भगवत्कृपया च त्वया सफलताधिगता । दुर्घटनया, असत्यसूचनया च आवयोः सम्बन्धविच्छेदो जातः ।

**प्रतिष्ठा** (सविनयम्) पितः ! भवान् पुत्र्या पठनेन किं भवति इति कथयति स्म, परन्तु अद्याहमेव चिकित्सको भूत्वा चिकित्सालयस्य प्रमुखत्वं बिभर्मि । सर्वे च चिकित्सकाः कर्मचारिणश्च मम निर्देशनानुसारं



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कार्यं कुर्वन्ति । अद्य विद्यायाः कारणात् स्थानं, मानं, सौविद्ध्यञ्चास्ति मत्कृते ।

**चिन्तानाथः** (सविनयम्) अहं मूर्खोऽस्मि बाले, मया प्रपितामहीनां समये या परिस्थितिरासीद् तदेव विचारितः, समयो गतिशीलोऽस्ति, न कमपि प्रतीक्षते समयः । सर्वकारः अधुना नारीसौविध्याय कार्यं कुर्वन्नस्ति, तासां नारीणां विकासाय, समुत्थानाय अनेका योजनाः समानीताः सन्ति इति ज्ञात्वाहं प्रसन्नः ।

**प्रतिष्ठा** (सगौरवम्) नारीणां कृते शिक्षायाः व्यवस्था प्राचीनकालेऽपि कृतासीत् । मध्यकाले एव नारीशिक्षायाः विलोपो जातः । अधुना नारीशिक्षाजागरणं प्रचलितमस्ति । नारीणां जीवने मर्यादायुक्ता स्वतन्त्रता, सुखं, शान्तिः, प्रसन्नता च आनेतव्या । सम्मानपूर्णेन दाम्पत्य-जीवनेन भवितव्यमिति मम विचारः । ता मातृशक्तिरूपेण पूजनीया, वन्दनीयाश्च भवन्ति।

**चिन्तानाथः** (प्रसन्नतया) पुत्रि ! त्वयाऽहं बोधितः । क्षन्तव्योऽहम् । धन्या त्वं, धन्या तव ममतामयी माता । यया देव्या त्वं पठनायाभिप्रेरिता, सापि विस्फोटने मृता । अग्रजश्च विस्फोटने मृतः स्यात् । अस्माकं वंशस्य कुलतिलकं त्वमेव असि । धन्या देवि ! त्वां प्राप्य अहमपि धन्यो जातः । (आलिङ्गनं कुरुतः । प्रकाशस्य विविधा गतिर्दृश्यते, वाद्यं श्रूयते, 'यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवता' 'नार्यो हि गृहदीप्तयः' 'नार्यो हि कुलदीप्तयः' इत्यादयो गुञ्जन्ति । पटाक्षेपश्च जायते ।)

॥ इति पाराशर्य-नवराजकट्टेलविरचितं प्रतिष्ठानामकं नाटकम् ॥



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

# पश्चात्तापः

प्रा.नवराजपाण्डेयः चातकः (देवघट्टः)

(मङ्गलाचरणं वाचयति)

नमोऽकिञ्चनवित्ताय सर्वसम्पत्प्रदायिने ।
आत्मारामाय शान्ताय द्वन्द्वातीताय शम्भवे ॥१॥
माधवायार्तनाथाय नमो भक्तार्तिहारिणे ।
संसारभयनाशाय रमानाथाय चक्रिणे ॥२॥

(नान्द्यन्ते प्रविशति सूत्रधारः)

**सूत्रधारः-** अलं विस्तरेण । आर्ये ! नेपथ्यविधानं विहितं चेद् अत्र समागच्छ । किञ्चित् कथनीयमस्ति किञ्चित् विधेयमस्ति ।

**नटी-** (प्रविश्य, परितो विलोक्य च) आर्य ! अत्र इयम् उपस्थिता अस्ति, किं सम्पादनीयम् अस्ति भो ! मया ?

**सूत्रधारः-** अत्र सभ्या जनाः समागताः सन्ति, तेषां मनोरञ्जनाय एकं सुन्दरं लघुनाटकम् अभिनेयं वर्तते ।

**नटी-** आर्य ! भवान् यदाज्ञापयति तत्सम्यक्तया परिपाल्यते ।

**सूत्रधारः-** आत्मारामः शान्तया वित्तहीनः
पुत्रश्चैको माधवो वृत्तिशून्यः ।
उद्वाह्याऽसौ सुन्दरीमात्मकान्तां
वित्तार्थी सन् क्वापि यातो विदेशे ॥३॥

**नटी-** आर्य ! सुन्दरं गीतं तु भवतैव प्रस्तुतम् । गीयतां भो ! अन्यच्च माङ्गलिकं किमपि ।

**सूत्रधारः-** प्रत्यावृत्तो वित्तमादाय गेहं
पश्चात्तापात् कान्तया सङ्गमोऽभूत् ।
तद्वृत्तान्तं वर्णयाम्यत्र सभ्याः !
दैवीवाचा या जयेत् सर्वदैव ॥४॥

**नटी-** आर्य ! इदञ्च मधुरं गीतमस्ति । सभासदां मनोविनोदाय लघुनाटकप्रदर्शनस्य सुन्दरोऽवसरोऽयम् । कथ्यतां केन लघुनाटकेन सामाजिकान् आह्लादयाम ?

**सूत्राधारः-** आर्ये ! अद्य श्रीकृष्णगण्डक्याः सन्निकट ग्रामवासिनः अकिञ्चनवित्तस्य खलु आत्मारामपरिवारस्य वृत्तान्तविलसितं



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रीमच्चातकाचार्यकविविरचितं पश्चात्तापनामकं लघुनाटकं प्रदर्शयामः ।

(इति निष्क्रान्तौ)

## प्रथमं दृश्यम्

**आत्मरामः-** (अकिञ्चनवित्तः सपरिवारम् आगत्य) हे भगवन् ! केन पूर्वकर्मणा अहं वित्तहीनो जातः ? कथं मया एतत्परिवारस्य पोषणं कर्तव्यम् ? अस्मत्परिवारे चत्वारः सदस्याः स्मः, परं काऽपि वृत्तिर्नास्ति । (पत्नीं प्रति) वद प्रिये ! कश्चिद् उपायः अस्ति चेत् तत् करवामः ।

**शान्ता-** स्वामिन् ! भवान् वृद्धो जातः । अद्यपर्यन्तं यथा कथञ्चित् भवता गृहसञ्चालनं कृतम्, अथ पुत्रः क्वचिद् गत्वा वित्तार्थं कामपि वृत्तिं करोतु इत्याशासे । (पुत्रं प्रत्याह) पुत्र ! वयं वित्तहीनाः स्मः । त्वया किमपि कार्यं कर्तव्यं येनास्माकं गृहव्यवहारश्चलेत् ।

**माधवः-** मातः ! भवता यद् उदितं तद् उचितमेव । अथ अस्मिन् विषये सम्यग् विचार्य किमप्यहं करिष्यामि । स्वदेशे विदेशे वा गत्वा वित्तार्जनस्य कार्यं करोमि, मातापितरौ सम्यक्तया पालयामि, पत्नीं च सम्यक्तया पालयामि, सुखेन तस्याः जीवनं सन्तोषपूर्णं करोमि ।

**शान्ता-** पुत्र ! तव विचारः समुचित एव । पुत्रो भूत्वा पठनाय धनार्जनाय च सुदूरमपि तेन गन्तव्यम् । कालात्, भयानकदावानलात्, चक्रवाताच्च पुत्रेण नैव भेतव्यम् । पौरुषं साधनीयं, 'वीरभोग्या वसुन्धरा' इति तु मया कुलपुरुषेभ्यो मुहुर्मुहुः श्रुतम् पुत्र !

**माधवः-** रमे ! अत्र समागच्छ । (रमा समागच्छति, रमां प्रति ) प्रिये ! किमपि वक्तुम् इच्छामि, यदि शृणोषि ।

**रमा-** (सोत्सुकम्) वल्लभः यत् कथयति कथं न शृणुयाम् ? सर्वम् अपि शृणोमि, यद् आज्ञापयति पतिदेवस्तत् सहर्षं करोमि । हृदयेश्वर ! मम जीवनस्य आधार एव भवान् अस्ति । मम चारुता भवतः सौभाग्याय जायते । नाहं भोग्या, अहं तु धर्मपत्नी अस्मि । पारिवारिकं, सामाजिकं, धार्मिकं दायित्वञ्च संवहामि भो देव !

**माधवः-** प्राणवल्लभे ! मम मनसि एका चिन्ता समागता, पितरौ च तदेव निगदतः । किं करणीयं प्रियवादिनि !



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**रमाः-** भवान् चिन्ताग्रस्त इव दृश्यते । यद् वक्तुम् इच्छति तद् वदतु । अहं तु भवतो जीवनार्धाङ्गिनी अस्मि, छाया अस्मि, माया अस्मि । दम्पत्योः परस्परं गोप्यं किमपि न भवति नाथ !

**माधवः-** प्रिये ! मत्पिता वृत्तिहीनः । पूर्वसञ्चितधनाभावात् अस्मद्विवाहार्थं पित्रा ऋणं गृहीतम् अस्ति । तत् प्रत्यावर्तनाय गृहव्यवहारसञ्चालनाय तव मनोरथपूरणाय च वित्तस्य आवश्यकता वर्तते ।

**रमा-** ततस्ततः किम् ? मया किं करणीयमस्ति ?

**माधवः-** अस्मद्देशे वृत्त्यर्थं उद्योगादायो न सन्ति । अत एव अस्मद्देशस्य बहवो युवानो वित्तार्थं परदेशे गतवन्तः सन्ति । मयाऽपि तत्रैव गत्वा द्रव्यम् अर्जनीयम् इति विचारितम् । त्वम् अत्रैव स्थित्वा वृद्धावस्थापन्नयोः मातापित्रोः सेवां कुर्वती सुखं तिष्ठ (पितरौ गच्छतः) ।

**रमा-** प्राणनाथ ! कथम् अहं भवता विना स्थास्यामि ? भवत्सन्निधौ मम दुःखम् अपि सुखायते । भवता विना तु दुःखार्णवे निमङ्क्ष्यामि । (इति वदन्ती अश्रुधारां विमुञ्चन्ती रोदिति ।)

**माधवः-** (अनेकयुक्तिभिस्ताम् सान्त्वयति) प्रिये ! द्रव्यम् अर्जयित्वा यथा शीघ्रम् आगमिष्यामि । मा चिन्तां कार्षीः ।

**रमा-** प्राणवल्लभ ! मां परित्यज्य गन्तुं न प्रभवसि । अहं तव छायास्मि, मायास्मि, यौवनेऽपि भवतः सान्निध्यं न लभेय चेद् विवाहस्य किं प्रयोजनं भवति ? वार्धक्ये आवयोः रूपलावण्यस्य, रतिरागस्य प्रहासखेलस्य किं प्रयोजनम् अवशिष्टं भवति नाथ ! अहं भवता साकं रन्तुं कामये । भवता साकं रमणेन मम मानसिकव्यथा शारीरिकव्याधिश्च नष्टौ भवतः ।

**माधवः-** (सरोमाञ्चम्) मन्मथे ! भवता यत् कथितं तदपि सत्यम्, मया यत् कथितं तदपि सत्यम् । परिश्रमेण व्यापारेण वेतनवृत्त्या वा द्रव्याणि तु अर्जितव्यानि एव, नो चेद् अस्माकं जीवनं कथं प्रचलति ? तव कनकमयं शरीरं कथं सुन्दराणि वस्त्राणि, सुन्दराणि आभूषाणानि च भूषयन्ति प्रिये !

**रमा-** (सोद्वेगम्) पत्न्याः सुखस्य स्रोतः पतिरेव । पतिरेव पत्न्या लज्जायाः आवारको जायते । पतिरेव पत्न्याः आभूषणानि । पतिरेव पत्न्याः



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वस्त्राणि । पतिरेव पत्न्याः सौन्दर्यम् । पतिरेव पत्न्याः शक्तिः । पतिरेव पत्न्याः प्राणाः । भवान् गच्छति चेद् मम सौन्दर्यं कुरूपायते, मम प्राणाश्च गच्छन्ति ।

**माधवः-** (स्पृशन्) तथा मा वद प्रिये । त्वं मम जीवनस्य आधारशिला असि । गृहिणी एव गृहस्थस्य मूलम्, गृहिणीं विना गृहम् अरण्यायते, मनः शिलायते, शरीरं च तृणायते । प्राणवल्लभे ! धनम् अर्जयित्वा शीघ्रम् एव आगमिष्यामि, विश्वसिहि ।

**रमा-** (नटति) पातीति पतिर्भवति इति मया श्रुतम् । पानम् उत्सृज्य गच्छसि चेत् त्वत्कृते पतिपदं सार्थकं न भवति । पत्युरनुपस्थित्या पत्न्याः मनश्चपलायते, शरीरं कम्पते, शरीरिकमानसिकरोगाश्च समुत्पद्यन्ते, अस्थिरे मनसि पापश्च समुद्भवति ।

**माधवः-** (नटति) मम पत्नी कियती बुद्धिमती अस्ति, चेतनशीला अस्ति, सुवक्त्री अस्ति, धन्यं मे जीवनम् । (आलिङ्गनं करोति) । त्वं तु स्वयमेव बुद्धिमती असि, अतो न चपलायते तव मनः, न पापं समुदेति प्रिये ! तव मनसि ।

**रमा-** परितो वारयति इति परिवारः इति मया श्रुतम् । त्वं मम चपलतां वारयसि, अहं तव चपलतां वारयामि, अन्यः अन्यं चरित्रस्खलनाद् वारयति, दुश्चरित्राद् वारयति । अतः सहैव स्थित्वा परस्परं रक्षितव्यम् । दूरं गच्छसि चेत् तव जीवने मम जीवने वा सङ्कटम् आपतितुं शक्नोति । अतः दूरं मा गच्छ ।

**माधवः-** स्वल्पसमयमेव तत्र स्थित्वा किञ्चिद् अर्जयित्वा समागच्छामि प्रिये ! चिन्तां मा कुरु हृदयवासिनि !

**रमा-** (रोदिति) प्राणवल्लभ ! मां मा त्यज ।

**माधवः-** मातः ! अधुनैव बहिर्गच्छामि । मम सखायश्च गच्छन्तः सन्ति । तैः साकं स्वदेशं विदेशं वा गत्वा धनानि अर्जयित्वैव प्रतिनिर्वतिष्यामि । दुःखम् अपवारयिष्यामि, अभावं दूरयिष्यामि, सुखं शान्तिं च आनेष्यामि । (माता झोलिकादिकमानयति)

**रमा-** मां परित्यज्य गच्छसि ! (हस्तौ उत्थाप्य रोदिति)

**माधवः-** प्राणवल्लभे ! शीघ्रमेव आगमिष्यामि । (निर्गच्छति)

(पटाक्षेपः)


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

## द्वितीयं दृश्यम्

(माधवो वृत्त्यर्थं मित्रैः सह परदेशं गच्छति । तदा दूरत्वात् परस्परम् अनयोर्वृत्तान्तज्ञानं नाभवत् । प्रगाढप्रणयबद्धयोः तयोः परस्परम् अनभिव्यक्तं मनोभावं तद्विरहव्यथाञ्च न कोऽपि वर्णयितुं शक्नोति । कतिपयकालानन्तरं माधवो गृहमाच्छति ।)

**माधवः-** (गृहमागत्य पितरौ प्रणमति) मातः कुशलिनी भवती ? पितः कुशली भवान् ?

**पितरौ-** आवां तु कुशलिनौ एव । त्वम् आयुष्मान् भव सौम्य, मनोरथाः तव पूर्णाः भवन्तु । किं त्वं कुशलतया समागतः ? मार्गे कष्टादिकं तु नैव अभवत् । धन्यम् अस्माकं जीवनम्, धन्यं पावनं च अस्माकं कुलम् । त्वादृशेन पुत्रेण गौरवान्वितौ आवाम् ।

**माधवः-** मातः ! रमा कुत्र गता अस्ति ?

**शान्ता-** सुत ! सा पञ्चदिनेभ्यः पूर्वं मातुर्ज्वरपीडावृत्तान्तश्रवणेन अस्मदाज्ञया तद्दर्शनार्थं जन्मगृहं गता अस्ति । 'कतिपयदिवसानन्तरम् आगमिष्यामि' इति कथितवती आसीत् तदा । आगच्छन्ती भवेत् । वर्षात् तस्या माता रुग्णा अस्ति । अतः सा प्रतिमासं गच्छति, पञ्चषाणि दिनानि स्थित्वा आगच्छति ।

**माधवः-** मातः ! पितः ! सा गृहव्यवहारं कथं कृतवती ? भवतोः सेवाकार्यं च सा कया रीत्या सम्पादितवती ?

**पिता-** पुत्र ! तव गमनस्य वर्षदिनानन्तरम् एव तस्याः व्यवहारेऽपि परिवर्तनम् अजायत । सा सर्वदैव व्यग्रा इव विलोक्यते स्म, चिन्तातुरा इव दृश्यते स्म । वारं वारं परिचङ्क्रमणाय रम्याणि वस्त्राणि परिधाय बहिः गच्छति स्म । चलद्यन्त्रेण केन साकं एकान्ते वार्तामपि करोति स्म ।

**माधवः-** (विवर्णभावं प्राप्य) मातः ! मम मनसि तु शङ्का उदेति, अहम् आगच्छन् अस्मि इति तु मया सूचिता, परन्तु माम् अनादृत्य कथं पितृगृहं गता सा । मया सर्वाणि अर्जितानि द्रव्याणि तस्या एव कोषागारसूचकाङ्के सम्प्रेषितानि आसन् । हस्ते तु मया स्वल्पानि एव द्रव्याणि आनीतानि सन्ति ।

**शान्ता-** (चिन्तितया मुखमुद्रया) शङ्का तु मम मनसि अपि आसीत्, परन्तु पुत्रवधूं किमपि न कथितवती पुत्रस्य अनुपस्थितौ । तस्या व्यवहारे भिन्नता


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

असीत् ।

**माधवः-** (चलद्भाषेण श्वश्रूं पृच्छति) भवत्पुत्री रमा कुत्रास्ति ? चलद्भाषश्च न संयोजयति आवयोः, अधुना सम्पर्को न जातः इति कथयति ।

**श्वश्रूः-** (चलद्भाषेण) सा षण्मासेभ्यः अत्र न आगतवती । यदाकदा चलद्भाषमाध्यमेन वार्तां करोति स्म । जामातः ! भवान् कदा समागतवान् विदेशात् ? तस्या मातुलगृहं सहजस्थाने अस्ति, सा तत्र गता भवेत् ।

**माधवः-** मातुलगृहस्य दूरभाषस्य अङ्कान् देहि । अहं लेखन्या लिखामि, क्षणं विरम्यताम्, लेखनी पत्रं च आनयामि (लिखति) ।

**श्वश्रूः-** शुभं भवतु नमो नमः । श्वशुरगृहेऽपि समागच्छतु जामातः !

**माधवः-** (चलद्भाषेण) मातुलानि ! रमा तत्र आगता वा न ? क्व गता जानासि किम् ?

**मातुलानी-** अद्यैव भोजनं कृत्वा जन्मगृहं गता । भवान् अपि सूचितो भवेत् । सा तु अत्र वारं वारं समागच्छति । मातृगृहं दूरं वर्तते, अतोऽत्र आगच्छति । कदाचित् तिष्ठति च । अत्रैव रमते सा । तस्याः सखायश्च अत्र सन्ति ।

**माधवः-** भवतु मातुलानि ! (नूतनाङ्केषु चलद्भाषेण सम्पर्कं करोति) रमे ! एष माधवो ब्रूते । कुशलं विद्यते ? गृहं मातरौ च परित्यज्य कुत्र गता असि प्राणवल्लभे ! अहम् गृहं समागतः । मत्प्रेषितैः द्रव्यैराधमर्ण्यं समापनीयम् अस्ति । शीघ्रम् आगच्छतु गृहं प्रिये !

**रमा-** माधवः त्वं विदेशात् समागतः ? षण्मासानन्तरं गृहमागच्छामि इति कथयसि स्म, कथं शीघ्रमेव समागतः ?

**माधवः-** स्वास्थ्यकारणात् शीघ्रमेव समागतः । (सरौद्रम्) द्रव्याणां कार्याणि सन्ति, आर्थिकव्यवहारो व्यवस्थापनीयः, अतः शीघ्रं समागच्छ ।

**रमा-** माधव ! त्वं मम सखा असि । त्वं बुद्धिमान् असि । मम बुद्धिः भ्रष्टा अभवत् । तव मित्रेण रमेशेन साकम् अहं षण्मासान् यावत् रमणं कृतवती, सर्वाणि द्रव्याणि नष्टानि, अधुनैव त्वया सम्प्रेषितानि द्रव्याणि सङ्गृह्य सः अपि पलायितः ।

**माधवः-** (सरोषं विवर्णो भूत्वा) रमे ! किमर्थम् एषः अनर्थः कृतः, बुद्धिमतीव वार्तां करोषि स्म, कार्यं तु तुच्छमेव ।

**रमा-** (सरोषम्) मूर्ख माधव ! नार्यः किं वाञ्छन्ति त्वं न जानासि, अहं पतिं कामये, रतिरागं कामये, मातृत्वं कामये, त्वं द्रव्यं कामयसे ! मम


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

## द्वितीयं दृश्यम्

(माधवो वृत्त्यर्थं मित्रैः सह परदेशं गच्छति । तदा दूरत्वात् परस्परम् अनयोर्वृत्तान्तज्ञानं नाभवत् । प्रगाढप्रणयबद्धयोः तयोः परस्परम् अनभिव्यक्तं मनोभावं तद्विरहव्यथाञ्च न कोऽपि वर्णयितुं शक्नोति । कतिपयकालानन्तरं माधवो गृहमाच्छति ।)

**माधवः-** (गृहमागत्य पितरौ प्रणमति) मातः कुशलिनी भवती ? पितः कुशली भवान् ?

**पितरौ-** आवां तु कुशलिनौ एव । त्वम् आयुष्मान् भव सौम्य, मनोरथाः तव पूर्णाः भवन्तु । किं त्वं कुशलतया समागतः ? मार्गे कष्टादिकं तु नैव अभवत् । धन्यम् अस्माकं जीवनम्, धन्यं पावनं च अस्माकं कुलम् । त्वादृशेन पुत्रेण गौरवान्वितौ आवाम् ।

**माधवः-** मातः ! रमा कुत्र गता अस्ति ?

**शान्ता-** सुत ! सा पञ्चदिनेभ्यः पूर्वं मातुर्ज्वरपीडावृत्तान्तश्रवणेन अस्मदाज्ञया तद्दर्शनार्थं जन्मगृहं गता अस्ति । 'कतिपयदिवसानन्तरम् आगमिष्यामि' इति कथितवती आसीत् तदा । आगच्छन्ती भवेत् । वर्षात् तस्या माता रुग्णा अस्ति । अतः सा प्रतिमासं गच्छति, पञ्चषाणि दिनानि स्थित्वा आगच्छति ।

**माधवः-** मातः ! पितः ! सा गृहव्यवहारं कथं कृतवती ? भवतोः सेवाकार्यं च सा कया रीत्या सम्पादितवती ?

**पिता-** पुत्र ! तव गमनस्य वर्षदिनानन्तरम् एव तस्याः व्यवहारेऽपि परिवर्तनम् अजायत । सा सर्वदैव व्यग्रा इव विलोक्यते स्म, चिन्तातुरा इव दृश्यते स्म । वारं वारं परिचङ्क्रमणाय रम्याणि वस्त्राणि परिधाय बहिः गच्छति स्म । चलद्यन्त्रेण केन साकं एकान्ते वार्तामपि करोति स्म ।

**माधवः-** (विवर्णभावं प्राप्य) मातः ! मम मनसि तु शङ्का उदेति, अहम् आगच्छन् अस्मि इति तु मया सूचिता, परन्तु माम् अनादृत्य कथं पितृगृहं गता सा । मया सर्वाणि अर्जितानि द्रव्याणि तस्या एव कोषागारसूचकाङ्के सम्प्रेषितानि आसन् । हस्ते तु मया स्वल्पानि एव द्रव्याणि आनीतानि सन्ति ।

**शान्ता-** (चिन्तितया मुखमुद्रया) शङ्का तु मम मनसि अपि आसीत्, परन्तु पुत्रवधूं किमपि न कथितवती पुत्रस्य अनुपस्थितौ । तस्या व्यवहारे भिन्नता



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

असीत् ।

**माधवः-** (चलद्भाषेण श्वश्रूं पृच्छति) भवत्पुत्री रमा कुत्रास्ति ? चलद्भाषश्च न संयोजयति आवयोः, अधुना सम्पर्को न जातः इति कथयति ।

**श्वश्रूः-** (चलद्भाषेण) सा षण्मासेभ्यः अत्र न आगतवती । यदाकदा चलद्भाषमाध्यमेन वार्तां करोति स्म । जामातः ! भवान् कदा समागतवान् विदेशात् ? तस्या मातुलगृहं सहजस्थाने अस्ति, सा तत्र गता भवेत् ।

**माधवः-** मातुलगृहस्य दूरभाषस्य अङ्कान् देहि । अहं लेखन्या लिखामि, क्षणं विरम्यताम्, लेखनी पत्रं च आनयामि (लिखति) ।

**श्वश्रूः-** शुभं भवतु नमो नमः । श्वशुरगृहेऽपि समागच्छतु जामातः !

**माधवः-** (चलद्भाषेण) मातुलानि ! रमा तत्र आगता वा न ? क्व गता जानासि किम् ?

**मातुलानी-** अद्यैव भोजनं कृत्वा जन्मगृहं गता । भवान् अपि सूचितो भवेत् । सा तु अत्र वारं वारं समागच्छति । मातृगृहं दूरं वर्तते, अतोऽत्र आगच्छति । कदाचित् तिष्ठति च । अत्रैव रमते सा । तस्याः सखायश्च अत्र सन्ति ।

**माधवः-** भवतु मातुलानि ! (नूतनाङ्केषु चलद्भाषेण सम्पर्कं करोति) रमे ! एष माधवो ब्रूते । कुशलं विद्यते ? गृहं मातरौ च परित्यज्य कुत्र गता असि प्राणवल्लभे ! अहम् गृहं समागतः । मत्प्रेषितैः द्रव्यैराधमर्ण्यं समापनीयम् अस्ति । शीघ्रम् आगच्छतु गृहं प्रिये !

**रमा-** माधवः त्वं विदेशात् समागतः ? षण्मासानन्तरं गृहमागच्छामि इति कथयसि स्म, कथं शीघ्रमेव समागतः ?

**माधवः-** स्वास्थ्यकारणात् शीघ्रमेव समागतः । (सरौद्रम्) द्रव्याणां कार्याणि सन्ति, आर्थिकव्यवहारो व्यवस्थापनीयः, अतः शीघ्रं समागच्छ ।

**रमा-** माधव ! त्वं मम सखा असि । त्वं बुद्धिमान् असि । मम बुद्धिः भ्रष्टा अभवत् । तव मित्रेण रमेशेन साकम् अहं षण्मासान् यावत् रमणं कृतवती, सर्वाणि द्रव्याणि नष्टानि, अधुनैव त्वया सम्प्रेषितानि द्रव्याणि सङ्गृह्य सः अपि पलायितः ।

**माधवः-** (सरोषं विवर्णो भूत्वा) रमे ! किमर्थम् एषः अनर्थः कृतः, बुद्धिमतीव वार्तां करोषि स्म, कार्यं तु तुच्छमेव ।

**रमा-** (सरोषम्) मूर्ख माधव ! नार्यः किं वाञ्छन्ति त्वं न जानासि, अहं पतिं कामये, रतिरागं कामये, मातृत्वं कामये, त्वं द्रव्यं कामयसे ! मम


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यौवनभारेण पुष्पितं शरीरं रमेशम् अकामयत, प्रतिदिनं स मया साकं मिलति स्म, तव समाचारं कथयति स्म, तव समाचारेण लुब्धा अहं प्रतिदिनं तेन सह मिलामि स्म, मम शरीरं चेतनं मनश्च तत्रैव संलग्नम् अभवत् ।

**माधवः-** किं कथयसि रमे ! त्वं मम प्राणः असि, एवं मा कथय ।

**रमा-** रमा तु मृता । अधुना मम वल्लभः रमेशः अस्ति । स मम कामं पूरयति, यौवनसुखं ददाति, शारीरिकीं मानसिकीं च तुष्टिं सम्पादयति ।

**माधवः-** (विवर्णभावेन) तर्हि मम द्रव्याणि निवर्तय ।

**रमा-** सर्वाणि द्रव्याणि गृहव्यवहारे मया व्ययीकृतानि मूर्खमनुष्य !

**माधवः-** मातः ! वयं वञ्चिताः । पितः वयं वञ्चिता । रमायाः व्यवहारे भिन्नता आगता चेद् भवद्भिर्विचारणीयम् आसीत्, कथनीयम् आसीत्, अस्मिन् आगमनसमये मया प्रदत्तानि द्रव्याणि सङ्गृह्य सा गता । तया तु पूर्वमेव कथितम् आसीत्, एतादृशी परिस्थितिः समागच्छति, परदेशं मा गच्छ इति ।

स्वापराधं मनसि अवधार्य माधवो भूयो भूयः पश्चात्तापं करोति । स्मारं स्मारं च पद्यमिदम् उच्चारयति

सहसा विदधीत न क्रियाम्
अविवेकः परमापदां पदम् ।
वृणुते हि विमृश्यकारिणं
गुणलुब्धाः स्वयमेव सम्पदः ॥ (भारविः)

॥इति॥


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

# जीवनशोधनम्

**आचार्यः पीपलमणिसिग्देलः**
न्यूयोर्क

(अद्य अमेरिकादेशस्य न्यूयोर्कनगरे मासद्वयात् मणिपरिवारः गृह एव उपविश्य यमदूतस्य भयेन कम्पमानोऽस्ति । सर्वे जनाः कोरोना इति नाम्नो महाव्याधेर्भयाद् गृहे सन्ति । मदीयं गृहं मासद्वयं यावत् शून्यमिव प्रतिभाति । कोरोनाभयात् सर्वमपि मम कार्यमवरुद्धम् । आविश्वं चतुःशतकोटिजनाः स्वकीयगृहकारागारे एव अवरुद्धाः सन्ति । विज्ञानमपि औषधान्वेषणाय निदानाय असफलम् । मासेभ्यः सर्वे च सदस्या गृह एव सन्ति । ते परस्परं संवदन्ति ।

**पिता-** पुत्र प्रयास ! उत्तिष्ठतु भो ।

**पुत्रः-** दशकलापर्यन्तं शयनं करोमि । अहं स्वप्नविज्ञानस्य चिन्तनं कुर्वन्नस्मि भो पितः !

**पिता-** विज्ञानस्य वार्तां मा कुरु । अद्य विद्यालयस्य दूरसञ्चारमाध्यमेन तव द्वादशकक्षायाः परीक्षा प्रचलति । शीघ्रं स्नानं विधाय नित्यकर्म च सम्पाद्य सावधानतया पठतु ।

**पुत्रः-** विज्ञानोपरि किमर्थं क्रुध्यति पितः ? विज्ञानं तु विज्ञानमेव । अधुना तु विज्ञानमेव विश्वसम्राट् अस्ति ।

**पिता-** (सव्यङ्ग्यम्) कोरोनाविषाणुसङ्कटे विज्ञानस्य शक्तिरपि दृष्टा पुत्र ! अधुना विज्ञानमपि पराजितम् ।

**पुत्रः-** (सोद्वेगम्) नहि पितः ! नहि । विज्ञानं न कदापि पराजितं भवति, भविष्यति च ।

**पिता-** (दृढः सन्) विज्ञानमपराजितं भवतु, परन्तु विषाणुना विश्वविजयो विहितः, तिरोहितं विज्ञानम् ।

**पुत्रः-** कोरोनाविषाणुविनाशाय वैज्ञानिकाः स्वानुसन्धानशालासु लीनाः सन्ति पितः ! आविष्कुर्वन्ति ते औषधम् । परन्तु पितः कस्मात् देशाद् अयं नरसंहारको विषाणुः प्रसृतः ?

**पिता-** (परिभ्रम्य) चीनदेशस्य वुयाननगरात् २०१९ तमे ईशवीयवर्षे डिसेम्बरमासे कोरोना इति अतीव सूक्ष्मविषाणुः अभक्ष्यपक्षि- मांसभोजन- माध्यमेन मानवशरीरे प्रविष्टः । तस्य विषाणोरपरं नाम 'कोभिड-१९' इति विहितं


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जनैः । चीनदेशस्य चिकित्सकाः वैज्ञानिकाः चिन्तकाश्च तद्रोगशमनाय, महामारीव्याधिविनाशाय महान्तं प्रयत्नं कृतवन्तः । परन्तु ते असफला जाताः । अनेन व्याधिना तत्र चीनदेशे चतुःसहस्राधिका जना हताः । अशीतिसहस्रसङ्ख्यका जना विषाणुना आक्रान्ताः ।

**पुत्रः-** (हस्तौ प्रसार्य) अयं मानवसङ्घातको विषाणुः कथं समुत्पन्नः कथञ्च विश्वे प्रसृतः पितः !

**पिता-** अयं विषाणुश्चर्पटीपतगे प्राकृतरूपेण विकसितो भवति । भुजङ्गेऽपि कोरोणाविषाणुः प्राप्यते । चीनदेशीया जनाः सर्वेषां पशूनां, सरीसृपाणां, समेषां पक्षिणाञ्च मांसं खादन्ति । ते चर्पटीपक्षिणो मांसं खादन्ति, मांसरसञ्च पिबन्ति । तत एव मानवशरीरे कोरोणाविषाणोः प्रवेशो जातः । अयं विषाणुः मानवात् मानवेषु झटित्येव सङ्क्रामति । वुआननगरे बहवो जनाः सङ्क्रमिताः । तत एव चीनदेशस्य पर्यटकैर्व्यापारिभिश्च इटाली-फ्रान्स- बेलायत- जर्मनी-डेनमार्कादिदेशेष्वयं प्रसारितः । ततः अमेरिकादेशे प्रविष्टः ।

**पुत्रः-** अमेरिकादेशे अयं विषाणुः किमपि कर्तुं न प्रभवति इत्यहं मन्ये । अयं देशो विश्वस्य शक्तिमत्तमो वर्तते, अत्र बहवो वैज्ञानिकाः सन्ति, सर्वे च आविष्काराः अत्रैव भवन्ति, अत्रैव विशाला वैज्ञानिकप्रयोगशालाः सन्ति, अतः वैज्ञानिका औषधं समुत्पाद्य विषाणुम् इमं मारयिष्यन्ति ।

**पिता-** (सोद्वेगम्) वैज्ञानिका अपि पराजिताः, तेषां प्रयत्नः निष्फलो जातः । अतो तेन विषाणुना विज्ञानमपि पराजितम् इत्यहं मन्ये । अत एवाहं विज्ञानाय क्रुध्यामि । वैज्ञानिकाः मानवसंहाराय परमाण्वस्त्राणि निर्मातुं शक्नुवन्ति, ते समुद्रं विलोडयन्ति, गगनं घर्षयन्ति, अपरग्रहमपरब्रह्माण्डं वा जिगमिषन्ति गच्छन्ति च, परन्तु परमाणुरूपं कोरोनाविषाणुं निवारयितुं नैव पारयन्ते ।

**पुत्रः-** (ससंभ्रमम्) का चिन्ता पितः ! अधुना तु गौराङ्गा एव दिवङ्गताः सन्ति । ते अनुशासनस्य पालनां नैव कुर्वन्ति, मनोरञ्जनधनाः गच्छन्तु यमनगरीम् ।

**पिता-** (सोद्वेगम्) एतादृशं वाक्यं मा कथय पुत्र ! मानवै मानवानां संरक्षणं विधातव्यम् । अस्माकं तु एष आदर्शो 'लोकाः समस्ताः सुखिनो भवन्तु' सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः' इति च । अतः अस्माभिः पौरस्त्यसंस्कृतिरनुकरणीया ।

**पुत्रः-** (सोद्वेगम्) पितः ! वयं त्वधुना अत्याधुनिके वैज्ञानिकराष्ट्रे स्मः । अतः


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विज्ञानमार्ग एव अनुकरणीय इति मम वादः। विज्ञानस्य विचारः वस्तुवादी भवति, विज्ञानधारा पृथ्व्यप्तेजोवायुवाकाशादिपदार्थानां भौतिकव्याख्यां कर्तुं समुद्यता अस्ति। अत इयमेव पद्धतिरनुकरणीया। अन्ये तु काल्पनिका वादाः इति मम विचारः।

**पिता-** (सरोषम्) मा वद, मा वद। ते गौराङ्गाः जडात्मकं जगदिति मानयन्ति, वयं तु जडचेतनात्मकं जगत् इति स्वीकुर्मः। चेतनायाः एव अभिव्यक्तिर्जगद् अस्तीति पौरस्त्यदर्शनस्य सारः। अतो वयं भगवन्तम् ईश्वरं पूजयामः, सच्चिदानन्दम् ईश्वरं ध्यायामः।

**माता-** (सजिज्ञासम्) पितापुत्रौ किं कुर्वन्तौ स्तः। तप्तोदकेन स्नानं कुरु, तप्तजलं पिब, भोजनान्तरं तप्तदुग्धं पिब। प्रतिघण्टं हस्तौ प्रक्षालय, प्रतिपञ्चघण्टं हरिद्राऽर्द्रक- ज्येष्ठमधु- वचा (बोजो)-हिङ्गुपत्री (जिम्मू) -तुलसीदलानि सम्मिश्र्य सजलं पक्त्वा तज्जलं पानीयम्। अधुना एव अहम् आनयामि। मलीनवस्त्राणि देहि, प्रक्षालयामि। सर्वैः मिलित्वा अद्य गृहपरिमार्जनं विधातव्यम्। गृहमलं, वस्त्रमलं, शरीरमलमपि रोगस्य कारणं भवति।

**पिता-** (सोद्वेगम्) अपि च मानसमलमपि रोगस्य कारणम्। अतो मानसमलनिवारणाय योगो विधातव्यः, क्रियायोगः, ध्यानयोगश्च सम्पादनीयः। सङ्गीतयोगो नृत्ययोगश्च सम्पादनीय इति शास्त्रविचारः।

**पुत्रः-** विषाणुस्तु रोगोऽस्ति, ध्यानेन, योगेन, कीर्तनेन, जपेन कथं विषाणुः पराजितो भवित ? विषाणौ तु भौतिकगुणो भवति, भजनेन कीर्तनेन ध्यानेन वा तस्य निराकरणं कथम् ?

**पिता-** (नटति) पुत्रस्य विचारः समीचीनः। परन्तु यथा विषाणुः अदृश्योऽस्ति, तथैव जपध्यानादयायोऽपि अदृश्या एव। तथापि विषाणुरिव ते मानसप्रभावं, शारीरिकप्रभावम्, आध्यात्मिकप्रभावञ्च समुत्पादयन्ति। अतो ध्यानादिना मानसशक्तिः जागर्ति, इच्छाशक्तिः दृढायते, क्रियाशक्तिः सम्बलायते, ज्ञानशक्तिः पल्लवायते।

**दुहिता-** (वात्सल्यस्वभावेन) माता पिता च किं कथयते नाहं जानामि। परन्तु मम विद्यालयः कदा पर्यन्तं पिनद्धो भविष्यति ? वयं गृहे एव बद्धभूत्व कदा पर्यन्तं वत्स्यामः ?

**माता-** (सदैन्यम्) खेदं मा कुरु दुहितः ! अस्माकं क्रोडे स्थित्वा त्वयि का चिन्ता प्रबाधते ? विद्यालयाः, विश्वविद्यालयाः सर्वे पिनद्धाः सन्ति। सर्वकारस्य


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कार्यालयाः, उत्पादनयन्त्रालयाः, विपण्यः, यातायातसाधनानि, वायुयानानि च अवरुद्धानि सन्ति । आविश्वम् अधुनापर्यन्तं पञ्चाशतृ-लक्षमिताः जनाः विषाणुना सङ्क्रामिताः सन्ति । द्विलक्षाधिका जना दिवङ्गताः । विषाणुः मुखद्वारेण नासिकाद्वारेण वा श्वासमार्गं प्रविश्य आक्रामति । ज्वरः आगच्छति, शिङ्घाणं नैरन्तर्येण पतति । अतो गृहे एव स्थित्वा स्वस्य स्वपरिवारस्य च रक्षणं विधेयं बालिके !

**दुहिता-** (हसति, हासयति च) मातापि किं कथयति ! गृहे स्थित्वापि कथं रोगस्य निदानं भवति ? नाहं जाने ।

**पिता-** दुहितः ! मा भैषीः । सावधानतया गृहे एव वस । अयं विषाणुः सङ्क्रामकः अस्ति, एको रुग्णो जनः शतेषु जनेषु संक्रामयितुं शक्नोति । अतोऽयं विषाणुः घातकोऽस्ति । अस्य रोगस्य लक्षणं शरीरे पीडा भवति, छिक्का समागच्छति, ज्वरः उत्कर्षं प्राप्नोति, शरीरं दुर्बलायते, घ्राणशक्तिः ह्रासं गच्छति, इन्द्रियाणि शिथिलायन्ते । श्वासप्रश्वासौ घुरघुरायेते, शरीरे काठिन्यं जायते । अस्य निदानाय औषधमेव नास्ति । अतः गृहसेवनमेव अस्य औषधं मन्येऽहम् ।

**पुत्रः-** तस्य कोरोना इति विषाणोः प्रभाव अमेरिकादेशेऽपि परिदृश्यते ?

**पिता-** निश्चितमेव । अमेरिकादेशस्तु तेन व्यापकतया ग्रस्तोऽस्ति । अद्य दशलक्ष्याधिका जनाः विषाणुना सङ्क्रमिताः सन्ति चेत् षष्टिसहस्राधिका जना यमदूतस्य क्रूरप्रहाराद् यममार्गे प्रचलन्तः तदालयं गतवन्तः ।

**पुत्रः-** कस्मात् कारणात् कोरोनानामा कीटः प्रसरति ?

**पिता-** खाद्यात्, पेयात्, श्वसात्, सामान्यजनसम्पर्कात् च कोरोनाव्याधिः परस्परं सङ्क्रमति ।

**पुत्रः-** (नटति) कथं च स निरोद्धुं शक्यते ?

**पिताः-** विशेषतः हस्तप्रक्षलनमाध्यमेन तथा शुद्धवस्त्र-धारणेन, अन्यजनेभ्यो दूरतः स्थित्वा च निरोद्धुं शक्यते ।

**पुत्रः-** अन्यः कोऽपि उपायो नास्ति ? अस्माकं भविष्यम् अन्धकारमयमेव ?

**पिता-** उपायो भविष्यति एव, यथा रात्रिर्गमिष्यति, सुप्रभातम् भविष्यति, भास्वान् उदेष्यति, तथैव रोगव्याधिजरासुखानि च चक्रवत् परिवर्तन्ते, रोगा आगच्छन्ति, गच्छन्ति च ।

**पुत्रः-** आम्, एतादृशे वैज्ञानिकसमये निश्चितमेव निरोद्धुं शक्यते सः । यदि रोगं


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

निरोद्धुं न शक्यते चेत् विश्वं विनाशाय जायते । सर्वापि विद्या निष्फला भविष्यति ।

**पिताः-** विज्ञानं तु एकाङ्गि एव । विशेषतोऽध्यात्मज्ञाननेन, ध्यानेन, जपेन, योगेन एवं स्वस्थाहारविहारमाध्यमेन च रोगभयात् मुक्तिर्भविष्यति ।

**पुत्रः-** (हास्येन) पिता अपि परिहासयति धारणाध्यानसमाधियोगमाध्यमेन कथं कीटनाशः ?

**पिता-** (नटति) अस्माकं वैदिकसनातनजीवनपद्धतयोऽतीव वैज्ञानिकाः जीवनोपयोगिनश्च सन्ति । नमस्करणं, भोजनपूर्वं हस्तप्रक्षालनम्, भोजनसमये श्वेतवस्त्रधारणं, निम्बहरिद्रातुलस्यादीनां सेवनं, योगस्य अभ्यासः, आहारविहारस्य नियमितसेवनञ्च पूर्वीय- संस्कारस्य नियमा अद्यापि उपयोगिनो दृश्यन्ते ।

**पुत्रः-** अमेरिकादेशे पौरस्त्यसंस्कृतिसंरक्षणाय च संस्कृतभाषायाः संरक्षणाय अधुना किमपि कार्यं भवति ?

**पिता-** 'जयतु संस्कृतम्' इति संस्था संस्कृतभाषावाङ्मयानाम् उत्थानाय स्थापिता वर्तते । इयं संस्था स्थापनाकालादेव ज्ञानविज्ञानचैतन्यसमन्वित-संस्कृतवाङ्मयसंरक्षणाय प्रतिबद्धा प्राप्यते । संस्कृतचेतनाः सर्वलोकहिताय नियोजयितुं, तदा धर्मभूतये, राष्ट्रभूतये, विश्वभूतये संस्कृतशिक्षासम्पादनार्थं चेयं संस्था सक्रिया विद्यते । 'जयतु संस्कृतम्' संस्थायाः शाखा अमेरिकादेशेऽपि विद्यते । तथैव संस्कृतस्य प्रचाराय तस्य विश्वव्यापीकरणाय च विश्वअध्यात्मकेन्द्रम् इति संस्था अपि विद्यते । तथैव अन्या बह्व्यः संस्था अपि विद्यन्ते ।

**पुत्र-** शोभनम् । अहमपि संस्कृतवाङ्मयस्य प्रचारहेतवे मम विद्यालये सखिभिः सह वार्तालापं करोमि ।

**पिता-** हस्तप्रक्षालनं कृत्वा आगच्छ दिवा भोजनस्य समयो जातः, भ्राता पीयूषः कुत्र अस्ति ? समाह्वय ।

(एषः श्लोकः गुञ्जति प्रेक्षागृहे)

सनातनसंस्कृतिर्हि धन्या जीवनपद्धतिः ।
आर्यावर्तश्च धन्यो धन्यमुपनिषद्दर्शनम् ॥
दिव्यहिमालयो धन्यो धन्या च सप्तगण्डकी ।
सैषा पुण्यभूमिर्धन्या धन्यं सिद्धतपोवनम् ॥ अस्तु ।


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

# प्रत्यागमनम्

डा. बद्रीपोखेलः

## प्रथमोऽङ्कः

(तत्र हिमालयस्योपरि अधस्ताच्च मेघानां, वृक्षाणां चित्राणि सन्ति । सुधीरस्य परिवारो नेपालस्य सौन्दर्यविषये वातावरणस्य विषये च परस्परं वदन्तः सन्ति)

**सुधीरः-** के ते ? दूरस्थिताः प्रकाशमानाः ? जानन्ति भवन्तः ?

**प्रवीरः-** तत्र दूरे दृश्यमानाः ते हिमालयाः सन्ति नेपालस्य सौन्दर्यवर्धकाः । वयं जानीम एव ।

**चञ्चला-** कति सन्ति नेपाले हिमालयाः ? ये परिभ्रमणार्थं नेपालं समागच्छन्ति ते वर्णयन्ति नेपालस्य हिमालयसौन्दर्यम् ।

**सुधीरः-** किं तेषां नामानि अपि भवन्तो जानान्ति ? के सन्ति ते हिमालयाः ?

**प्रवीरः-** ते महालंगूरपर्वतशृङ्खलायां स्थिताः हिमालयाः सन्ति । तस्यां पर्वतशृङ्खलायां विश्वप्रसिद्धः पर्वतराजः सगरमाथा अपि विराजते ।

**सुधीरः-** अहो ! तत्रास्ति सगरमाथा ? मया तु सगरमाथाञ्चलस्य सोलुखुम्वुमण्डले सगरमाथा वर्तते इति श्रुतम् आसीत् ।

**प्रवीरः-** सत्यं भवता श्रुतम् । तत्रैवास्ति सगरमाथा । सर्वोच्चहिमालयो महालङ्गूरपर्वतश्रेण्यां विराजते । तत्र महालङ्गूरशृङ्खलायां अनेके हिमालयाः सन्ति । ते हिमालयाः उच्चाः उच्चतराः उच्चतमाश्च सन्ति । स एव सगरमाथा विश्वस्य उच्चतमो हिमालयोऽस्ति । अथ च नेपाले महालङ्गूर-अन्नपूर्ण-धवलगिरि-हिमालचुली-माछापुच्छ्रेनामकानि अनेका उच्चोच्चतरोच्चतम च हिमशृङ्खला सन्ति ।

**अचला-** (नटति) काः विशेषताः सन्ति हिमालयानाम् ? त्वं कथयितुं शक्नोषि माम् ?

**प्रवीरः-** हिमालयाः नेपालस्य प्राकृतिकगौरवोत्कर्षकाः सन्ति । यस्मिन् कस्मिन् अपि देशे यदि त्वं गच्छसि, तत्र नेपालस्य नाम प्रथमतः हिमालयस्य उत्तुङ्गतायाः कारणेन आगच्छति । ततः एव अन्येषां विशेषतानां नामानि आगच्छन्ति ।

**अचला-** (साभिनयम्) को लाभः हिमालयेभ्यः ? किं भवति ? कथं हिमालयस्य उत्पत्तिर्जाता ?

**सुधीरः-** (नटति) हिमालयस्य इतिहासो विश्वब्रह्माण्डस्य



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रचनायाः क्रमे समागच्छति । ब्रह्मवैवर्तमहापुराणस्यानुसारेण सावित्रिविधात्रोः हिमालयानां जन्म अभवत् । प्रथमं मधुकैटभयोः मेदसः पृथिव्याः सृष्टिरजायत । वैज्ञानिकाः संसारस्य उत्पत्तिविषये स्पष्टतया वक्तुं न शक्नुवन्ति । 'अतिप्राचीनकाले अभवत्' इत्येवं ते ब्रुवन्ति, महाविष्फोटनादिसिद्धान्तानां व्याख्यां कुर्वन्ति । अधुना वैज्ञानिकैः महाविष्फोटनसिद्धान्तस्य खण्डनं विधाय रश्मिसिद्धान्तोऽपि प्रतिपादितोऽस्ति । हिमालयानां स्रोतोभ्य एव नद्यः प्रवहन्ति । हिमनदीषु मधुराणि शीतलानि च जलानि संवहन्ति । यदि जलं न भवति तर्हि अन्नानि नोत्पद्यन्ते । जीवनयोग्यं वातावरणं च न भवेत् । अद्भिर्ग्लायमानत्वं प्राणित्वमिति हि प्राणिलक्षणं भवति ।

**प्रवीरः-** परन्तु इदानीं हिमालयाः शुष्कतां निर्हिमतां वा गच्छन्तः सन्ति इति श्रूयते । तथैव दक्षिणध्रुवस्य हिमालया अपि सागरे विलीना जायमानाः सन्ति । उत्तरध्रुवस्यापि इयमेव अवस्था अस्तीति तज्ज्ञाः कथयन्ति । हिमे विलीने सति समुद्रतटस्थानि नगराणि अपि मज्जन्ति, लुप्यन्ते वा इति तेषां घोरम् अनुमानमस्ति ।

**अचला-** इदानीं वातावरणस्य ह्रासो जायमानोऽस्ति । मनुष्याः प्रकृतेः संरक्षणं न कुर्वन्ति, वैज्ञानिकाः यत् कथयन्ति, वातावरणविज्ञा यत् भणन्ति जनाः तत् न कुर्वन्ति । अतः समस्या वर्धमाना अस्ति । प्रकृतिकोषस्य संरक्षणं न भवति चेद् विश्वव्यवस्थापि न संरक्षिता भविष्यति । प्रकृतौ कुपितायां सत्यां सर्वं विनाशाय जायते । नेपालस्य प्रकृतिनिर्मितं वातावरणमक्षतयौवना कामिनीव मनो हरति ।

**सुधीरः-** पूर्वीयदर्शनशास्त्रे, आयुर्वेदे विविधचिन्तनेषु, पुराणेषु च प्रकृतिसंरक्षणस्य विविधाः विचाराः प्रकटीकृताः सन्ति । प्रकृत्या एकम् अपि कणं विनोद्दृश्यं नैव ग्रहणीयं भवति, वनौषधीनामुच्छेदे नैव करणीयः । जनाः प्रकृतिशास्त्रिभिः प्रस्तावितानि पूर्वीयदर्शनशास्त्रे समुल्लिखितानि कर्माणि च न कुर्वन्ति । यतो वातावरणस्य विनाशो भवति । वातावरणस्य विनाशेन हिमालयस्य अस्तित्वञ्च प्रतिदिनं दुर्बलायते ।

**प्रवीरः-** वैज्ञानिकानां, विदुषां, वातावरणशास्त्रिणाञ्च वचनपालनेन, ब्रह्माण्डस्य इतिहासज्ञानेन च वातावरणस्य सन्तुलनं कर्तुं शक्यते । विशेषेण तत्र द्वौ मार्गौ स्तः- १.विदुषां वचनपालनम् २. स्वविवेकस्य उपयोगश्च । अनुसन्धानद्वारा प्राप्तानां विषयाणाम् अनुगमनेन, पालनेन आत्मनो


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विवेकस्य प्रयोगेण च प्रकृत्याः संरक्षणं कर्तुं पार्यते, येन आस्माकं जीवनं सुखेन गच्छति, नहि चेद् दुरुहं भवति इति मम कथनस्यार्थः।

**अचला-** प्रथमतः आत्मनः, समाजस्य, विश्वस्य च व्यवस्थायै हितकरकार्यं बोद्धव्यम्। समाजे चेतनायाः वृद्धिर्विधेया। बालकानां विद्यार्थिनां कृते तादृशेषु विषयेषु पाठ्क्रमं निर्माय पाठयितव्यम्। ये वातावरणस्य विनाशं कुर्वन्ति, सर्वकारेण तेषां कृते दण्डव्यवस्था कार्या, ये वातावरणं संरक्षन्ति तेषां कृते पुरस्कारस्य व्यवस्था च विधातव्या। वातावरणसंरक्षणस्य लाभादेरसंरक्षणस्य हानेश्च चित्रेभ्यो दूरदर्शनेभ्यो, आकाशवाणीभ्यो, वैद्युतसञ्जालेभ्यश्च प्रचारप्रसारौ विधेयौ।

(अकस्मात् द्वारम् उद्घाट्यते। बहिर्जनाः कोलाहलं कुर्वन्ति। 'किम् अभवत् ?' इति तत्र भयप्रद वातावरणं दृश्यते। सुधीरप्रवीरावपि वार्तां त्यक्त्वा द्वाराभिमुखौ धावतः।) पटाक्षेपः

## द्वितीयं दृश्यम्

(तत्र जनाः परस्परं नद्या अतिप्रवाहेण सद्यो विनाशितानां क्षेत्राणामन्यभूविषये च वार्तां कुर्वन्तः सन्ति।)

**सुधीरः-** मम मनसि एका धारणा समागता, वयं नेपालं प्रत्यागच्छाम किम् ?

**अचला-** मह्यं नेपालो रोचते। अतोऽहमपि नेपाले एव समागत्य स्थातुं वाञ्छामि पितः !

**सुधीरः-** तर्हि शोभनम्। तत्र अमेरिकास्थानां सम्पत्तीनां विक्रयं कृत्वा अत्र हिमालयस्य क्रोडे समागत्य तिष्ठामः। विशालां भूमिं क्रीत्वा, वनौषधिग्रामं निर्माय प्रकृतिसंरक्षिका योजनाश्च सञ्चालयिष्यामः। नेपालस्य गौरवं वर्धयिष्यामः।

**चञ्चला-** (नटति) स्वर्गं विहाय नरके को वसेत्। मम मनस्तु तत्रैव प्रफुल्लायते। तत्र वैज्ञानिकी व्यवस्था अस्ति। अमेरिका खलु विश्वव्यवस्थां सम्पादयति, प्रभावयति च। तां स्वर्णभूमिं परित्यज्य को मूर्खो मनुष्येऽत्र समागच्छेत् ? या भूमिः विश्वस्य केन्द्रम् अस्ति, तां वसुमतीं परित्यज्य कोऽत्र प्रत्यागमिष्यति ?

**सुधीरः-** (सोद्वेगम्) वयं म्लेच्छदेशं विहाय ऋषिभूमिं देवभूमिं प्रत्यागच्छामः। वयम् अमृतस्य पुत्रा अत्र नेपाले स्थित्वा सत्कर्माणि कुर्मः। यज्ञेन, सत्कर्मणा, प्रकृतिशास्त्रिणां वचनपालनेन च वायुः स्वच्छो भवति।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वच्छवायुना प्राणिनः, तरवः, समुद्राश्च स्वच्छतां यान्ति। यतः प्रकृत्याः सन्तुलनं कर्तुं शक्यते। प्रकृत्याः सन्तुलनेन हिमालये हिमानि वर्धन्ते, तरवः फलानि ददति, यथासमयं यथामात्रं वर्षा भवति, अन्नानि जायन्ते। नदी यथोचितरूपेण प्रवहति, वातावरणस्य संरक्षणं पृथिव्याः संरक्षणञ्च भवति।

**प्रवीरः-** (सोद्वेगम्) पितुर्विचारः सम्यग् एव। परन्तु नेपालस्थाः सर्वे जना तत्र अमेरिकादेशं गन्तुं वाञ्छन्ति, प्राणपणेन यत्नं कुर्वन्तः सन्ति। तत्र अस्माकं व्यवस्था सर्वसम्पन्ना अस्ति। तत्र अस्माकं विशाला वसुन्धरा अस्ति, विशालं गृहम् अस्ति, उद्योगव्यापारौ स्तः। तत्र अस्माकं व्यापारसञ्जालम् अस्ति। तान् सर्वान् परित्यज्य नेपालं प्रत्यागन्तुं नैव शक्यते पितः!

**अचला-** (सोद्वेगम्) अग्रज! पितुः विचारः सम्यग् अस्ति। अहमपि नेपालं प्रत्यागत्य प्रकृतिकोशम् अलङ्कर्तुं वाञ्छामि। नेपालस्तपःस्थली अस्ति, सिद्धस्थली अस्ति। तत्र पित्रा या व्यवस्था सम्पादिता, उद्योगः स्थापितः, व्यापारो वर्धितः, आपणसञ्जालस्य स्थापना विहिता ताः सर्वाः अपि व्यवस्थाः अत्र स्वदेशे, स्वजन्मभूमौ सम्पादयितुं कथं न शक्यते? प्रकृतिकोषात् अमूल्यानि रत्नानि अन्विष्य अत्र उद्योगं स्थापयामः, अत्रैव व्यापारञ्च कुर्मः।

**चञ्चला-** (सोद्वेगम्) अमेरिकादेशे अस्माकं स्थापिता सुदृढा अर्थव्यवस्था अस्ति। बहुवर्षप्रयत्नेन उद्योगव्यापारौ स्थापितौ स्तः। निरीक्षणमात्रेण, अनुगमनमात्रेण च सर्वा व्यवस्था प्रचलति। अत्र समागत्य सर्वाश्च नूतनव्यवस्था विधातव्या, अतो बहुदुःखं जायते। समयस्य व्यर्थो व्ययो भवति। अतो नाहं प्रत्यागच्छामि।

**सुधीरः-** (सशान्ति) यथा इच्छसि तथा कुरु, यथा इच्छामि तथा करोमि। नेपाले किं व्यापारिणः न सन्ति? उद्योगपतयो न सन्ति? वयं उद्योगं स्थापयामः, व्यापारञ्च कुर्मः। अस्माकं उद्योगाः प्रकृतिसंरक्षकाः वातावरणसंरक्षकाश्च भविष्यन्ति। हिमालयसंरक्षणाय, नदीसंरक्षणाय चास्माकं प्रयत्नः प्रचलिष्यति। कोशीगण्डकीकर्णालीनद्यो हिमालयात् प्रभवन्ति। ते हिमालयाः नद्यश्च संरक्षणीयाः। इमाः नद्यो नेपालस्य अमृतवाहिन्यः सन्ति, घनानि वनानि, गिरयश्च बहुमूल्यरत्नानि सन्ति।

**प्रवीरः-** पिता यत् कथयति तत् सत्यम्, परन्तु इमाः सर्वा अपि व्यवस्थाः सम्पादयितुं सर्वकारः अपि विफलतां गतो वर्तते। सर्वकारः एव



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भ्रष्टाचारस्य केन्द्रम् अस्ति, अत्र नेपाले नीतिगतभ्रष्टाचारोऽपि घनीभूतोऽस्ति । सर्वकारस्य वातावरणस्य संरक्षणनीतिः अपि सुस्पष्टा न विद्यते । उद्योगव्यापारसञ्चालनस्यापि नीतिरस्पष्टा एव । अत्र उद्योगसञ्चालनेऽपि उत्कोचं याचन्ते मन्त्रालयस्य कर्मचारिणः, दलानि दलनेतारश्च । अत्र स्वकीया नीतिर्न प्रचलति, वैदेशिकाः यत् कथयन्ति तत् कुर्वन्ति दलानि दलनेतारश्च ।

**सुधीरः-** पुत्रो यत् कथयति तदपि सत्यम् । परन्तु नवीनप्रयोगः अस्माभिः करणीय एव । अत्र वनौषधिग्रामोऽनेकेषु जनपदेषु स्थापनीयः । अत्र सदैव बीजानि समुद्भवन्ति । अत्र समशीतोष्णवातावरणं मिलति । वातावरणस्य संरक्षणेन प्राणवायोः (अक्सिजनतत्त्वस्य) संरक्षणं जायते। हिमालयस्य अक्सिजनतत्त्वं, शैत्यं जलं, हिमालयस्य वनौषधयश्च च आविश्वं विक्रेतुं शक्यन्ते ।

**अचला-** (नटति) वातावरणस्य संरक्षणेन विश्वस्य संरक्षणं भवित । संरक्षिते वातावरणे मेघो वर्षति, हिमानि वर्धन्ते, हैम्यो नद्यश्च प्रवहन्ति । वातावरणस्य विनाशो भवति चेत् मेघो न वर्षति, हिमानि च न वर्द्धन्ते, ततो नद्यो न प्रवहन्ति । नदीषु जलस्याभावे क्षेत्रेषु अन्नानि न फलन्ति । वायुः शुष्कतां याति । शुष्को वायुर्हिमालयस्य हिमं शोषयति, विलोपयति च । तेन विश्वस्य वातावरणं दूष्यते । प्रदूषितो वायुः प्राणिनां कृते प्रतिकूलं भवति । मृत्तिकायां, जले, वायौ च प्रदूषिते सति प्रकृतिव्यवस्थायां किं भवति न कोऽपि वक्तुं शक्नोति ।

**प्रवीरः-** (सोद्वेगम्) पिता सम्यग् भणति, भगिनी च समिचीनं वदति, परन्तु विश्वव्यवस्थायाः कृते अस्माभिर्नैव चिन्तनीयम्, तत् तु सर्वकारस्य विषयः । अस्माकं जीवनं कथं सरलं सुखकरञ्च भवति तद् अस्माभिर्विचारणीयम् । स्वस्यैव कृते व्यापारादिकार्याणि सम्पादयितव्यानि ।

**सुधीरः-** (नटति) परन्तु राष्ट्रम् अमूर्तं भवति, व्यवस्था च अमूर्ता भवति । अस्माकम् उपस्थित्या कार्येण च तौ मूर्तिमती भवतः । वातावरणस्य संरक्षणे पूर्वीयेषु पाश्चात्त्येषु च शास्त्रीयग्रन्थेषु बहव उपायाः दर्शिताः सन्ति । यज्ञस्य आयोजनं विधाय होतव्यं भवति, विशेषतो नद्यास्तटे वृक्षाणां संरक्षणं रोपणं च विधातव्यम् । वनस्पतीनां वनेचराणां च रक्षणं विधेयम् । उद्योगजन्यनां धूमानां धूसराणां च व्यवस्था विधेया । यानानां यन्त्राणां च यथासमयं प्रत्युद्धारः कर्तव्यः । एभिरन्यैश्च उपायैः



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वातावरणस्य सन्तुलनं स्थापयितुं पार्यते ।

**अचला-** (सोद्वेगम्) पितः ! भवता समीचीनो विषय उक्तः । वातावरणस्य असन्तुलनेन यानि कानि अपि दुःखानि, दुरवस्थाश्च आगन्तुं शक्नुवन्ति । विशेषतः पवने, जले, तापक्रमे, वर्षायां च असन्तुलनस्य सङ्केताः दृश्यन्ते । अतिवर्षा, अनावृष्टिः, नदीषु अतिप्रवाहश्च भवति । अन्नोत्पादने बाधा जायते । फलानि न फलन्ति । व्याधय आधयश्च वर्द्धन्ते । प्रकृतिव्यवस्था एव विपर्यस्ता भवति ।

**प्रवीरः-** आम् ! अवश्यम् । यदि तादृशी स्थितिः भवति, वयं मरिष्यामो वा रुग्णाः भविष्यामः । विश्वमिदं स्मशानरूपं भविष्यति । अतोऽस्माभिः इदानीम् एव वातावरणस्य संरक्षणे ध्यानं देयम् इति समीचीनम् । परन्तु अमेरिकां परित्यज्य अत्र प्रत्यावर्तनं न समीचीनम् । अमेरिकास्थं सौविध्यं परित्यज्य अत्र आगन्तुं नैव शक्यते । न कोऽपि शक्नोति ।

**चञ्चला-** (सक्रोधम्) अहमपि प्रवीरस्य विचारस्य समर्थनं करोमि । अत्याधुनिकं देशं परित्यज्य नेपालस्य गिरिगह्वरेषु स्थातुं नैव शक्यते । अस्माकं वस्तुवैभवं तत्रैवास्ति । व्यापारव्यवस्था तत्रैवास्ति । मित्राणि तत्रैव सन्ति । जीवनपद्धतिश्चापि तत्रैव अभ्यस्ता अस्ति ।

**सुधीरः-** (सान्त्वयन्) जाये ! यत् सौविध्यं तत्र अस्ति तद् अत्रापि कर्तुं पार्यते । वयमत्र समागत्य न शेमहे । अत्रापि अस्माकं वस्तुवैभवं भविष्यति, व्यापारव्यवस्था प्रचलिष्यति । आवयोर्जन्मभूमिरियमेव । तव पितरौ मम पितरौ च अत्रैव सन्ति । तत्र मित्राणि सन्ति, अत्र गोत्राणि अपि सन्ति, मित्राणि अपि सन्ति, जायन्ते च । अस्माकं पूर्वेषां गुरुचराणाम् उत्पत्तिरत्रैव जाता । रक्तसम्बन्धः अत्रैव अस्ति, श्वाससम्बन्धः अत्रैव अस्ति । मत्कृते अयं दिव्यदेशः, अयं देवदेशः, अयम् आर्षदेशः । अस्माकं आध्यात्मिकजीवनं भौतिकजीवनञ्च अत्रैव प्रचलिष्यति ।

**चञ्चला-** (सोद्वेगम्) न मह्यं रोचते नेपालः । अस्माकं धनधान्यं वस्तुवैभवं तत्रैवास्ति । महता कष्टेन बहुप्रयत्नेन, निद्रापरित्यागेन, एकाहारेण, जलाहारेण च साम्प्रतिकं वस्तुवैभवं समर्जितम् । बन्धुबान्धवाः किं भणन्ति ? मित्राणि किं कथयन्ति ? प्रत्यागच्छामश्चेत् लोका हसन्ति । अहम् अमूर्तसुखं नेच्छामि । प्रतीयमाने भौतिकसुखे निमज्जामि । अतः तत्रैव गच्छामि ।

**अचला-** (नटति) सुखं सौविध्यं च परस्परं भिन्नमस्ति । यत्र सौविध्यं भवति तत्र सुखं न जायते, सौविध्यस्य अभावेऽपि सुखानुभूतिः कर्तुं शक्यते ।


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सुखं दुःखञ्च अमूर्तमेव । स्वीकारः एव सुखदुःखम् । भवती यत् स्वीकरोति तदेव सुखदुःखम् । अत्र सौविध्यस्य अभावेऽपि नेपालिनः प्रफुल्लाः सन्ति, परस्परं मोदमानाः सन्ति । अत्र पारिवारिकजीवनम् अस्ति, सामाजिकजीवनम् अस्ति । अत्र अनेकानि तिथिपर्वाणि सन्ति। तत्र अमेरिकादेशे मनुष्य एकाकी एवास्ति, तत्र वारं वारं मृत्वा नराः जीवन्ति । अतः पिता यत् कथयति तद् अहं करोमि ।

**सुधीरः-** अचला साधुरेव कथयति । तत्र पितापुत्रयोः सम्बन्धो नास्ति, दम्पत्योः आत्मिकसम्बन्धो नास्ति, वासनैव सम्बन्धस्य कारणम् । पिता पुत्रं, पुत्रः पितरं, पत्नी पतिं, पतिः पत्नीं च तत्राजीवनं न संरक्षन्ति, न पश्यन्ति। ते परस्परं संवेगे सत्वरं सम्बन्धविच्छेदनं कुर्वन्ति । पिता पितृधर्मं, पत्नी सतीधर्मं, आत्मजः पुत्रधर्मं नैव निर्वहति ।

**प्रवीरः-** (सोद्वेगं नटति) पिता यत् कथयति तदपि सत्यम्, परन्तु तत्र या आर्थिकव्यवस्था, उद्योगव्यापारयोर्व्यवस्था अस्माभिर्विहिता तादृशीं व्यवस्थाम् अत्र सम्पादयितुं नैव पार्यते । अतोऽहं नेपालं प्रत्यागन्तुं नैव शक्नोमि पितः ! मात्रा सह तत्रैव गच्छामि । पर्यटनाय नेपालः सुन्दरोऽस्ति, परन्तु अत्र स्थितिस्थापनाय काठिन्यमस्ति ।

**चञ्चला-** (सक्रोधम्) भवान् नेपालस्य अरण्ये तिष्ठतु, तपःस्थल्यां भ्रमतु, देवस्थल्यां क्रीडतु, सिद्धस्थल्यां नृत्यतु, वेदभूमौ हसतु, गौतमभूमौ गायतु, पशुपतिनाथं नमतु, यज्ञभूमौ व्रजतु, शैवभूमौ चलतु अत्रैव विरमतु । परन्तु अहं तु तत्रैव दिव्यदेशं गच्छामि, अद्यैव गच्छामि, अधुनैव गच्छामि । (गन्तुम् उत्तिष्ठति)

**प्रवीरः-** (सोदेवेगम्) अहमपि मात्रा सह तत्रैव गच्छामि । विश्वस्य मानवाः तत्र गमनाय, भ्रमणाय, तत्रैव निवासाय प्राणपणेन यत्नं कुर्वन्ति, तद् दिव्यदेशं परित्यज्य अत्र स्थातुं नैवं शक्यते पितः ! (गन्तुं प्रसरति) ।

**सुधीरः-** (सोद्वेगम्) मम परिवारो नेपाले एव तिष्ठति । एष आदेशः । पत्नी पतिं विहाय गच्छतु, पुत्रः पितरं परित्यज्य गच्छतु, इयम् अमेरिकादेशस्य संस्कृतिः । मम पुत्री अत्रैव तिष्ठति । तत्र गत्वा मम धनकोषे धनागारे वा कोटिपरिमितं द्रव्यमस्ति, तत् मह्यं सम्प्रेषय । अहं देवभूमौ स्थित्वा, सिद्धस्थल्यां कर्म कृत्वा धर्मार्थकाममोक्षस्वरूपं पुरषार्थचतुष्टयं साधयिष्ये । नेपालं भूषयिष्ये, एषा मम द्रढीयसी प्रतिज्ञा ।

**प्रकाशः** तिमिरायते, प्रकाश आरोहति, अवरोहति । प्रकाशे कदाचित् पितापुत्र्यौ, कदाचिच्च मातापुत्रौ दृश्येते । 'आगच्छ प्रिये जाये, आगच्छ पुत्र !'


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

'न प्रत्यागच्छामि स्वामिन्, न प्रत्यागच्छामि पितः' 'आगच्छ जाये ! आगच्छ अङ्गज !', 'न प्रत्यागच्छामि भर्तः ! न प्रत्यागच्छामि जनक !' 'मातः तिष्ठ देवभूमौ' इत्यादिका ध्वनयः श्रूयन्ते । वियोगसूचकं वाद्यं गुञ्जति । नेपालजननीं वन्दे ...गुञ्जति पटासेपः ।


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

# रोगात् त्रासो भयावहः

**डा.भवानीशङ्करभट्टराई**
पिण्डेश्वरविद्यापीठे, धरानः नेपालः

**पात्र-परिचयः**

मुख्यपात्राणि

रमेशः- ज्वरग्रस्तो युवा, स्नातकप्रथमवर्षे अधीयानश्छात्रः, कल्पनायाः पुत्रः ।

सुरुचिः- रमेशसखी, स्नातकप्रथमवर्षे अधीयाना छात्रा ।

दिनेशः- रमेशसखा, स्नातकप्रथमवर्षे अधीयानश्छात्रः ।

सहायकपात्रे

कल्पना- रमेशमाता

मुख्यचिकित्सकः- विपीकोइरालास्वास्थ्यविज्ञानप्रतिष्ठानस्य चिकित्सकः ।

गौणपात्रे

अपरचिकित्सकः, चिकित्सकः- विपीकोइरालास्वास्थ्यविज्ञानप्रतिष्ठानस्य चिकित्सकौ ।

## प्रथमं दृश्यम्

स्थानं- रमेशगृहं, धरानम्, विजयपुरम् ।

समयः- प्रातः सार्धसप्तवादनम् ।

(सुरुचिदिनेशौ स्नातकप्रथमसत्रे पठतः । सुरुचिः आयुर्वेदकेन्द्रीयविद्यापीठे कीर्तिपुरे आयुर्वेदं पठति चेद् दिनेशस्तु टिचिङविद्यापीठे चिकित्साशास्त्रम् अधीते । द्वयोरेव गृहं धरानस्थे विजयपुरे वर्तते । अधुना कोरोनामहामारीसन्त्रासाद् विश्वविद्यालयेन अवकाशो दत्तः, अतो द्वावपि निजगृहं समागतौ । गृहागमनकाले विजयपुरे चतुष्पथे एव 'सुहृद् रमेशो ज्वरेण कासेन च ग्रस्तः अस्ति' इति ताभ्यां श्रुतम् । 'बालसखायम् अवलोकयितुं श्वः प्रातरेव गन्तास्वः' इति ताभ्यां मार्ग एव परामृष्टम् ।

रमेशगृहे रमेशः, कल्पना (रमेशमाता), अशीतिवर्षपारङ्गतौ प्रपितरौ च वसन्ति । रमेशः केन्द्रीयप्रविधिविद्यापीठे हात्तीसारे स्नातकप्रथमवर्षे अधीयानोऽपि अवकाशे गृहकार्ये साहाय्यं कुरुते । रमेशमाता श्वशुरौ शुश्रूषन्ती गृहरथं सञ्चालयति । तस्याः श्रीमान् पुण्यप्रसादः साउदीअरबदेशे वसन् पुत्रस्य पठनाय गृहसञ्चालाय च धनम् अर्जयति ।)



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**सुरुचिः-** (पिहिते द्वारे अङ्गुलिना ढकढकशब्दं कृत्वा, मधुरेण स्वरेण) अन्तः कोऽस्ति भोः ? द्वारम् उद्घाटयताम् ।

**कल्पना-** (आभ्यन्तरतः परुषस्वरेण) यातायातनिषिद्धे काले गृहम् आगच्छन्ती का भवती ? किमर्थम् आगतवती ?

**सुरुचिदिनेशौ-** (नम्रेण स्वरेण) मातः ! आवां रमेशसखायौ सुरुचिदिनेशौ, रमेशेन मेलितुं समागतौ ।

**कल्पना-** (प्रसन्नचित्तेन द्वारम् उद्घाटयन्ती) अयि पुत्र ! अयि पुत्रि ! अन्तः आगम्यताम्, (तत्क्षणमेव सङ्कोचेन) तत्रैव स्थीयताम्, तत्रैव... । (उभावपि अन्तः प्रविश्य दूरस्थे आसन्दिमायां वसतः), (दुःखितेन भावेन)- कथं वर्णयानि ? कोरोनाव्याधित्रासेन प्रतिवेशिनः, स्वजना अपि दूरं गच्छन्ति, समस्यायाम् अपि कः अपि नागच्छति, अन्यत्र गन्तुम् अपि न शक्यते, हन्त भो, कीदृशानि दिनानि समागतानि ? यदि एवमेव स्यात्, तर्हि मरणे शवयात्री अपि न मिलिष्यति ।

**सुरुचिः-** (सामान्येन भावेन) मातः ! जतुका-मूषक-विडाल-कुकुरादिभ्यः पशुभ्यः सङ्क्रमितो भूत्वा मानवे समागतोऽयं जीवाणुः । चीनदेशस्थे वुहानप्रान्ते स्थितेभ्यः पशुमांसविक्रेतृभ्यः ष्ठीवन-लाला-छिक्कादिभिः ग्राहकेषु सरन् ततश्च सर्वत्र प्रसरन् आगतोऽस्ति अयम् । अतः दूरेण व्यवहारः, मुखे छादनीधारणं, छिक्कायां वस्त्रेण मुखपिधानमेव अस्मात् सुरक्षणे उपायाः । अद्यावधि प्रतिजैविकम् औषधं न लभ्यते, तदर्थं वैज्ञानिकाः प्रयतमानाः सन्तीति श्रूयते । मातः ! सुरक्षा एव एतस्माद् रक्षणे उपायः ।

**कल्पना-** (दैन्येन, दूरत एव) आम्, मयापि एतदेव श्रुतम् । अस्तु यत् किमपि, (प्रसन्नेन चित्तेन) अयि वत्सलौ, अद्यः प्रातरेव कथं स्मृतवन्तौ ? काष्ठमण्डपतः कदा समागतौ ? तत्रत्या का वार्ता, सर्वं श्रावयतम् ।

**दिनेशः-** (स्मितेन भावभङ्गिना) मातः, भवतीं, भवत्पुत्रं रमेशं, प्रपितरं, प्रमातारञ्च कथं विस्मरामः ? तत्र काष्ठमण्डपेऽपि भवतीभ्यः प्रतिदिनं स्मरावः स्म । (भावपरिवर्तनेन, क्षणानन्तरं) कोरोनात्रासेन सर्वकारेण परह्य एव अवकाशो घोषितः, अतो ह्यः सायमेव धरानं समागतौ, समागच्छता विजयपुरचतुष्के एव रमेशो व्याधिना गलन् शयानोऽस्तीति श्रुतम्, अतो मेलितुं अद्य प्रातरेव समागतौ ।


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**सुरुचिः-** मातः, रमेशः कुत्रास्ति ? कीदृशी दशा तस्य ?

**कल्पना-** वत्सलौ, अपरप्रकोष्ठे आगच्छतम् । (कल्पना उभावपि अपरप्रकोष्ठं नयति, तत्र रमेशः पर्यङ्के शयानो दृश्यते, समीपे जलचषकं, औषधिपूरिकाः गोलिकाश्च सन्ति, किञ्चिद्दूरतो वर्तमाने आसन्दे उभौ वसतः, कल्पना, ताभ्यां दूरे एव तिष्ठति ।)

**रमेशः-** (शयान एव) नमो नमः सुरुचे ! नमो नमो दिनेश ! कदा धरानं सम्प्राप्तौ ?

**सुरुचिः-** ह्यः सायङ्काले एव ।

**कल्पना-** वत्सलाः, यूयं बहुदिनानन्तरं मिलितवन्तः, परस्परं वार्तालापं कुरुत, अहं चायम् आनेष्यामि । (कल्पना पाकालयं गच्छति)

**सुरुचिः-** अयि सखे, कथं ज्वरेण गलितः ? कास-छिक्काद्या अपि सन्ति ? कियद्भिः दिनैः रुग्णः असि ?

**रमेशः-** अस्मत्कक्षा चलन्ती आसीत्, कतिचन मित्राणि छिक्कां कुर्वन्तः अपि पठन्त आसन्, षड्भ्यो दिनेभ्यः पूर्वम् आयुषीनाम्नी सखी कासेन ज्वरेण च गलिता, तदनु चाहम् । सामान्यः अयं ज्वर इति मत्वा सिटामोलं गृह्णन् अन्तर्बहिश्च कुर्वन् आसम्, तृतीये दिने तु पर्यङ्कशायी जातः ।

**दिनेशः-** औषधं सेवितम् ?

**रमेशः-** (विलम्बेन गलितेन च स्वरेण) अहं पद्भ्यां चलितुं न पारयामि, माता प्राथमिकचिकित्सकम् आनेतुं स्वास्थ्यकेन्द्रं गता आसीत्, परं चिकित्सकः कोरोनात्रासेन आगन्तुं नैच्छत्, रोगलक्षणं विदित्वा तेन सिटामोलादीन्येव दत्तानि, तान्येव सेवमानोऽस्मि (रमेशः ज्वरौषधं, कासौषधं, प्रतिजैविकौषधञ्च(एन्टिवायोटिक) दर्शयति) ।

**दिनेशः-** (दुःखेन भावेन) चिकित्सका अपि किं कुर्युः ? ते सुरक्षोपकरणं विनैव कथं परीक्षेयुः ? सर्वकारः 'एकः अपि रोगी चिकित्सालयात् न प्रत्यावर्तनीयः' इति आदिश्यापि सुरक्षापरिधानीं न वितरति, एतत्तु निरस्त्राणां भटानां युद्धे प्रेषणमिव । हा हन्त ! सर्वत्र दुःखम्, पीडा... ।

**सुरुचिः-** (प्रश्नमयेन भावेन) तर्हि किं विना परीक्षणं औषधं गृह्णीम ? किञ्चित् पठिताः वयं तु परीक्षणं विनैव सेवामहे चेद् अन्ये किं कुर्युः ? (प्रतिजैविकमौषधं दर्शयन्ती) एतद् औषधं चिकित्सकस्य परामर्शं विना कदापि न ग्राह्यम्, सर्वेषु रोगिषु एकविधमेव प्रतिजैविकं उपयुक्तं


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न भवति, यथातथं ग्रहणे पार्श्वरोगग्रासो जायते इति कदा चेतना जागरिष्यति ? हा हन्त .... !!!

**दिनेशः-** (प्रश्नमयेन भावेन) ज्वरो मापितः ? गृहीतेन औषधिना ज्वरो न्यूनोऽभूत् ?

**रमेशः-** (सामान्येन भावेन, विलम्बेन स्वरेण) ह्यः सायं मापितः, शताधिकैकमित आसीत्, साम्प्रतम् अपि विलोकयामः, कीयान् अस्ति ? (दिनेशः ज्वरमापन्या रमेशस्य ज्वरं मापयति)

**कल्पना-** (हस्ते चायस्य चषकद्वयं गृह्णन्ती आगच्छति) चायं गृहाण पुत्रि ! गृहाण, पुत्र ! चायं गृहाण । (सुरुचिदिनेशौ चायचषकं गृह्णीतः)

**कल्पना-** ज्वरः पुनः मापितः ?

**रमेशः-** (विलम्बेन) आम् अम्ब, मापयन्नस्मि । (रमेशः ज्वरमापनीं शरीरादवतारयति, सुरुचिस्तद् अवलोकयति)

**रमेशः-** (औत्सुक्येन) कियानङ्को वर्तते ?

**सुरुचिः-** (औत्सुक्येन) द्व्यधिकशतमितः ।

**दिनेशः-** (दुःखेन) हा हन्त ! तर्हि वर्धितः, सत्वरमेव चिकित्सालयो नेयः, विलम्बो न कार्यः ।

**कल्पना-** (सम्भ्रमेण) किं कुर्याम् ? एकाकिनी अस्मि, श्वश्र्वोः गवादीनाञ्च अवलोकनं कः कुर्यात् ? चिकित्सालयोऽपि गन्तव्योऽस्ति ।

**दिनेशः-** (सामान्येन) तर्हि आवां नेष्यावः, भवती गृहम् अवलोकयतु ।

**सुरुचिः-** (सामान्येन) अहमपि गमिष्यामि, मास्तु चिन्ता ।

**कल्पना-** तर्हि अहम् अटोयानार्थं दूरभाषं करोमि ।

(कल्पना चलद् दूरभाषं हस्तेन गृह्णन्ती बहिर्गच्छति, सुरुचिरपि अनुगच्छति, तयोः केन्द्रितः प्रकाशः क्रमशो मधुरो जायते, यवनिका आच्छाद्यते) ।

## द्वितीयं दृश्यम्

स्थानं- विपीकोइरालास्वास्थ्यविज्ञानप्रतिष्ठानस्य परीक्षणालयः

समयः- प्रातः सपाददशवादनम्

(प्रतिष्ठानस्य रोगिपरीक्षणालये द्वित्राः श्वेतोरुकधारिणः चिकित्सकाः आङ्ग्लभाषायां परस्परं भाषमाणाः परीक्षणमपि कुर्वन्तो विलोक्यन्ते । सर्वेषां गले रःपरीक्षणी वर्तते । तेषाम् अग्रे उत्पीठम्, तत्र परीक्षणोपकरणानि, एकस्मिन्


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कोणे एक्सरे-अवलोकनप्रकाशपट्टम्, तत्समीपे परीक्षणशय्या च वर्तन्ते । तस्मात् स्थानात् अपरे कोणे सुरुचिरमेशौ पञ्जीकरणार्थं गतं दिनेशं प्रतीक्षमाणौ स्तः, रुजा गलितः रमेशः, सम्यक्तया उपवेष्टुमसमर्थो दृश्यते, सुरुचिस्तं हस्तसहयोगेन उपवेशयन्ती अस्ति ।)

**सुरुचिः-** (जिज्ञासया) रोगिपञ्जीकरणार्थं गतः दिनेश इदानीं यावत् न प्रत्यावर्तितः, कथं विलम्बोऽभूत् ? (तन्मध्ये एव दिनेशः अपि आगच्छति, तदनन्तरं द्वाराधिकारिण्या निर्देशानुसारं ते परीक्षणस्थलं गच्छन्ति)

**चिकित्सकः-** (रोगिणं दूरत एव पृच्छन्) का समस्या ?

**रमेशः-** पञ्चदिनेभ्यो ज्वरो वर्तते ।

**चिकित्सकः-** किं कासः अपि वर्तते ?

**रमेशः-** आम्, यदाकदा शुष्ककासोऽपि आयाति ।

**चिकित्सकः-** ज्वरं मापयतु ।

(चिकित्सकः रमेशाय ज्वरमापनीं ददाति, दिनेशः मापने सहयोगं करोति, चिकित्सको रमेशकुक्षौ ज्वरमापनीं विन्यस्य उरःपरीक्षणिना उरः परीक्षते, अन्यस्मै चिकित्सकाय, गतिः शीघ्रा वर्तत इति सूचयति, द्विनिमेषानन्तरं चिकित्सकः ज्वरमापनीं निष्काशय इति अनुरुन्धे, रमेशस्तथा करोति, चिकित्सकः पञ्जीकरणपत्रे १०३ अङ्कं लिखति)

**चिकित्सकः-** ज्वरोऽधिकः अस्ति । अपरश्चिकित्सकः- त्वं किं करोषि ?

**रमेशः-** (विलम्बेन) अहं छात्रोऽस्मि, अत्रैव हात्तीसारे स्नातकप्रथमवर्षे सूक्ष्मजीवविज्ञानं पठामि ।

**अपरचिकित्सकः-** भवद्गृहं कुत्र वर्तते ?

**रमेशः-** अत्रैव धराने, विजयपुरे ।

**मुख्यचिकित्सकः-** धरानाद् बहिरपि गतो भवान् ?

**रमेशः-** न, षण्मासेभ्योऽत्रैव अस्मि ।

**मुख्यचिकित्सकः-** बहिरागतैर्जनैः सह सम्पर्कः ?

**रमेशः-** नास्ति, कक्षायां वसामि, गृहादागमनं गमनञ्च भवति इत्येव ।

**मुख्यचिकित्सकः-** तत्र तु बहिरागता अपि स्युः ?

**रमेशः-** (विलम्बेन) सन्ति, वयं पञ्चाशद् विद्यार्थिनः स्मः, तत्र धरानस्थाः,


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वाह्या अपि सन्ति ।

**मुख्यचिकित्सकः-** एतादृशमेव लक्षणं कोरोनायाम् अपि दृश्यते, अहं निश्चित्य तु वक्तुं न शक्नोमि, परं भवान् कोरोनापरीक्षणं करोतु, अस्यैव प्रतिष्ठानस्य अपरे भवने तस्य परीक्षणस्थलं निर्धारितमस्ति, लालाशिङ्घाणमाध्यमेन सा परीक्ष्यते, तदपि विदधातु ।

**अपरचिकित्सकः-** वयं प्रतिजैविकां गोलिकां, ज्वरौषधं, कासौषधञ्च लिखितवन्तः, तानि औषधविक्रेतुः क्रीणातु । सन्निपात (टाइफाइड)मापकं रक्तपरीक्षणमपि परीक्षणालयतः करोतु, अधुना कोरोनाया माहामारी चलन्ती अस्ति, कोरोनापरीक्षणमपि अवश्यमेव करोतु ।

**सुरुचिः-** अस्य बहिरागतैर्जनैः सह सम्पर्कोऽपि नास्ति, शिरःपीडा, नासिकातः शिङ्घाणप्रवाहः, गलावरोधः कोऽपि न दृश्यते, श्वासप्रश्वाससमस्या अपि न विलोक्यते, ज्वरकासौ तु अन्यकारणेनापि भवितुं शक्नुतः । भवन्तः शारीरिकपरीक्षणं विनैव कथं कोरोना इत्युक्त्वा रोगिणं हताशं कुर्वन्ति ? अस्य मिथ्याप्रचारस्य क्षतिं कः पूरयेत् ?

**दिनेशः-** श्रीमन्, वयमपि चिकित्साशास्त्रमेव पठामः, कोरोनाव्याधिज्वरयोः पार्थक्यं वयमपि विद्मः, व्याधिज्वरः गलं रुणद्धि चेत् कोरोना तु श्वासप्रश्वासम्, ज्वरो निरन्तरं ग्रसते चेत् कोरोना अनियमितम्। कोरोना मांसपेशिनं ग्रसते परं व्याधिसङ्क्रमणे तल्लक्षणं न प्राप्यते, भवान् इमं रोगिणं कथं कोरोनारोगीति शङ्कते ?

**मुख्यचिकित्सकः-** भवान् कोरोनायाः सामान्यं लक्षणमेव उक्तवान् । केचन ज्वरकासादिहीना अपि सङ्क्रमिताः दृश्यन्ते, केचन समानलक्षणा अपि कोरोनाहीनाः सन्तीति विना परीक्षणं निश्चयेन वक्तुं न शक्यम्। अपरीक्षिते सति पारिवारिकाः सदस्याः निकटवर्तिनश्च भीतिम् अनुभवन्तीति परीक्षणम् आवश्यकम् ।

**दिनेशः-** मन्ये, भवत्सु अपि मनोवैज्ञानिकः त्रासः विद्यते, कोरोनारोगेण अद्यावधि एकोऽपि न मृतस्तथापि प्रतिदिनं सहस्राधिका मृता इव व्यवहरन्ति, किमयं त्रासो न ? चिकित्सालयेन भवत्सु सुरक्षापरिधानानि प्रदत्तानि तथापि भवन्तः, रोगिषु अस्पृश्यमिव


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वर्तयन्ति, किमयं त्रासो न ?

**अपरचिकित्सकः-** रोगपरीक्षणे का हानिः ? निश्चयः स्याद् इति धिया उक्तम् अस्माभिः ।

**सुरुचिः-** चिकित्साक्षेत्रे संलग्नानाम् अस्माकमपि ईदृशी दशा वर्तते चेत् सर्वसाधारणानां कीदृशी स्यात् ? अतः कैश्चित् सत्यमुक्तम्- 'रोगात् त्रासो भयावहः' इति, तत् सत्यमेव प्रतीयते ।

**सुरुचिदिनेशौ-** सत्यमेव, रोगात् त्रासो भयावहः ।

(सुरुचिदिनेशौ रमेशं परीक्षणप्रकोष्ठतः बहिर्नयतः, तेषु केन्द्रितः प्रकाशः क्रमशः, मधुरो भवति, यवनिका आच्छाद्यते)

॥इति॥


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

# जीवेत् सदा संस्कृतम्

**डा. महानन्दतिमिल्सिना**
उपप्राध्यापकः, पिण्डेश्वरविद्यापीठम्, धरान

स्थानम्- पाणिनिसंस्कृतमाध्यमिकविद्यालयपरिसरः, दुराडाँडा, लमजुङ
समयः- २०५८ तमवैक्रमाब्दस्य माघमासस्य तृतीयदिवसबुधवासरस्य मध्याह्नम्
पात्राणि-
मुक्तिनाथः- प्रधानाध्यापकः ज्वाला- प्रमुखविद्रोही
दिवाकरः- शिक्षकः भीषणः- विद्रोही
सोमेन्द्रः- शिक्षकः सविता- शिक्षिका
रमेशः, श्यामः- विद्यार्थिनौ ।अन्ये शिक्षकाः, विद्यार्थिनः, विद्रोहिणश्च ।

(आकाशमार्गे दिनकरो मलिनः संलक्ष्यते । तेजोरहितस्य सूर्यस्य कारणात् शैत्यस्य प्रभावोऽस्ति । प्रकृतिरपि मलिना अवलोक्यते । प्रधानाध्यापको नववादने एव विद्यालयं गच्छति । विद्यालये निर्धारितोपवेशस्य सूचनानुसारेण अन्ये शिक्षकाः शिक्षिकाश्च प्रधानाध्यापकस्य कार्यालयीये प्रकोष्ठे प्रविशन्ति । प्रकोष्ठस्य एकस्याम् आसन्द्यां प्रधानाध्यापको दृश्यते, तस्याग्रस्थे काष्ठपीठे अस्यैव नामोट्टङ्कितं काष्ठफलकमस्ति । अस्य समीपमन्यास्वासन्दीषु शिक्षकाः शिक्षिकाश्चोपविष्टा सन्ति । कार्यालयप्रकोष्ठस्य भित्तिकासु संस्कृतभाषया विद्याया महत्त्वप्रदायिकाः सूक्तयो भित्तौ लिखिता दृश्यन्ते । संस्कृतभाषायाः समुन्नत्यै प्रधानाध्यापकः चिन्तितो विलोक्यते ।)

**मुक्तिनाथः-** (कपोलफलके दक्षिणहस्तं निधाय तत्र उपस्थितानाम् अध्यापकानां ध्यानम् आकर्षति) भो अध्यापकाः ! सर्वेभ्यो नमः । अस्य विद्यालयस्य अधुनातनी समस्या अस्माभिः सर्वैर्वगता एव । अत्राहं विद्यालयस्य प्राधानाध्यापकत्वेन भवद्भिः सह अस्मिन् विद्यालये संस्कृतशिक्षां प्रति लक्षितस्य प्रहारस्य विषये परामर्शं कुर्वन् अस्मि । वयं सर्वेऽपि संस्कृतसेविनः । अस्मिन् विद्यालये केन प्रकारेण संस्कृतशिक्षणं संरक्षितुं समुन्नतं विधातुं च शक्यते इति विषये चिन्तितोऽस्मि । समये समये विद्रोहिणोऽत्र आगत्य संस्कृतशिक्षाम् अवरोद्धुं निर्दिशन्ति । ते अस्माकं पारिश्रमिकमपि याचमानाः सन्ति । अहं प्रधानाध्यापकत्वेन नियुक्तोऽस्मि । यद्यपि अहं विद्यालयस्य प्रमुखत्वेन विद्यमानोऽस्मि, तथापि विद्यालये संस्कृतभाषायाः समुन्नत्यै भवतां सर्वेषाम् अपि


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

समुल्लेख्या भूमिका वर्तते एव ।

**दिवाकरः-** भवन्तं प्रधानाध्यापकत्वेन प्राप्य वयं हर्षिताः स्मः । मया ह्य एव अस्माकम् अभिभावकानां मुखादपि श्रुतं यत् भवतां प्रति सर्वे अपि अभिभावका आशान्विताः सन्ति ।

**सविता-** भवान् सामाजिकक्षेत्रेऽपि क्रियाशीलः । अधुना देशे द्वन्द्वरताभ्यां पक्षाभ्यां जातस्य मानवाधिकारोल्लङ्घनस्य विषयमपि भवान् साक्षात्कुर्वन् अस्ति । भवान् सर्वदा अहिंसायाः पक्षे, न्यायस्य पक्षे, शिक्षायाः समाजसेवायाश्च पक्षे कार्यं कुर्वन् अस्ति । अतः संस्कृतशिक्षाया व्याप्तये च सफलो भविष्यतीति मन्ये ।

**मुक्तिनाथः** अधुना वयमत्र संस्कृतशिक्षाया विषये चिन्तयन्तः स्मः । अयं समयः संस्कृतस्य कृते प्रतिकूलः । अस्माभिश्श्रुतं विद्रोहिसमूहेन कतिपयेषु संस्कृतविद्यालयेषु संस्कृतशिक्षणम् अवरुद्धम् । संस्कृतस्य विद्यार्थिनः त्रस्ताः । संस्कृतशिक्षा प्राचीना अपि आधुनिकी, परिवर्तनरहिताऽपि वैज्ञानिकी, जनभाषारूपेण अप्रचलिता अपि व्यावहारिकी च वर्तते। अस्माभिरेतादृशं तथ्यं जनसमक्षं प्रकाशयितुम् आवश्यकम् । अहं प्रधानाध्यापकत्वेन भवतां सर्वेषां साहाय्यं वाञ्छामि । भवन्तोऽपि अस्माकं धर्म-संस्कृति-जीवनपद्धतिसम्बद्धां शिक्षां संरक्षितुं प्रवर्धयितुं कृतप्रयत्नाः भवेयुः ।

**सोमेन्द्रः** भवत उत्साहे वयं सहायाः स्मः । वयमपि विद्यालयं देशस्यैव गुणस्तरीयं संस्कृतशिक्षाप्रदायकं विधातुं प्रयत्नशीला भवामः । संस्कृतशिक्षायाः संरक्षणसम्बर्द्धनयोः यात्रायां वयं पूर्णतः सहयोगिनो भविष्यामः ।

**सर्वे** आम्, आम् वयं साहाय्यं कुर्मः ।

**मुक्तिनाथः** सङ्घे शक्तिः कलौ युगे । सामूहिकेन प्रयत्नेनैव विद्यालयः समुन्नतिमार्गे अग्रे सरति । अतः सर्वे एकीभूय क्रियाशीला भवामः। (दशवादनस्य घण्टी ध्वनति) सर्वेषां कृते धन्यवादाः, अधुना कक्षासु गच्छेमः ।

**सोमेन्द्रः** आम्, सर्वे गच्छामः । (सर्वे स्वकीयासु कक्षासु प्रविशन्ति ।)

**मुक्तिनाथः** (विद्यालयस्य बहिरितस्ततः भ्रमति, किमपि चिन्तयति, अनन्तरं विविधासु कक्षासु अवलोकनार्थं गच्छति, स कक्षायाः प्रमुखद्वारादेव विलोकयति। षष्ठकक्षाया विद्यार्थिनः स्वस्तिवाचनपूर्वकं माहेश्वरसूत्राणि पठन्तो भवन्ति ।) शिक्षिके ! सविते ! एते विद्यार्थिनो


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मनोहारिणा श्रुतिमधुरेण स्वरेण पठन्तः सन्ति। पुनरेकवारं वाचनार्थं निर्दिशतु। (श्वेतपट्टिकायां सूत्राणि लिखितानि दृश्यन्ते।)

**सविता** भो विद्यार्थिनः ! अस्माकं प्रधानाध्यापकाय एकं वैदिकं मङ्गलाचरणमन्त्रं माहेश्वरसूत्राणि च श्रावयन्तु।

**विद्यार्थिनः** आम्, वयं श्रावयामः -

स्वस्तिन इन्द्रो ...दधातु।

अइउण्, ऋलृक्, एओङ्.....हल्।

**मुक्तिनाथः** धन्यवादाः। अस्माकं विद्यार्थिनः सक्षमाः, निपुणाश्च सन्ति। एत एव संस्कृतस्य सम्बर्द्धकाः, धर्मस्य संस्कृतेश्च संरक्षकाः, देशस्य कर्णधाराः।

**विद्यार्थिनः** धन्यवादाः, भवतः आशीर्वादं शिरसा गृह्णीमः।

**सविता** (अनन्तरं सविता प्रथमकक्षायाः सकलान् विद्यार्थिनः क्रीडनाय विद्यालयस्य अग्रे स्थितं क्रीडास्थलं प्रति प्रेषयति।) अधुना यूयं सर्वे क्रीडाक्षेत्रं गच्छत। (विद्यार्थिनो गच्छन्ति, साऽप्यनुगच्छति) मम प्रियाः शिष्याः, यूयं किं क्रीडथः ?

**रमेशः** गुरुमातः ! प्रोञ्छनीगोपनखेलं खेलामः।

**श्यामः** शोभनम्, एतदेव खेलं खेलामः, क्रीडनमेतत् आनन्ददायकम् अस्ति।

**सविता** यूयं सर्वे एतदेव खेलं वाञ्छथ ?

**सर्वे** आम्, गुरुमातः ! वयं सर्वेऽपि एतदेव खेलामः।

**सविता** तर्हि यूयं सर्वे अत्र क्रीडास्थले वर्तुलाकारेण तिष्ठत। (विद्यार्थिनो वर्तुलाकारेणैव निवसन्ति।) अत्र प्रथमम् एको विद्यार्थी प्रोञ्छनीं गृहीत्वा युष्माकं पश्चाद् धावति, कस्यापि पृष्ठे प्रोञ्छनीं परित्यज्य पुनः परिक्रम्य आगच्छति, यदि तत्रैव प्रोञ्छनी प्राप्ता चेत् स प्रोञ्छन्या प्रहारपूर्वकं खेलाद् बहिष्क्रियते, यदि पूर्वमेव स्वपृष्ठभागे प्रोञ्छनी तेन प्राप्ता चेत् तां गृहीत्वा पुनः सर्वेषां पृष्ठभागेन धावितव्यम्, कस्यापि पृष्ठे त्यक्तव्या च। युष्माभिः खेलस्य नियमा अवगताः ?

**सर्वे** अवगताः गुरुमातः !

**सविता** तर्हि खेलप्रारम्भो विधीयते। (प्रथमं रमेशाय प्रोञ्छनीं ददाति, अनन्तरं स प्रोञ्छनीं गृहीत्वा सर्वेषां पृष्ठतः शनैर्धावति।) ग्रीवाभङ्गेन कोऽपि पृष्ठभागं न पश्यतु।


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(खेलस्य तृतीयचक्रानन्तरं क्रीडाक्षेत्रं प्रत्येव आगच्छन्तौ विंशतिवर्षकल्पौ द्वौ गोलिकास्त्रधारिणौ अदृश्येताम् । तौ दृष्ट्वा सर्वे विद्यार्थिनः त्रस्ताः, किंकर्तव्यविमूढा अदृश्यन्त । आयुधधारिणौ तौ शिक्षिकायाः समीपं प्राप्नुताम् ।)

**भीषणः** तव नाम किम् ?

**सविता** अहं शिक्षिका सविता अस्मि । भवन्तौ कौ ? (विद्यार्थिनो भयाकुलाः सन्तः शिक्षिकायाः सन्निधौ गच्छन्ति ।)

**ज्वाला** आवां विद्रोहिणौ, आन्दोलनकारिणौ, दर्शनेनैव किं न जानासि ?

**सविता** मया अनुमीतम् ।

**ज्वाला** अत्र किं पाठयति ?

**सविता** अत्र संस्कृतं पाठयामि ।

**ज्वाला** संस्कृतशिक्षणेन को लाभः ? त्वं व्यर्थं संस्कृतं पाठयन्ती असि ।

**सविता** (भयेन कम्पितवती) सकलानां भाषानां जननी संस्कृतभाषा एव । संस्कृतं संस्कृतेर्मूलमस्ति । अस्यां भाषायां विशाला ज्ञानराशिः प्राप्यते ।

**ज्वाला** एषा तु अस्मान् अपि शिक्षयति किम् ? एतत् शिक्षणकार्यं परित्यज्य अस्माभिः सह आगच्छ । राज्यसत्तापरिवर्तनस्य अभियाने त्वमपि चल ।

**सविता** कथं गच्छामि ? मम तु सप्तवर्षीय एकः पुत्रोऽस्ति, दशवर्षीया एका पुत्री चास्ति । एतावपि मम सन्ततय एव । (तदनु तौ विद्यालयस्य परितो विलोकयतः ।)

**भीषणः** (भयं प्रदर्शयन्) एतादृशया बुर्जुवाशिक्षया कथं देशे परिवर्तनं स्यात् ? देशे राज्यसत्तापरिवर्तनेन विना कस्मिन् अपि क्षेत्रे परिवर्तनं न जायते । देशे राज्यसत्तापरिवर्तनक्रमे ये अस्माकम् आज्ञां परिपालयन्ति, ते एव जीवन्ति, ये अवरोधका जायन्ते तेषां गतिः का भवेत् ? समय एव सङ्केतयति ।

**ज्वाला** अधुना गच्छावः । प्रधानाध्यापकस्य कार्यालयं कुत्र अस्ति ? दर्शय ।

**सविता** (तर्जनिकया सङ्केतयति) पश्यतु, तत्र अस्ति ।

(पुनस्तौ गोलिकास्त्रधारिणौ विद्यालयस्य समीपस्थं विश्रामस्थलं गच्छतः, यत्र बहवो विद्रोहिणो भटाः प्रतीक्षारता आसन् ।)

भो, विद्यार्थिनः ! सर्वे कक्षायां प्रविशन्तु । (सर्वे प्रविशन्ति, तदनु सविता प्रधानाध्यापकसमक्षं गत्वा तद्वृत्तान्तं श्रावयति, अन्ये



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शिक्षका अपि तत्र आगच्छन्ति ।)

**दिवाकरः** अधुना किम् अभवत् ?

**सोमेन्द्रः** अत्र गोलिकास्त्रधारिणौ किमर्थम् आगतौ ?

**मुक्तिनाथः** अस्माभिः काऽपि त्रुटिः न विहिता, वयं शिक्षकाः कर्तव्यपरायणाः स्मः । वयमत्र विद्यालयम् आगत्य कुशलतया विद्यार्थिनः पाठयन्तः स्मः । अतो भयस्य विषयो न । वयं संस्कृतसेविनः कारणेन विना कोऽपि अस्मान् किमपि कर्तुं न शक्नोति । अधुना वयं सर्वे पाठनार्थं कक्षायां प्रविशामः ।

**दिवाकरः** गुरो ! गोलिकास्त्रधारिणौ तौ द्वौ अनेकैः भटैः सह शीघ्रमेव अत्र आगमिष्यतः । अस्माभिः किं वक्तव्यम् ? किं कर्तव्यम् ? ये अत्र आगमिष्यन्ति ते अस्माकं कथनं न श्रोष्यन्ति इति मन्ये, मूर्खा एव सन्ति । 'उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये' इति उक्तिरस्ति ।

**मुक्तिनाथः** श्रुणुत, वयं निश्चलाः, निष्कपटाः, विशुद्धाश्च शिक्षासेविनः । अस्माभिस्तान् प्रत्यपि उदारमनसा व्यवहर्तव्यम् । ते अस्माकं न शत्रवः, अपि तु बान्धवा एव । एकग्रामवासिनः, एकदेशवासिनश्च । 'उदारचरितानां तु वसुधैव कुटुम्बकम्' तैः सह अस्माकं किमपि वैरं न । अतो अस्माभिः न भेतव्यम् ।

**सोमेन्द्रः** मम मनसि तु भीतिः वर्तते । 'नदीनां शस्त्रपाणीनां नखिनां शृङ्गिणां तथा । विश्वासो नैव कर्तव्यः' इति कथनम् एव अस्ति । एतेषां विद्रोहिणां संस्कृतशिक्षां प्रति कुदृष्टिर्वर्तते । पूर्वम् अपि विद्यालयस्य पठनपाठनादिकम् अवरोद्धुं तैः निर्देशनं कृतम् आसीत् । अस्मभ्यं विद्यालयेन प्रदत्तं पारिश्रमिकमपि ते याचन्ते स्म । केनापि प्रकारेण एते विद्रोहिणो देशादेव संस्कृतशिक्षां बहिष्कर्तुं प्रयत्नरताः सन्ति ।

**सविता** अहमतीव त्रस्ताऽस्मि । गोलिकास्त्रधारिणां विश्वासो न । बहुसङ्ख्यका एते अत्र वटपिप्पलवृक्षयोरधस्तले विश्रामस्थाने विश्रामरता विद्यन्ते । मन्ये अस्माकं सूचनाम् अवगम्य ते शीघ्रम् एव आगच्छन्ति ।

**मुक्तिनाथः** यत्किमपि भवेत्, वयं कक्षायां प्रविश्य विद्यार्थिनः पाठयामः । (अध्यापकाः कक्षायां यान्ति, मध्याह्नस्यैकवादनात् प्रागेव गोलिकास्त्रधारिणो विद्रोहिणो विद्यालयक्षेत्रं प्रविशन्ति, इतस्ततः अवलोकयन्ति च ।)

**ज्वाला** (उच्चैः) सर्वे विद्यार्थिनः प्रकोष्ठात् बहिर्निःसृत्य क्रीडाक्षेत्रे गच्छन्तु ।


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(इत्यादिश्य स प्रत्येकं कक्षां निरीक्षते, त्रस्ता विद्यार्थिनः ससम्भ्रमं बहिर्गच्छन्ति । स नवमकक्षायां पाठयन्तं प्रधानाध्यापकं समीक्षते ।) त्वमस्य विद्यालयस्य प्रधानाध्यापकः असि ?

**मुक्तिनाथः** आम्, अस्मि ।

**ज्वाला** अस्माकम् आज्ञापालने कथं विलम्बः ?

**मुक्तिनाथः** अपरिचितो भवान् कः ? विद्यालयसमये अत्र सशस्त्रो भवान् केन प्रयोजनेन प्राविशत् ? विद्यालयस्तु शान्तिक्षेत्रम् अस्ति ।

**ज्वाला** बहिरागच्छ, अस्माकं परिचयं जानासि । कथम् अधिकं जल्पसि ? (मुक्तिनाथं प्रति गोलिकास्त्रं प्रदर्शयति ।)

**मुक्तिनाथः** आगच्छामि ।

**ज्वाला** मित्राणि ! एनं बलात् कक्षातो बहिर्निःसारयन्तु । (द्वौ गोलिकास्त्रधारिणौ मुक्तिनाथस्य करौ गृह्णीतः, कर्षयतश्च ।)

**मुक्तिनाथः** मा एवम्, मा एवम्, कथं बलाद् नयथः ? पठनपाठने कथं व्यवधानं कुरुथ ? (तौ मुक्तिनाथं कार्यालयस्य अग्रे क्रीडाक्षेत्रे नयतः, विद्यार्थिनः शिक्षकाश्च तत्रैव दृश्यन्ते । विद्यालयात् कोऽपि पलायितुं न शक्नुयात् इति धिया क्रीडाक्षेत्रं परितो विद्रोहिणो वर्तुलाकारेण अवर्चन्त ।)

**दिवाकरः** (गोलिकास्त्रधारिणं प्रति) भो, महाभाग ! पठनपाठने निषेधस्य कारणं किम् ? अस्माकं प्रधानाध्यापकं कथं त्रस्तं करोषि ? अस्माभिः का त्रुटिः विहिता ?

**ज्वाला** त्वं कथम् अधिकं जल्पसि ? तूष्णीं तिष्ठ ।

**मुक्तिनाथः** देववाण्या संस्कृतभाषया शिक्षाप्रदानं किम् अस्माकं त्रुटिरस्ति ? नियमेन विनैव भवद्भिः कीदृशो व्यवहारः प्रदर्शितः ?

**ज्वाला** 'आतुरे नियमो नास्ति' इति त्वया न श्रुतम् ?

**मुक्तिनाथः** विद्यालयस्य समुन्नतेर्विषये वयं शान्तिपूर्वकं विमर्शं करवामः । हिंसया त्रासेन च समस्यायाः समाधानं न भवति । 'अहिंसा परमो धर्मः' इत्यस्माकं नीतिः ।

**ज्वाला** अस्याम् एकविंशत्यां शताब्द्यां कर्मकाण्डिनां ब्राह्मणानां भाषायाः शिक्षणेन को लाभः ? अनया शिक्षया राज्यं किं प्राप्नोति ?

**मुक्तिनाथः** भवता संस्कृतं न पठितम्, तस्मात् कारणात् ब्राह्मणानां भाषा इति कथयन् अस्ति । संस्कृतभाषा केवलं जातिविशेषस्य भाषा न । विश्वस्मिन् विश्वे प्रयुज्यमानानां सकलानां भाषाणां जननी अस्ति



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संस्कृतभाषा । अस्यां भाषायां धर्म-संस्कृति-ज्योतिषायुर्वेदादीनां बहूनाम् उपयोगिनां विषयाणां सङ्ग्रहो वर्तते ।

**ज्वाला** त्वम् अस्मान् पाठयन् असि ? अत्र वयं गोलिकास्त्रैः सज्जीभूय त्वया सह पठनार्थम् आगताः किम् ?

**मुक्तिनाथः** भवन्तः मां कथं पीडयन्तः सन्ति । एतदुचितं न, 'अति सर्वत्र वर्जयेत्' अहं विद्यालयस्य प्रधानाध्यापकः, कारणं विनैव भवन्तो ममापमानं कुर्वन्तः सन्ति । अस्मिन् विद्यालये संस्कृतशिक्षणं किं मम दोषोऽस्ति ? संस्कृतशिक्षायै जीवनसमर्पणं किं मम दोषोऽस्ति ?

**ज्वाला** त्वम् अस्माद् विद्यालयात् संस्कृतस्य पठनपाठनादिकं श्वस्तनाद् दिनादेव रुणत्सि न वा ?

**मुक्तिनाथः** कथं रुणध्मि ? संस्कृतं तु अस्माकं जीवनम्, अस्माकं प्राणः, अस्माकं धर्मः, अस्माकं संस्कृतिः, अस्माकं ज्ञानपुञ्जम्, एतादृशं संस्कृतं परित्यक्तुं न शक्नोमि ।

**सविता** गुरो ! अधुना अस्माभिः संस्कृतस्य विषये अधिककथनं नोचितम् । दर्दुरा यत्र वक्तारस्तत्र मौनं समाचरेत् ।

**ज्वाला** किं कथयन्ती असि ? वयं किं दर्दुराः ? अस्मान् न जानासि त्वम् ? अस्माकं शक्तिर्न दृष्टा ? एतादृशाः शिक्षकाः, एतादृशः शिक्षिकाश्च अस्माभिर्बहुत्र दृष्टाः । अस्माकं पार्श्वे गोलिकास्त्राणि न दृष्टानि ? (शिक्षिकां प्रत्यपि गोलिकास्त्रं प्रदर्शयति)

**सविता** तूष्णीं निवसामि परं संस्कृतशिक्षाविरोधिनं विचारं न शृणोमि, तादृशस्य विचारस्य प्रतिकारं करोमि ।

**ज्वाला** (सवितां निर्दिश्य) विद्यालयस्य प्रधानाध्यापिका त्वम् असि ? कथम् अत्र आगत्य अनावश्यकं जल्पसि ? त्वं दूरम् अपसर । (गोलिकास्त्रेण तां दूरम् अपसारयति ।) अधुना वयं परिवर्तनस्य आन्दोलने संलग्नाः स्मः । वयं बुर्जुवाशिक्षां देशतोऽपसारयन्तः स्मः । पारम्पर्या शिक्षया किं भवति ? अतः अद्यदिनाद् एव अस्मिन् विद्यालये पठनपाठनं न भवेत् ।

**विद्यार्थिनः** (नमस्कारपूर्वकम्) वयम् अत्रैव पठामः, संस्कृतमेव पठामः । अस्माकं गृहाणि निकटे न सन्ति । वयं विकटस्थानात् सुदूरक्षेत्राद् आगताः स्मः । वयं किं कुर्मः, क्व यामः, अस्मान् प्रति दयां कुर्वन्तु ।

**ज्वाला** विद्यार्थिनः ! यूयम् अस्माभिः सह गच्छत । नैकविधानि आयुधानि गृहीत्वा ग्रामाद् ग्रामं वनाद् वनं च भ्रमितुं प्राप्नुथ ।


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**विद्यार्थिनः** नैव नैव, न गच्छामो वयम् । अत्रैव पठामः ।

**ज्वाला** अधुना वयं गच्छामः । एषः प्रधानाध्यापकोऽपि अस्माभिः सह गच्छति ।

**दिवाकरः** प्रधानाध्यापकं मा नयन्तु । भवद्भिरत्र प्रस्तुते विषये वयम् अभिभावकैः सह वार्तालापं परामर्शञ्च कुर्मः ।

**ज्वाला** वयं जानीमः । अस्मिन् विषये इतः परं न कोऽपि वदन्तु । प्रधानाध्यापकं गृहीत्वा चलन्तु मित्राणि !

**मुक्तिनाथः** मां कुत्र नेतुं वाञ्छन्ति भो ! अहं न गच्छामि ।

**ज्वाला** कथं न्न गच्छसि ? शीघ्रं चल । (प्रधानाध्यापकं गोलिकास्त्रं प्रदर्शयन् कर्षयति ।) अत्र इमान् प्रति किमपि कथनम् अस्ति चेत् कथय ।

**मुक्तिनाथः** अत्र मम कथनम् अरण्यरोदनमिव भवति । तथापि अहं किमपि वक्तुं वाञ्छामि । अधुनापर्यन्तं मया संस्कृतशिक्षायाः कृते प्रयत्नो विहितः । संस्कृतशिक्षायां विद्यमानानि नैकविधानि ज्ञानपुञ्जानि यथाशक्यं विद्यार्थिभ्यो वितरितानि । ज्ञानप्रदानं किं दोषाय भवेत् ? अस्माकं संस्कृति-सभ्यता-दर्शनाध्यात्मप्रदायिनी शिक्षा कथं बुर्जुवाशिक्षा भवति ? भ्रष्टाचारेण दग्धे समाजे देशे चानुशासनस्य नैतिकतायाश्च शिक्षा कथं पारम्परी ? अधुनापि अहं संस्कृतशिक्षाया एव पक्षपाती अस्मि । सामाजिकीं वास्तविकतां देशस्य आवश्यकतां च कस्यापि बलेन आयुधप्रहारेण च गोपायितुं नैव शक्यते । अस्माद् विद्यालयात् संस्कृतशिक्षां बहिष्कर्तुम् अहं कदापि न शक्नोमि, संस्कृतशिक्षायाः संरक्षणार्थम् एव अहं सर्वकारेण प्रधानाध्यापकपदे नियुक्तः । मनसा, वचसा चाहं संस्कृतसेवी । कार्यं वा साधयेयम्, देहं वा पातयेयम् । संस्कृतस्य उन्नत्यै जीवनपर्यन्तं क्रियाशीलो भवामि । भो अध्यापकाः ! अहं प्रत्यावर्तितुं शक्नोमि वा न, भवन्तः संस्कृतशिक्षायाः कृते सदैव दत्तावधाना भवन्तु । अस्माकं जीवनभूतं संस्कृतं रक्षन्तु ।

**ज्वाला** तव भाषणेन अलम् । एनं गृहीत्वा चलन्तु मित्राणि ! (चत्वारो गोलिकास्त्रधारिणो मुक्तिनाथस्य करौ सम्पीड्य अग्रे चलन्ति ।)

**शिक्षकाः** (नमस्कारपूर्वकं क्रन्दन्तः) भो महानुभावाः ! अस्माकं प्रधानाध्यापकं मा नयन्तु ।

**विद्यार्थिनः** (क्रन्दन्तः) अस्माकं गुरुं बन्धनात् मोचयन्तु । दयां कुर्वन्तु ।

(पश्चात् परिवर्त्य हस्तदोलनेन मुक्तिनाथो अवकाशं याचते, विद्यार्थिनः



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मुक्तिनाथम् अनुधावितुं प्रयतन्ते परं विद्रोहिणो गोलिकास्त्रप्रदर्शनेन तान् प्रत्यावर्तयन्ति, नेपथ्ये विद्यार्थिनां रोदनस्य ध्वनिः श्रूयते, सार्धघण्टानन्तरं विद्रोहिणो मुक्तिनाथं विद्यालयक्षेत्रस्य उपरि स्थितं कोद्रवक्षेत्रं प्रापयन्ति, स दुःखितो शिथिलश्च अवलोक्यते ।)

**ज्वाला** एतावत्ताडनेन अपि तव विचारो न परिवर्तितः ? अङ्गारः शतधौतेन मलिनत्वं न मुञ्चति । त्वयाऽपि संस्कृतमोहो न परित्यक्तः । भो भटाः ! पुनरेनं लगुडेन ताडयन्तु । (विद्रोहिभटाः मुक्तिनाथं प्रति हस्तेन, लगुडेन च ताडयन्ति ।)

**मुक्तिनाथः** अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम् । मां प्रति विहितस्य कर्मणः फलं भवद्भिः शीघ्रमेव भोक्तव्यं भविष्यति ।

**भीषणः** अधुनापि अधिकं जल्पन् अस्ति ? जीवनस्य आशा न वर्तते ?

**मुक्तिनाथः** अहं जीवेयम् वा म्रियेय, अन्या वार्ता । परं यावद् जीवेयं सत्यं वदामि, सत्कर्म करोमि, समाजस्य समुन्नत्यै शिक्षाया उन्नत्यै च कार्यं करोमि, संस्कृतशिक्षायाः संरक्षणे संवर्द्धने च जीवनम् समर्पयामि ।

**ज्वाला** रे जल्पाक ! तव मृत्योः समयः समागतः । अस्माभिः उक्तं त्वया कदापि न श्रुतम्, अस्माभिर्निर्देशितं किमपि न विहितम् । त्वया अस्माकं प्रतिकूलम् आचरितम् । अतस्तव सन्निधौ यमराज उपस्थितः । अधुना यमं परावर्तितुं कोऽपि समर्थो न ।

**मुक्तिनाथः** जातस्य हि ध्रुवो मृत्युः । मम मनसि भीतिर्नास्ति, संस्कृतस्य कृते सहर्षं जीवनं समर्पयामि ।

**ज्वाला** अयं कीदृशो मूर्खः अस्ति । स्वजीवनाद् अपि संस्कृतं प्रियं मनुते ।

**भीषणः** महाशय ! मूर्ख एव न महामूर्खोऽस्ति । (तत्र विद्रोहिणः उच्चैः हसन्ति ।)

**ज्वाला** भो, मित्राणि ! एनम् अस्यैव गलबन्धवस्त्रेण अस्मिन् शिंशपावृक्षमूले बध्नन्तु । अस्य मुखविवरे प्रोञ्छनीवस्त्रं योजयन्तु, येना अस्य क्रन्दनं समन्तात् न प्रसरेत् । (ते मुक्तिनाथं शिंशपावृक्षस्य मूले कण्ठतः कटिपर्यन्तं बध्नन्ति, प्रोञ्छन्या मुखविवरं च पूरयन्ति ।) त्वया अस्माकं निर्देशनं न स्वीकृतम्, तस्य फलम् एतत् । तव जीवनम् अधुना अस्य गोलिकास्त्रस्य अग्रभागे वर्तते । (पुनस्ते मुक्तिनाथं ताडयन्ति ।) जीवनस्य अन्तिमे क्षणे परिवारजनान् स्मर, मित्राणि, विद्यार्थिनश्च स्मर, तव कापि इच्छा अस्ति चेद् एकेनैव


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वाक्येन शीघ्रं कथय ।

**मुक्तिनाथः** मयि परलोकं गते अपि सदा जीवेत् संस्कृतम् ।

(ततो विद्रोहिणो मुक्तिनाथं गोलिकाप्रहारेण छुरिकाप्रहारेण च घ्नन्ति, तस्मिन् क्षेत्रे गोलिकास्त्राणां विपुलो ध्वनिः श्रूयते, नेपथ्ये वियोगजनकं गीतं गुञ्जति ।)

(रङ्गमञ्चः जवनिकया आच्छाद्यते ।)


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

# प्रेमविवाहः

यदुपन्थी

**पात्राणि**

रुचिरा (नायिका), कनकः(नायकः), सुमती (रुचिराया माता), वासुदेवः (रुचिरायाः पिता), स्वर्णमाया (कनकस्य माता), हेमकरः (कनकस्य पिता), प्रेमा (कनकस्य भगिनी), पवनः(रुचिरायाःभ्राता), सागरः, (ग्रामपालिकाध्यक्षः), कलावती (ग्रामपालिकायाः उपाध्यक्षा), प्रमोदः (ग्राम्यः प्रबुद्धजनः), कृष्णतामाङ (ग्राम्यो बुद्धिजीवी), उषा (ग्रामपालिकायाः वडासदस्या, दिवाकर बर्मा (ग्राम्यो बुद्धिजीवी)।

## प्रथमं दृश्यम्

(विद्यालयसमयानन्तरं कनको रुचिराम् अनुसृत्य गच्छति। ह्यस्तनदिवसे यत्र तयोर्मेलनम् अभूत, तस्मिन् एव स्थाने उभौ मिलित्वा वार्तालापं कुरुतः।)

**कनकः-** क्षम्योऽस्मि रुचिरे !

**रुचिरा-** न करणीयं किं कृतं त्वया ?

**कनकः-** तव रूपं दृष्ट्वा मम मनो विह्वलितम्, तस्मात् मया पत्रं लिखितं प्रेषितञ्च।

**रुचिरा-** तदेव कारणं क्षमायाचनायाः ? तथा चेत् त्वं न क्षम्योऽसि।

**कनकः-** मा वद तादृशम्। अहं याचकोऽस्मि, क्षमां याचे, ददासि चेत्।

**रुचिरा-** मम झोलिकायां केवलं पुस्तकानि तथा अभ्यासपुस्तिका एव सन्ति। नास्ति किमपि अन्यत्। यद् मम पार्श्वे नास्ति तत् कथं दातुं शक्नोमि ?

**कनकः-** त्वं तु यादृशी वयस्का सुन्दरी च असि, तादृशी एव चपला चतुरा च। अहं तु प्रथममेलने एव चकितः। स्रष्टा त्वां कया कलया असृजत् ?

**रुचिरा-** यथा त्वाम् असृजत् तथैव माम् अपि। त्वम् अपि वयस्कः सुन्दरश्च असि।

**कनकः-** परं त्वमिव नास्मि अहम् इति मन्ये। त्वं तु अष्टमकक्षायाः परीक्षायां प्रथमश्रेण्याम् उत्तीर्णा जाता। रात्रौ न स्वपिषि किम् ?

**रुचिरा-** त्वमपि च प्रथमश्रेण्याम् उत्तीर्णः असि न किम् ? (घटिकां पश्यति) अहो सायङ्कालो जातः। विलम्ब्यते चेत् मम माता क्रुध्यति।

**कनकः-** मम प्रमुखप्रस्तावं प्रति तव का धारणा अस्ति ?

**रुचिरा-** तस्मिन् विषये आगामिषु दिवसेषु विचारयिष्यामि। गच्छामि अहं गृहं



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रति ।

**कनकः-** श्वः अपि अत्रैव आगन्तव्यम् ।

**रुचिरा-** भवतु तर्हि । (उभौ गच्छतः ।)

(तत्पश्चात् एवं प्रकारेण निरन्तरमेव प्रेमालापं कुर्वतोः तयोः कतिपयवर्षाणि व्यतीतानि । रुचिरा माध्यमिकविद्यालयस्य दशमकक्षायाः परीक्षां प्रथमप्रयासे अनुत्तीर्य द्वितीयप्रयासे उदतरत् । सा इदानीं ग्रामे एव माध्यमिकविद्यालये द्वादशकक्षायां पठति । कनकस्तु स्नातकप्रथमवर्षेरध्येतुं नगरं गतवान् । तयोः परस्परं चलभाषयन्त्रेण वार्तालापं चलति ।)

(जवनिका पतति)

## द्वितीयं दृश्यम्

(ग्रामम् आगतः कनकः तस्मिन् एव स्थाने रुचिरां प्रतीक्षमाणोऽस्ति ।)

**कनकः-** दर्शनम् अतिरिच्य बहूनि दिनानि व्यतीतानि । अद्य तु त्वं चलचित्रस्य नायिका इव मनोहारिणी दृश्यसे ।

**रुचिरा-** मम प्रशंसायामेव बहूनि वर्षाणि व्यतीतानि । अत्यधिकं मा प्रशंस ।

**कनकः-** तव सौन्दर्यमेव तादृशम् अस्ति । त्वं कृशोदरी बिम्बोष्ठी चारुनेत्रा च विलससि । तव मुखमण्डलं पूर्णचन्द्र इव दृश्यते । तस्मात् तव सौन्दर्यं मम मनः समुद्रस्य उत्तरतरङ्ग इव उद्वेलयति ।

**रुचिरा-** अहमपि तु त्वां प्रति तथैव उद्वेलिता अस्मि । परम् ...।

**कनकः-** किं परम् ?

**रुचिरा-** मम पिता माता अग्रजश्च मम विवाहार्थं अन्यम् अन्वेष्टुम् आरब्धवन्तः । तस्मात् अहं शोकमग्ना अस्मि । अहं तु त्वां प्रति आकृष्टा अस्मि ।

**कनकः-** रुचिरे ! चिन्तां मा कुरु । यदि त्वं स्वीकरोषि चेद् अहं त्वया सह विवाहं करोमि । त्वां सन्तोषयितुं यत्किमपि कार्यं कर्तुं शक्नोमि ।

**रुचिरा-** अधिकप्रजल्पनं मा कुरु । गभीररूपेण विचार्य कार्यं क्रियते चेद् एव लक्ष्यं प्राप्यते ।

**कनकः-** तथा चेद् अहम् अद्यैव सायं मम मातापितरौ अस्मिन् विषये कथयामि। त्वमपि तव मातापितरौ कथय । आवां शीघ्रमेव विवाहं कुर्वः । न भवति किम् ?

**रुचिरा-** तव विचारस्तु समीचीनः । परं मम पितरौ भ्राता च सजातीयं


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विवाहम् इच्छन्ति । अहं ब्राह्मणपरिवारे उत्पन्ना अस्मि चेत् त्वं अन्यवर्णस्य परिवारे उत्पन्नोऽसि । अस्मात् कारणात् अहं चिन्तिता अस्मि । मम पितरौ अग्रजश्च आवयोः विवाहविषये चिन्तयितुम् अपि न शक्नुवन्ति ।

**कनकः-** तव विचारः कीदृशोऽस्ति ? अहं तु त्वया सह विवाहो न भवति चेत् ... किमपि कर्तुं शक्नोमि । प्राणान् अपि त्यक्तुं शक्नोमि ।

**रुचिरा-** अहं तु ईश्वरस्य सृष्ट्यां सर्वे वर्णा जातयश्च समानाः सन्ति इति मन्ये ।

**कनकः-** समीचीनस्तव विचारः । अहम् अपि सर्वे वर्णाः ईश्वरस्य मायाधीनाः सन्ति इति मन्ये ।

**रुचिरा-** (घटिकां पश्यति) अहो ! बहुसमयो व्यतीतः ।

**कनकः-** अद्य गृहद्वये एव एतस्मिन् विषये वार्तां कृत्वा श्वोऽपि अत्रैव मेलनं कर्तास्वः ।

**रुचिरा-** भवतु तर्हि । गच्छावः । (उभौ चलतः । जवनिका पतति ।)

## तृतीयं दृश्यम्

(रुचिरायाः मातापितरौ गृहाभ्यन्तरे उपविष्टौ स्तः । पवनश्च तत्रैव वसन् अस्ति ।)

**सुमतिः-** (भित्तिघटिकाम् अवलोकयन्ती कथयति) अहो सायङ्कालस्य अष्टवादनसमयो जातः । इदानीं यावद् रुचिरा न आगतवती ।

**पवनः-** 'सा इदानीं यावत् कनकेन सह स्थिता अस्ति' इति मम शङ्का वर्तते । बहुदिनानन्तरम् अद्य तौ मिलितौ स्तः ।

**वासुदेवः-** कोऽस्ति सः ?

**पवनः-** सः पूर्वं तस्याः सहपाठी आसीत् । तौ अष्टमकक्षातः एव परस्परं परिचितौ वर्तेते । यदा अहं पञ्चमकक्षायाम् आसम्, तदा द्वित्रिवारं तयोः पत्रनयनानयनकार्यं च मया कृतम् । (रुचिरा आगत्य गृहं प्रविशति ।)

**सुमतिः-** पुत्रि ! केन कारणेन विलम्बः कृतः त्वया ? इदानीं यावत् त्वं कुत्र आसीः ?

**रुचिरा-** सखीभिः सह पठन्ती आसम्, अतो विलम्बो जातः ।

**सुमतिः-** वाचाले ! मिथ्या वदसि । केन कारणेन त्वया विलम्बः कृतः इति वयं



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जानीमः ।

**वासुदेवः-** कः अस्ति सः ? येन सह त्वं समयं यापितवती ? (रुचिरालज्जया अधोमुखी भूत्वा भूमिं विलोकयति, किमपि न वदति)

**वासुदेवः-** (उच्चैः साक्रोशम्) न शृणोषि ? कः सः ?

**रुचिरा-** (सत्रासं मन्दस्वरेण) स कनकोऽस्ति ।

**सुमतिः-** इदानीं सः किं करोति ? विद्यावान्, गुणवान्, कुलवान्, धनवांश्च अस्ति न वा ?

**रुचिराः-** इदानीं तु सोऽस्माकं नगरस्थे महाविद्यालये स्नातकप्रथमवर्षे पठति ।

**वासुदेवः-** तस्य को वर्णः ? किं गोत्रम् ? सजतीयो वा विजातीयः ? अस्माकं कुलेन सह तस्य कुलस्य समता अस्ति न वा ? जानासि किम् ?

**रुचिरा-** स वर्णेन गौरः, अध्ययने चतुरः दर्शने सुन्दरः, मिष्टभाषी च अस्ति । स माम् अत्यधिकं प्रीणाति । स मह्यम् उपहारान् च प्रददाति । इयं चर्मझोलिका तेनैव दत्ता, इयं हस्तघटिका तेनैव उपहृता । इमे शोभने उपानहौ च तेनैव प्रदत्ते ।

**वासुदेवः-** तस्य को वर्णः ? किं गोत्रम् ? सजतीयो वा विजातीयः ? अस्माकं कुलेन सह तस्य साम्यं भजते न वा ? ज्ञायते किम् ? (रुचिरा मौनतां धारयति ।)

**पवनः-** पितः ! अहं अधिकं तु न जानामि परं सः स्वर्णकारोऽस्ति इत्येव जानामि ।

**वासुदेवः-** स्वर्णकारः ? मम पुत्री स्वर्णकारेण सह प्रेम करोति, इदं नैव चिन्तयितुं शक्नोमि अहम् । यदि तथा अस्ति चेद् इतः परं रुचिरायाः तेन सह मेलो निषिद्धः ।

**सुमतिः-** रुचिरे ! अहं तव माता अस्मि, सर्वथा तव हितं कामये, त्वम् अधुना प्राप्तयौवना असि, तव मुखमण्डलं चन्द्रकिरणमिव आह्लादयति यूनां मनः । त्वां दृष्टा युवकाः मुग्धायन्ते, मूर्च्छायन्ते च । अतः तव चन्द्रवद् रूपं दृष्ट्वा ये केऽपि त्वां प्राप्तुम् अभिनयं कुर्वन्ति, विनयं कुर्वन्ति, कौटिल्येन नटन्ति, अजः अजाम् इव त्वां कामयन्ते, अतः त्वया हिताहितविचारः कर्तव्यः, अस्माभिश्च विचारः कर्तव्यः ।

**वासुदेवः-** रुचिरे ! अहं तव पिता अस्मि, तव भविष्यं सुखं सन्तोषञ्च विचारयामि। तेन साकम् अस्माकं गोत्रम्, जातिः, संस्कृतिः, परम्परा, खाद्यम्, पेयम्, विचारः किमपि साम्यं न भजते । मद्येन मांसेन च विना तेषां भोजनं न प्रचलति, त्वं शाकाहारिणी असि । कथं युवयोः सम्बन्धः सुदृढायते ?



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्वं तेन साकं भौतिकसुखम्, आध्यत्मिकसुखं च न प्राप्नोषि । तेन सह आजीवनं कष्टायते तव जीवनम् । अस्माकं कुले पतिव्रताधर्मः पत्नीव्रतधर्मश्च प्रचलति, तेषां कुले एतादृशी प्रथा नास्ति ।

**सुमतिः-** पुत्रि ! पित्रोः प्रतिष्ठां पश्य, स्वस्य भविष्यं विलोकय, मातुलः किं कथयति ? पितृव्याः अन्ये बान्धवाश्च किं कथयन्ति ? त्वं तत्र एकं क्षणम् अपि स्थातुं न प्रभवसि । तव कृते रूपवान्, शीलवान्, विद्वान्, धनवान् च सुप्रतिष्ठितो वरोऽन्विष्यते । अपरः योग्यो वरोऽपि प्रेम करोति, विवाहानन्तरं पारिवारकं, सामाजिकं, धार्मिकं, सांस्कृतिकञ्च दायित्वं विशेषरूपेण वहति ।

**वासुदेवः-** वयं सदैव तव हितमिच्छामः । रूपवतीं यौवनारूढां च त्वां प्राप्तुं यः कोऽपि वाञ्छति । तत्र अकुले विवाहं कृत्वा प्रतिष्ठा अपि गच्छति, तव जीवनम् अपि दुःखायते । अस्माकं वचनं परिपालय पुत्रि ! नो चेत् पश्चात्तापो भविष्यति, तव जीवनं मरणाय कल्पते । (रुचिरा किमपि अनुक्त्वैव अन्तः गच्छति । जवनिका पतति ।)

## चतुर्थं दृश्यम्

(कक्षासमयानन्तरं ह्यस्तनदिवसे इव तस्मिन् एव स्थाने मिलित्वा तौ वार्तालापं कर्तुम् आरब्धवन्तौ ।)

**कनकः-** अद्य तु मम मायाया मुखचन्द्रं किमर्थं मेघः आच्छादयत् ?

**रुचिरा-** मम मातापितरौ अग्रजश्च कथयन्ति यद् अस्माकं पूर्वजानां स्वर्णाभूषणानि तव पूर्वजाः निर्मान्ति स्म । तस्माद् आवयोः विवाहोऽसम्भवः इति तेषां विचारोऽस्ति ।

**कनकः-** मम पितरौ अपि आवयोः विवाहं न स्वीकुरुतः । तौ तव परिवाराद् बिभीतः । मम विचारे तु आवां गान्धर्वविवाहं करवावः ।

**रुचिरा-** मम मनसि शङ्कोपरि च शङ्का उत्पद्यते । एतस्मिन् समयेऽहं नवयौवना अस्मि । मम रूपं सौन्दर्यं वयश्च त्वाम् आकर्षति । तेन त्वम् मयि आकृष्टोऽसि । पश्चात् त्वं मामवमन्तुं च शक्नोषि । एवं किम् ?

**कनकः-** रुचिरे ! त्वं चिन्तां मा कुरु । यदि त्वं स्वीकरोषि चेदहं त्वया सह विवाहं करोमि । तव सुखार्थं त्वां सन्तोषयितुं वा अहं आकाशात् सर्वान् तारकगणान् पातयित्वा आनयामि । तव शरीरं स्वर्णास्भूषणैः छादयामि । नगरे गृहं निर्माय त्वया सह ससुखं जीवनयापनं करोमि


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इति मे दृढो विचारः ।

**रुचिरा-** तथा अस्ति चेद् आवां गान्धर्वविवाहं कृत्वा ससुखं वैवाहिकजीवनं यापयावः । आवयोः शरीरयोरधिकारः आवयोरेव अस्ति । न किम् ?

**कनकः-** तावत् मन्दिरं प्रति गच्छावः ।

(उभौ युगपद् गत्वा समीपस्थिताद् आपणाद् नूतनानि वस्त्राणि, सिन्दूरम्, पुष्पमाले, स्वर्णाङ्गुलीयके च क्रीत्वा मन्दिरं प्रति चलतः । तत्र तौ गान्धर्वविधिना परस्परं पुष्पमाले स्वर्णाङ्गुष्ठिके च परिधापयतः । अन्ते कनकस्य हस्तात् रुचिरा सीमन्ते सिन्दूरं गृह्णाति । अनन्तरं तौ सहैव कनकस्य गृहं प्रति गच्छतः ।) (जवनिका पतति ।)

## पञ्चमं दृश्यम्

(कनकस्य मातापितरौ गृहस्य द्वारसमीपे पविष्टौ आस्ताम् ।)

**कनकः-** (मातरं पितरं च प्रणमन्) भो मातः ! भो पितः ! भवतोश्शुभाषिशं कामयावहे । (रुचिरा अपि तौ नमति ।) एषा युवयोः पुत्रवधूरस्ति आशीर्वादो दीयताम् ।

**हेमकरः-** कनक ! ... त्वया किं कृतम् ? इयं भिन्नजातीया कन्या किमर्थम् उद्वाहिता त्वया ? स्वकीयां परम्पराम् उल्लङ्घ्य अस्माकं परामर्शं विनैव कथम् ... ?

**स्वर्णमाया-** पुत्र ! ... किं कृतम् ? इयम् असवर्णपरिवारस्य पुत्री । अनेन कार्येण उभयोः कुलयोः स्वकीया मर्यादा हापिता । कदाचिद् अकल्याणम् अपि भवितुं शक्नोति । एतत्कार्यं न समीचीनम् ।

**कनकः-** हे मातः ! हे पितः ! एषा मां जानाति अस्यै च अहं रोचे । अस्याः अहमेव सखा अस्मि । तथैव अहम् अपि एनां जानामि, अत्यधिकं रोचते च इयं मह्यम् । एषा मम हृदयस्था सखी अस्ति ।

**हेमकरः-** रोचनं तथा विवाहश्च च भिन्नौ विषयौ वर्तेते । परं युवाभ्यां कामवासनाया अल्पबुद्धेः कारणाच्च द्वयोः परिवारयोः परामर्शं विनैव स्वेच्छया विवाहः कृतः । अस्माकं संस्कारः, संस्कृतिः, परम्परा, खाद्यपेये, भूषाभाषणे, जीवनपद्धतिश्च न साम्यं भजन्ति । एतेषां कारणेन युवयोः जीवने सङ्कटम् अपि आपतितुं शक्नोति । तव एतत् कार्यं न समीचीनं पुत्र !

**कनकः-** पितः ! आवाम् परस्परं पृथग् भूत्वा स्थातुं जीवितुं च न शक्नुवः ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अस्याः जीवनसखा अहम् अस्मि, मम जीवनसखी च इयम् अस्ति ।

**स्वर्णमाया-** पुत्र ! ... अहम् असवर्णपरिवारस्य पुत्रीं वधूरुपेण कथं स्वीकरोमि ? अस्मिन् समाजे अस्मत्कुलपरम्पराम् उल्लङ्घ्य एनां स्वीकर्तुं कथं शक्यते ?

**हेमकरः-** कनक ! त्वं कुलविरुद्धं कार्यम् अकरोः । अनयोः परिवारयोः न केवलं वर्ण एव, अपि तु आर्थिकी स्थितिः अपि असमाना वर्तते । आर्थिकरूपेण च ते धनिनः सन्ति । अस्माकं सामाजिकमर्यादा अपि भिन्ना । अस्माकं संस्कारः भिन्नः, संस्कृतिश्च भिन्ना । एषा धनिनां कुले उत्पन्ना वर्धिता चास्ति । पारिवारिकदुःखं सांस्कृतिकपार्थक्यञ्च सोढुं शक्नोति न वा ? एतेभ्यः कारणेभ्यः अस्याः स्वीकरणं मम कृते न सरलम् । (रुचिरा भीतभीतेव दृश्यते, विवर्णा च जायते) ।

**कनकः-** मातः ! पितः ! सामाजिकमर्यादायाः विषये वार्ताकरणस्य इदानीं भवतां समयो नास्ति। अस्माकं देशे लोकतन्त्रानन्तरं सर्वकारोऽन्तर्जातीयविवाहस्य प्रोत्साहनार्थं प्रतिदम्पति पञ्चाशत्सहस्ररूप्यकाणि प्रददाति । तानि रूप्यकाणि समाहृत्य आवां मिलित्वा नवीनमेव अर्थोपार्जनकार्यं सहसा एव कुर्वः । भवतां कृतेऽपि सुखं भविष्यति ।

**स्वर्णमाया-** अस्याः परिवारजनाः युवयोरेतत् कार्यं कथं स्वीकुर्वन्ति ? अहम् अनुमिनोमि तेषां कृते एष महान् हृदयविदारको विषयो भवति इति । (रुचिरा अश्रूणि विमुञ्चति)

**कनकः-** मातः ! विधानतः ते अपि स्वीकुर्वन्तीति अहं मन्ये । इदानीम् अस्माकं देशे मानवेषु मानवजातिषु, तथा अनेकवर्णव्यवस्थासु च स्पर्शास्पर्शव्यवहारः क्रियते चेद् दण्डव्यवस्था अपि वैधानिकरूपेण निर्धारिता अस्ति ।

**प्रेमा-** पितः ! अग्रजो यत् कथयति तत् तु सत्यम् अस्ति । अधुना अस्माकं देशे विभिन्नवर्णेषु स्पर्शास्पर्शव्यवहारः क्रियते चेत् सर्वकारो दण्डं करोति मातः !

**हेमकरः-** मम कृते तु न काऽपि चिन्ता । परं तस्याः परिवारपक्षाः किं कुर्वन्ति इति मम मनसि शङ्का वर्तते ।

**स्वर्णमाया-** पुत्र ! एषा सुन्दरी अपि अस्ति । अस्याः व्यवहारिकज्ञानविषये त्वम् एव जानीहि ।

**कनकः-** मातः ! तस्मिन् विषये चिन्तां मा कुरु ।

**स्वर्णमाया-** तथा चेद् मम कृते तु एषा स्वीकारणीया एव ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**हेमकरः-** अहमपि एनां वधूरूपेण स्वीकरोमि । युवयोः वैवाहिकं जीवनं सफलं भवतु । (सर्वे गृहाभ्यन्तरं प्रविशन्ति । जवनिका च पतति ।)

## षष्ठं दृश्यम्

(रुचिरायाः मातापितरौ अनुजश्च गृहाभ्यन्तरे सन्ति ।)

**सुमतिः-** (भित्तिघटिकाम् अवलोयन्ती) अहो ! रात्रेः नववादनसमयो जातः । इदानीमपि रुचिरा न आगतवती ।

**पवनः-** अद्य तु अग्रजा विद्यालयतश्चतुर्वादनात् पूर्वमेव पलायिता आसीत् । अहं यत्र तत्र पश्यन् आगच्छम् परं सा न अदृश्यत ।

**वासुदेवः-** इदानीं तस्याः चलद्भाषे अपि सम्पर्को न भवति । किमभवत् ? किमभवत् ? मया तु चलद्भाषयन्त्रेण बहुवारं प्रयासो विहितः ।

**पवनः-** अद्यापि सा इदानीं पर्यन्तं कनकेन एव सह अस्ति इति अहं मन्ये ।

**वासुदेवः-** क्षणानन्तरं प्रहरिणं सूचयामि । न भवति किम् ?

**सुमतिः-** आम् । (क्षणानन्तरं सुमत्याश्चलद्भाषयन्त्रे ध्वनिरागच्छति ।)

**सुमतिः-** (चलद्भाषयन्त्रमुत्थाप्य) पुत्रि ! त्वं कुत्रासि ? रात्रेः दशवादनसमयो जातः ।

**रुचिरा-** मातः ! यूयं मम चिन्तां मा कुरुत । अहं मम जीवनसखेन प्रियेण कनकेन सह अस्मि । अहं तेन सह प्रेमविवाहं कृत्वा गृहप्रवेशं कृतवती ।

**सुमतिः-** पुत्रि ! एतत् सत्यम् अस्ति किम् ?

**रुचिरा-** मातः ! एतत् सत्यम् अस्ति । मम कृते चिन्तां मा कुरु । अहम् अनेन साकं रममाणा अस्मि ।

**सुमतिः-** त्वम् अस्मान् अस्माकं वर्णसंस्कारं च त्यक्त्वा असवर्णेन सह गतवती चेद् अस्माकं गृहे कदापि न आगच्छ । अस्माकं कृते त्वं मृता ।

**रुचिरा-** मातः ! तादृशं मा वद । मया तादृशं किं कृतम् ? केवलं मम भविष्यस्य निर्णयं कृत्वा जीवनसखो निश्चितः । तेन सह मोमुद्यते मम चेतः ।

**सुमती-** कुलाङ्गारे ! त्वम् अस्माकं परामर्शं विनैव असवर्णेन सह गतवती । त्वया कुलमर्यादा न विचारितश्चेद् अस्माभिः सह तव नैव सम्बन्धः । यौवनावस्थायां रोमाञ्चिता असि, कामवासनया अन्धायते तव दृष्टिः, अहं मन्ये पश्चात् तव जीवनं दुःखायते । वयं तु अस्मत्कृते त्वं मृता असि इति मन्यामहे । (चलद्भाषयन्त्रं त्यक्त्वा रोदिति ।)

**वासुदेवः-** (सुमते ! मा रुदिहि । पथभ्रष्टां तां प्रति त्वया यत् कथितं तत्



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

समीचीनम् । सा अस्माकं सामाजिकमर्यादां विहाय गतवती चेत् सा अद्यपर्यन्तमेव अस्माकम् आसीत् इति स्मरन् स्वयमेव आत्मानं सान्त्वयामः । चिता निर्जीवं दहति परं चिन्ता तु सजीवमेव दहति । शनैः शनैस्तां विस्मरामः । तस्मात् चिन्तां मा कुरु ।

(शोकसूचको ध्वनिश्श्रूयते, अपरस्मिन् प्रकोष्ठे गत्वा आगच्छति)

**सुमतिः-** त्वं तु पिता असि, मया नवमासपर्यन्तं स्वकुक्षौ स्थापयित्वा कियत् कष्टेन प्रसूता सा सहस्रदुग्धधाराभिः पालिता, पोषिता च । प्राप्ते च यौवने वासनया हता सा सर्वं विस्मृत्य सर्वाणि स्वर्णाभूषणानि समाहृत्य, लक्षरूपाणि च सङ्गृह्य गतवती । हंहो कष्टम् (रोदिति) । पुत्रि ! तं हेमकारं त्यक्त्वा आगच्छ, नो चेत् सर्वं विनाशाय जायते, विनाशाय जायते (रोदिति मुर्हुमुहुः हूहूहूँ, जवनिका पतति ।)

## सप्तमं दृश्यम्

(तदनन्तरं गृहकार्यादिना त्रीणि वर्षाणि व्यतीतानि ।)

**रुचिरा-** पूर्ववत् त्वम् अद्यापि सुरापानं कृत्वा आगतः ? अहं प्रतिदिनं उक्त्वा उक्त्वा नैराश्यं प्राप्तवती । मया एतावद् दिनपर्यन्तं प्रतीक्षितः । परं .. त्वं न शृणोसि ।

**कनकः-** (रौद्ररूपेण) रु...चि...रे ! अ.. धि..कं मा व.द । अहं सो..ढुं न..शक्नो.मि । अधिकं गदसि चेत्, त्वं ताड्यसे, त्वं हन्यसे । भोगिनि ! मां मम रोषं वा त्वं न जानासि ? मम रोषस्य परिणामः किं भवति त्वया न ज्ञायते नितम्बिनि !

**रुचिरा-** (सरौदेणैव) मया सह प्रतिदिनमेव 'सुरापानं न करोमि न करोमि' इति कथयसि । परम् अन्यदिने सुरां विना गृहम् आगन्तुं न शक्नोषि । तव व्यवहारो न समीचीनः । अखाद्यं भुक्त्वा गृहे समागत्य प्रतिदिनं वमसि । तव मुखं दुर्गन्धायते, शरीरं दुर्गन्धायते, मासपर्यन्तं स्नानं न करोषि । वस्त्राणि मलिनानि, गृहं दूषितवस्तुभिः दुर्गन्धायते, शूकरघोषं दुर्गन्धायते । हंहो कष्टम् ।

**कनकः-** मया यत् .. पीतं मम पित्रा... आर्जितं एव पीतम् । तव पित्रार्जितं तु नैव पीतम् । त्वं न जानासि किम् ?

**रुचिरा-** (क्रन्दन्ती) तव कृते मया मम पितृगृहं त्यक्तम् । मातापितरौ त्यक्तौ, भ्राता च त्यक्तः । ते अपि मां प्रति रुष्टाः सन्ति । यौवनान्धेन



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भोगकामया, बालबुद्ध्या च अहं त्वया सह विवाहं कृतवती । अधुना त्वम् इत्थं कथयसि चेत् मम जीवनं विनाशाय जायते, तवाग्रे अहं मरिष्यामि ।

**कनकः-** अरे वाचाले ! अधिकं मा वद ।

**रुचिरा-** विवाहात् पूर्वं तु त्वया मम प्रीत्यर्थं यत्किञ्चिदपि कार्यं करोमि इतिं कथितम् । अहं तव कथनं प्रति विश्वस्य त्वया सह आगतवती । परं त्वया अद्यपर्यन्तं एकः अपि पुत्रो न प्रदत्तः । किं मम शरीरं तव क्रीडार्थमेव केवलम् । महिष इव ममोपरि, मम कनकमयं शरीरोपरि रमसे दुष्ट !

**कनकः-** (सक्रोधं ताडयति) अधिकं मा वद, पिशाचिनि ! त्वमपि मम हृष्टं पुष्टं दृढतरं शरीरं च दृष्ट्वा क्रीडनाय समागता, दुर्बुद्धे ! मम शरीरेण त्वयापि आरात्रं क्रीडितम् । मम निद्रापि नष्टा कामिके ! वृषस्यन्ति !

**रुचिरा-** (क्रन्दन्ती) सर्वकारेण उभयोः कृते दत्तं एकलक्षमितं द्रव्यम् अपि नष्टं, मम वर्णोऽपि नष्टः, कुलम् अपि नष्टं, पितरौ त्यक्तौ । पतिश्च दुर्मतियुक्तः, सुरापायी, मांसाहारी चास्ति । शाकाहारिणी भूत्वा अपि अत्र महिषशूकरकुक्कुटादीनां मांसम् अहरहः पक्तव्यम्, मांसभाण्डानि मार्जयितव्यानि, हंहो कष्टम् !

**कनकः-** (ताडयति) त्वं तु अस्य गृहस्य परिचारिका असि । मम कृते भोग्या अपि असि । सर्वाणि गृहकृत्यानि त्वया न क्रियन्ते चेत् केन क्रियन्ते ? तव पित्रा ? कार्यं न क्रियते चेत् खाद्यं पेयं च न प्राप्नोषि । महाराज्ञि ! अधिकं वदसि चेत् त्वम् एकान्तवासं प्राप्स्यसि ।

**रुचिरा -** यदि पूर्वमेव इत्थं ज्ञातम् अभविष्यत्, तर्हि पितरौ प्रति छलं कृत्वा अहं न आगमिष्यम् । पवित्रं प्रेम कृत्वा, स्नेहेन पितृगृहं परित्यज्य तव गृहे समागता अहम् । अहं न जानामि स्म तव जीवनशैली कीदृशी आसीत् ? त्वं मादकपदार्थं विना स्थातुं न शक्नोसि । एतत् न उचितम् ।

**कनकः-** (सरोषम्) वाचाले ! मम कृते उचितं किम् ? अनुचितं किम् ? अहमेव जानामि । अहं तु जात्या एव मद्यमांसाधिकारी, न जानासि किम् ? (सरौद्रं ताडयति) अधिकं ब्रूषे चेद् घातयिष्यामि वृषलि !

**रुचिरा-** अद्य त्रीणि वर्षाणि व्यतीतानि । अद्यपर्यन्तं एका अपि सन्ततिः त्वया न प्रदत्ता । नार्या मातृहृदयस्य भावना त्वया न ज्ञाता । मे बहूनि दिनानि तव ताडनास्वीकारेण व्यतीतानि । अद्य कथय 'त्वं सुरां त्यजसि वा



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

माम् ?'

**कनकः-** वाचाले ! अभिसारिके ! अहं मम प्रियां सुरां कदापि त्यक्तुं न शक्नोमि। मद्यमांसादिकम् एव अस्माकं जीवनम्। परं त्वां तु सहसा एव त्यक्तुं शक्नोमि जानासि, कुलटे !

**रुचिरा-** (क्रन्दन्ती) इत्थं वदसि, एवं व्यवहरसि चेत् त्वया सह अहं क्षणमपि न तिष्ठामि। इयमेव परिस्थितिः समागच्छतीति पितरौ कथितवन्तौ आस्ताम्। बालबुद्धित्वात् कुलाङ्गारस्य ते न ज्ञातवती दौष्ट्यम्। हा हतास्मि। क्व गच्छामि, पितृकुलं नष्टं, यं पतिं मत्वा समागता स न पतिः, भोगलम्पटः, तेन यौनसुखाय अभिनयो विहितः, हंहो भ्रमो जातः। नष्टं जीवनम्, प्रतिष्ठापि नष्टा।

**कनकः-** (मदविह्वलः सन्) गच्छ गच्छ। यत्र गन्तुम् इच्छसि, गच्छ। त्वां कः अपि न अवरुणद्धि। एका गच्छति चेत् अनन्यपूर्वा अपरा आगच्छति दुष्टे ! (मदेन प्रमत्तो भूमौ एव शेते)।

**रुचिरा-** (क्रन्दन्ती) हंहो अभागिनि ! मात्रापि अहं सम्बोधिता, पित्रापि सम्बोधिता। 'मम हितकरं वाक्यं न स्वीकरोषि चेत् दुःखं प्राप्नोषि, अन्ते मरणाय जायसे' इति तैः कथितमासीत्। मम दुर्बुद्धित्वात् इदानीं सैव परिस्थितिः समागता।

**कनकः-** (सरौद्रम्) दुर्भगे ! त्वं गृहकृत्यानि सम्यक्तया सम्पादयितुं न शक्नोषि, शूकरादीनां कुक्कुटादीनां च पालनपोषणे, महिषाणां कृते घासादिकर्तनेऽपि तव क्षमता नास्ति। कुत्रापि तव शिल्पं नैव दृष्टम्। त्वं तु केवलं पुस्तकं पठसि, चलचित्रं पश्यसि, अतोऽस्य गृहस्य कृते न त्वं योग्या असि, अन्यं पुरुषं गच्छसि उत यमयात्रां करोषि चेत् न काऽपि चिन्ता, सामोदमन्या योग्या वधूरन्विष्यते।

**रुचिरा-** (रुदन्ती) अहं तव उत्पीडनं सोढुं न शक्नोमि, अतो गच्छामि। शब्देन त्वं, तव माता पिता च ताडयन्ति, व्यवहारेण मां मारयन्ति, (कनकः ताडयति) कथं तिष्ठामि अस्मिन् घोरनरके, अहमिन्द्रसदनं गच्छामि। भो भगवन् ! मां देवसदने नय। (रौति, प्रकाशो मन्दो जायते, रुदती इतस्ततः करोति)

**कनकः-** कुलटे ! गच्छ, गृहं परित्यज्य गच्छ। दुर्भगे ! अभिसारिके ! गच्छ, शीघ्रं गच्छ, एतादृशी भोगिनी नावश्यकता मत्कृते। गच्छ पापनि ! दुष्टे ! (परस्परं द्वन्द्वो जायते, परस्परं ताडयतः कनक आवेगमुद्रायां गृहाद् बलपूर्वकं बहिर्निष्कासयति। द्वारं पिनद्धि)



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**रुचिरा-** (रोदिति, विविधप्रकाशो दृश्यते, छायायां प्रकाशे च) मम पतिगृहगमनस्य सूचनां प्राप्य माता रुदितवती, पिता रुदितवान्, परन्तु मम मनसि 'महान् विजयो जातः' इति आसीत् । अधुना स्मरामि माता यत् कथितवती तदेव मम जीवने अभवत् । बालबुद्धौ समागत्य, भावनायाम्, उत्तेजनायां च समागत्य न कोऽपि निर्णयो विधेयः । (रोदिति, गच्छति, वियोगसूचकं वाद्यं गुञ्जति ।)

(जवनिका पतति ।)

(सा बहिः निःसृत्य धावन्ती सती कौशिकीनद्याः तटं प्राप्नोति । तत्र प्राप्य मातः ! गङ्गे ! मां स्वीकुरु इति कथयन्ती सती गङ्गाप्रवाहं प्रति स्वां पातयित्वा प्राणान् त्यक्तवती ।

## अष्टमं दृश्यम्

(अन्येद्युः कौशिक्याः तटे रुचिरायाः शवं दृष्ट्वा श्रुत्वा च ग्रामपालिकाध्यक्षः वडाध्यक्षः तथा अन्ये ग्रामीणा जनाश्च तत्र समुपस्थितवन्तः । परस्परं वार्तालापं च अकुर्वन् ।

**सागरः** विश्वकर्मा- केन कारणेन एतादृशी घटना घटिता ? भवद्भिः ज्ञायते किम् ?

**प्रमोदः शर्मा-** पारिवारिकं कारणम् एव भवितुम् अर्हतीति मया आशङ्क्यते ।

**दिवाकरः वर्मा-** आम् । विवाहानन्तरं सार्धद्विवत्सरपर्यन्तम् अस्याः कनकेन सह सुष्ठु मेलनं तथा एव समीचीन व्यवहारश्च आसीत् । तदनन्तरं परस्परम् अनयोरमेलो जातः इति श्रूयते स्म ।

**उषा श्रेष्ठः-** एषा रुचिरा स्वकीयं मातापित्रोः परिवारस्य स्वीकृतिं विनैव कनकेन सह गतवती । इयं ब्राह्मण-परिवारस्य पुत्री अस्ति परं कनकः स्वर्णकारस्य पुत्रोऽस्ति । एतौ यौवनकाले रूपयौवनेन शारीरिकाकर्षणेन च असवर्णविवाहं कृतवन्तौ आस्ताम् ।

**कृष्णः तामाङ-** सत्यम् । असवर्णविवाह एव अस्या घटनायाः कारणम् अस्ति इति मयापि स्वीक्रियते । कनकः प्रतिदिनमत्यधिकं सुरां पीत्वा गृहम् आगत्य पत्नीं ताडयति इति श्रूयते स्म । परं सा प्रेमविवाहस्य कारणेन स्वकीयां पीडां बहिरनेतुं नेच्छति स्म ।

**कलावती नेपाली-** आम् । 'मूषकस्य पुत्री मूषकाय एव' इति नैपालीयं कथनं साधु एव अस्ति । तस्माद् येन केनापि युवकेन युवत्या वा



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वपरिवारस्य सांस्कृतिकीं आर्थिकीं व्यावहरिकीं सामाजिकीं च स्थितिं स्ववर्णमर्यादां च अनुसृत्य एव विवाहः कार्य इति अहं मन्ये ।

**सागरः विश्वकर्मा-** सर्वकारः अन्तर्जातीयविवाहं प्रोत्साहयन् विधानमेव निर्माय पञ्चाशत्सहस्ररूप्यकाणि ददाति । भवन्तः इदं न जानन्ति किम् ?

**प्रमोद शर्मा-** सर्वकारस्तु तथाकथितानां नेतॄणां सङ्घटनम् अस्ति । येन केन प्रकारेण मतम् आकृष्य सैद्धान्तिकरूपेण विधानं निर्माति । तत् तु सिद्धान्तमात्रम् । परं समाजे परम्परायाः संस्कृत्याः रीत्याः सामाजिकमर्यादायाश्च अनुसारेण व्यवहारः प्रचलति ।

**दिवाकरः वर्मा-** सत्यमेतत् । युवानो यौवनकाले यौनमदेन मत्ताः सन्तो दूरतरं भविष्यजीवनं प्रति न विचारयन्ति । मांसलरूपलावण्येन आकृष्य पारिवारिकीं सामाजिकीं स्थितिञ्च त्यक्त्वा शारीरिकं प्रेमव्यवहारं कुर्वन्ति । तस्माद् एतादृशी स्थितिः उत्पद्यते ।

**उषा श्रेष्ठ-** रुचिरायाः विवाहं प्रति तस्याः मातृपक्षः चिन्तितो दुःखितश्च आसीत् । ते तु 'अस्माकं सामाजिकमर्यादां धूलिसात्कृत्य गच्छसि चेत् तव मुखं न पश्यामः' इत्युक्त्वा तां त्यक्तवन्तः ।

**कृष्णः तामाङ-** सत्यम् । विवाहानन्तरं सा एकवारम् अपि मातृपितृगृहं गन्तुं नाशक्नोत् । अन्त्ये कनकस्य ताडनानन्तरं तत्र कथं गच्छेत् । तस्माद् गङ्गायां स्वयमेव पतिता ।

**कलावती नेपाली -** अस्माकं समाजे अन्तर्जातीयविवाहस्तु एकप्रतिशतमपि सफलो न दृश्यते ।

**सागर विश्वकर्मा-** एषोऽतीव खेदजन्यो विषयः । अस्माकं ग्रामपालिकाक्षेत्रे द्विवर्षाभ्यन्तरमेव अन्तरजातीयविवाहस्य कारणेन त्रयाणां पुरुषाणां तथा चतसृणां चं नारीणां जीवनस्य दुःखदायकं अन्त्यम् अभूत् ।

**कलावती नेपाली-** एष शोचनीयो विषयः । अतः परं स्थानीयसर्वकारेण अस्माकं नीतिशास्त्रं सामाजिकपरम्परां विविधसांस्कृतिकव्यवहारं तथा सामाजिकमर्यादां च समावेश्य शिक्षानीतेः पाठ्यक्रमस्य च निर्माणं कृत्वा विद्यालयेषु पाठयितुम् आवश्यकं मन्ये अहं तु ।

**सागरः विश्वकर्मा-** भवत्याः कथनं समीचीनम् । ग्रामपालिकायाः आगामिनि परिषदि एतद् विविच्य निर्णीयते । न भवति किम् ?

**सर्वे जनाः** एकस्वरेण वदन्ति- समीचीनम् । समीचीनम् । (पटाक्षेपः)


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

# नेपालैकीकरणम्

प्रा. डा. विष्णुप्रसाददेवकोटा

## प्रथमं दृश्यम्

स्थानम्- गोरखाजनपदस्य कैलासकूटभवनं तत्परिसरश्च

पात्राणि- गोरखनाथः, पृथ्वीनारायणसाहः, नरभूपालसाहः, चन्द्रप्रभा, कौशल्यावती, पृथ्वीबालसखा च ।

**नरभूपालः-** (विषादमुद्रायाम्) हा कष्टम् ! आजीवनं कृतेऽपि प्रयासे नव्यकूटविजयोऽसम्भव एव सञ्जातः । मम तज्जयप्रयासो देशैकीकरणप्रयासश्च स्वप्नायित एव । मया पुण्यकर्माणि च समाचरितानि कुलदेवाः कुलदेव्यश्च समाराधिता एव । तथापि मम देशैकीकरणक्रिया स्वप्नायितैव ।

**चन्द्रप्रभा-** किमर्थं खिद्यसे आर्यपुत्र ! खेदवचनञ्च किमर्थं ब्रवीषि । प्रयासान्तराणि विधेयानि, देवार्चनानि अपि विधेयानि एव । कुलदेवी कालिकापि आराधनीयैव । तज्जपानां पुरश्चरणानि पूर्णानि । पौनःपुन्येन समनुष्ठितान्येव । अस्माकं मित्राणि सन्ति सहयोगीनि ।

**नरभूपालः-** कानि सन्ति मित्राणि भो ! किन्ते कर्तुं पारयन्ते भो !

**चन्द्रप्रभा-** मम पिता भ्राता चास्माकं साहाय्यमाचरिष्यन्त एव । कतिपयप्रयासानां विफलतायामपि त्रितुङ्ग-नव्यकूटादीनां विजयः करतलगो भविष्यत्येवेति विषादं परिहर राजन् ! शक्तिश्च वर्धनीया सेनादीनाम् ।

**कौशल्यावती-** (राजानमाश्वासयन्ती कथयति) आर्यपुत्र ! भवतां तद्विजयप्रयासः फलिष्यत्येव । भवतां प्रारम्भः प्रयासश्च तद्विजये कारणं भविष्यत्येव । अस्माकं पुत्राः पराक्रमिणो जाता जनिष्यन्तश्च वर्तन्ते ।

**नरभूपालः-** किं पराक्रमशीलाः सन्ति पुत्राः !

**कौशल्यावती-** भवज्ज्येष्ठपुत्रः पृथ्वीनारायणो महान् पराक्रमी, मनस्वी, तथ्यवेत्ता तथ्यानुष्ठाता च भविष्यति इति मे विश्वासः । इदानीं तदभावेऽपि ते तवेच्छां पूरयिष्यन्त्येव । वीरुधश्चिक्कणपत्राः सन्ति । तेऽवश्यमेव फलिन्यो भविष्यन्ति ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**चन्द्रप्रभा-** आम्, अहमपि तान् तादृशानेव मन्ये । अस्माभिस्तत्र कार्ये प्रयासा निरन्तरं कार्या एव । तत्र अस्माकम् असाफल्येऽपि पुत्रा अस्माकं सन्त्येव । तत्रापि भावत्को ज्येष्ठः पुत्रः पृथ्वीनारायणः कौशल्याकथनवद्वीरो मनस्वी पराक्रमी पित्राज्ञापालकश्च वर्तते ।

**कौशल्यावती-** अथ च तत्र अस्माकं सदुपदेशास्तस्य कृते स्युः । सः अवश्यमपि युवावस्थायामेव विजेता देशैकीकर्ता च भविष्यतीति मन्ये । विजयप्रयाससम्बद्धा अस्मदनुभवाः तस्मै देया अस्माभिः ।

**नरभूपालः-** मम तत्प्रयासा वृद्धतां नैयून्यञ्च गताः । मम कलेवरं शक्तिश्च शिथिलायेते, मत्कर्तृकस्तद्विजयो दूरे तिष्ठति । अथापि 'आत्मवज्जायते पुत्रः' इति शास्त्रोक्तिः प्राप्यते । मत्सहितभवतीनामेकीकरणोपदेशेन तन्मातुलस्य प्राशासनिकप्रशिक्षणेन च स देशस्यैकीकर्ता भविष्यतीत्यहमपि मन्ये ।

**चन्द्रप्रभा-** मद्भ्रातृकराजनीतिकप्रशिक्षणं प्रशासनप्रशिक्षणञ्च स प्राप्स्यत्येव । तथा सति कथं भवदुद्देश्यं निष्फलं स्यात् । एकीकरणं जनताया देशस्य च हितं कार्यमिति सुसम्भवं तत् ।

**कौशल्यावती-** यद्यपि नाहमायोध्यकी कौशल्या, तथापि ममापि स्तन्यधारा अमृतायिता वीरवर्धिन्येव वर्तते इति विश्वसिम्यहम् । अनेकताशूर्पणखां देशभेदकरावणञ्च मम स्तनन्धयो हनिष्यत्येवेति मम विश्वासः ।

**कौशल्यावती-** ममापि विश्वासः । तत्र आर्यपुत्रेण विश्वासः करणीयः । पूर्वा असफलता चागामिनीं सफलतां जनयिष्यति । सदुद्देश्ये पितरि चाफलेऽपि पुत्रः फलवान् भविष्यतीति विचारयद्भिरग्रे गमनीयम् ।

(खेलनं त्यक्त्वा षट्सप्तवर्षदेशीयो बालो पृथ्वीनारायणो ज्येष्ठमातुः क्रोडे आगत्योपविशति ।)

**पृथ्वीनारायणः-** मातरौ कस्यैकीकरणस्य वार्ताम् आलपथः पित्रा सह ? किं भवत्यौ द्वे मम मातरौ एकीभवथः ? सत्ये एकीकरणे मह्यं का भक्तं पक्ष्यति ? का च मां क्रोडे निधाय विविधां कथां श्रावयिष्यति सदुपदेशाँश्चोपदेक्ष्यति ।

**चन्द्रप्रभा-** नहि नहि बाल ! देशस्यैकीकरणवार्ता कुर्मो वयम् । विचारेण


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मनसा च तव हितचिन्तने देशहितचिन्तने चावामेके एव। देशो जन्मभूमिर्भवति । तव जन्मभूर्नेपालः पूर्वं विशाल आसीत् । बृहत्तरो नेपालः क्षुद्रेण स्वार्थेन साधारणनृपाणां नृपतित्वबुभूषया चानेकतां नीतः । तस्यैकीकरणस्य वार्तां कुर्मो वयम् ।

**पृथ्वीनारायणः-** धर्मस्य संस्कारस्य संस्कृतेर्वेषभूषायाश्चैकत्वेऽपि कथमनेकीकरणं देशस्य मातः !

**चन्द्रप्रभा-** क्षुद्रस्वार्थेन महत्त्वाकाङ्क्षया चेतनाया राष्ट्रवादस्य चाभावेन पुत्र ! तेनैव कारणेनात्र स्वल्पेऽभूभागे द्वाविंशतिश्चतुर्विंशतिश्च राज्यानि विहितानि सन्ति । अस्यामवस्थायां तत्तद्राज्यानां विकासस्तु न भवत्येव निर्बलानि च तानि जातानि सन्ति ।

**नरभूपालः-** अस्यां स्थितौ विदेशिनामाक्रमणं सहजम्, अस्माकं पराधीनता च सहजेति तेषां राज्यान्तराणं चैकीकरणमावश्यकमिति तदभावेन वयं खिद्यामहे । विशेषतस्तव पिता एतज्जनिताधिना परिभूयते दुःख्यति च । एतज्जनितमेव पितुस्तव पीडाप्रदर्शनं पुत्र !

**कौशल्यावती-** मम नाम्नः सार्थक्यं विधातव्यमस्ति त्वया पुत्र ! कौशल्येयस्तवादर्शो भवेत् शत्रुजये । एदर्थमेव मम नामेदं रक्षितं भवेत् मत्पितृभ्याम् । साशयं भवति नामकरणमस्माकं सनातनधर्मवताम् । अन्वर्थं ममैतन्नाम । अर्थमनुधावति ।

**पृथ्वीनारायणः-** कौशल्येयः को भवति मातः !

**कौशल्या -** सा खलु आयोध्यकस्य दशदिग्विजेतुर्दशरथस्य प्रथमा पत्नी । तस्यापत्यं पुरुषोत्तमो रामः कौशल्येय उच्यते । स दाशरथिरित्यप्युच्यते । तात ! दशरथस्यापत्यं पुमान् स आसीत् । स हि स्वावियुक्तां सीतामानीतवान् भाजकं लोकरावणं रावणं हत्वा । आत्मना आयोध्यकैश्च सह तस्या एकीकरणं रामराज्यञ्च विहितवान् । तथैव त्वमपि कौशल्यापुत्रः कौशल्येयः अनेकतां निहत्य एकतां नेपालैकीकरणं वा करिष्यसीति । लक्ष्मणवत्तवसहकर्तारस्तव भ्रातरो भविष्यन्त्येव ।

**चन्द्रप्रभा-** पुत्र इदमपि तथ्यम् अवेहि स लोकरावणो रावण एकः सीतापहारकस्तद्विभाजकश्च । अत्र त्वेकताविभाजका अनेके सन्ति राजीयन्तः । परन्तु नारायणोऽसि त्वं रामवत् सर्वान् तान् जेष्यस्येव । गुरुदेवानुग्रहः सत्यबलं देशहितञ्च तव साहाय्यं


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

करिष्यन्ति तद्विजये ।

**कौशल्या-** अस्माकं कुलदेवत्वेन सम्मानितो गोरखनाथोऽपि गुरुरस्माकं सहाय्यं करिष्यति। योगसिद्धोऽसौ। अलौकिकनियोगबलसाधितानि सन्ति तेषां कार्याणि जनानां कृते । अस्माकं कृते कथं नाशीर्वदिष्यन्ति ते । तदाशीर्वादा अवश्यं भाविनस्तवैकीकरणे उद्‌बोधकानि भविष्यन्ति ।

**पृथ्वीनारायणः-** अहं खेलनाय गच्छामि मातः । वार्तामालपन्तु पित्रा सह भवत्यौ । मयि सति स्थूले सर्वं करिष्यामि ।

## द्वितीयं दृश्यम्

(कैलासकूटभवनपरिसरे एव खेलन् पृथ्वी गुहामुखं गच्छति । तत्र गुरुर्गोरखनाथः कृतसाधनश्श्रान्त इव गुहापीठिकायामुपविशन् दृश्यते ।)

**गोरखनाथः-** भो वत्सः कोऽसि त्वम् ? कस्य पुत्रः असि ? किं तव नाम ?

**पृथ्वीनारायणः-** योगिन्! क्रीडमान आगतः अहम् अन्यतमो बालकः। मम मित्राणि परत्र क्रीडन्ति सन्ति। क्रीडमानो घूणाक्षरन्यायेनाहमत्रागतवान्। मम पिता नरभूपालोऽत्रत्यो राजा । मम मातरौ च चन्द्रप्रभा, कौशल्येति वर्तेते ।

**गोरखनाथः-** एकस्य बालकस्य द्वे मातरौ कथं बाल ! सम्भवत्यप्येतत् ?

**पृथ्वी-** कथं न सम्भवति योगिन्! गणेशो द्वैमातुरः। श्रीमत्स्येन्द्रनाथोऽपि योगिराड् द्वैमातुरः । तस्य हि प्रथमा माता उदधिः, द्वितीया च धीवरपत्नी तत्प्राणदायिनी, स्तनपानकारयित्री च । तथैव जन्मना मम माता कौशल्यावती, शिक्षया गुणाधानेन मत्सेवया च चन्द्रप्रभा द्वितीया मे माता । मम मातरौ एकपतिके, मत्स्येन्द्रमातरौ च भिन्नपतिके इति तु तयोः पार्थक्यम् ।

**गोरखनाथः-** पटुतमोऽसि बाल ! बालेऽपि प्रौढं त्वयि ज्ञानम् । वाक्चातुर्यञ्च त्वयि वर्तते । क्रीडतु यथेच्छम् ।

**पृथ्वीनारायणः-** योगिन् भवतां गृहं नास्ति ? गार्हस्थ्यं न तव ? गावो महिष्यश्च न सन्ति ? एकाकी एवात्र गुहायां निवसति ? इदानीं श्रान्त इव गुहामुखं शोभयते किमर्थम् ?

**गोरखनाथः-** सत्यं वत्स ! अहं योगी अस्मि । योगिनां मम च गृहाणि न भवन्ति । असति गृहे कथं गावो महिष्यश्च पालिताः स्युः । अहं


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

योगसाधनां विधाय श्रान्त एवात्र गुहामुखे उपविशन् शुद्धस्य सुगन्धिनश्च वायोरुपयोगं कृत्वा श्रममपनयामि ।

**पृथ्वीनारायणः-** गवामभावे गव्यान्यपि न स्युः । दुग्धस्य दध्नश्च पिपासा बुभुक्षा वा न भवति ?

**गोरक्षः-** भवति वत्स, परं मत्कृते को दास्यति, समानेष्यति च सदैव गव्यानि ?

**पृथ्वीनारायणः-** अहमानेष्यामि गुरो, किं किमानेयं मया योगिन् ?

**गोरखनाथः -** दधिमात्रमानय बाल ! योगसाधनया शुष्कशरीरश्शुष्कमुखश्चाहं दधि पातुमिच्छामि । शक्नोषि समानेतुं त्वद्गृहात् ?

**पृथ्वीनारायणः-** कथं न शक्नोमि योगिन्, क्षणं प्रतीक्षस्व । (ततो गुहामुखान्निवर्तते पृथ्वी गृहञ्च गच्छति ।)

## तृतीयं दृश्यम्

**पृथ्वी-** (मातरं चन्द्रप्रभां दृष्ट्वा ससम्भ्रमम्) मातः ! अधोगुहायामेको योगी वसति । क्रीडमानः अहं तद्गुहामुखं प्राप्तवान् । तत्र गुहामुखस्य पीठिकायां वसन् स शीतलं वायुं सेवते । मां पृच्छति स्म 'त्वं कस्य पुत्रोऽसीति' । अहमुक्तवान् मत्परिचयम् । ततो मां परिचितमिव व्यवहरति स्म सः ।

**चन्द्रप्रभा-** ततो योगिना किमुक्तं बाल !

**पृथ्वी-** योगसाधनया श्रान्तः तृषितश्च दधि कामयते, दधि पातुमिच्छति। सकृतयोगसाधनश्चिराद् पानीयपानाभावेन शुष्कमुखो विशेषतो दधि पातुमिच्छतीत्यहमनुमिनोमि । मह्यं मातर्देहि क्षिप्रं दधि । त्वरया तत्तस्मै प्रापयाम्यहम् ।

**चन्द्रप्रभा-** योगर्षिर्दुग्धं नेच्छति बाल !

**पृथ्वी-** न हि मातः, ते हि निर्लोभाः प्रतीयन्तेऽसंग्रहिणश्च । यत्काम्यतेऽर्थ्यते वा तदेव पूर्वं देयम् । तदर्थं नवीनमेकरात्रं स्वादु सान्द्रञ्च दधि देयं मातः ।

**चन्द्रप्रभा-** काष्ठीसु काष्ठिकासु च दधीनि रचितानि सन्ति । कतमां काष्ठीं काष्ठिकां वा नयसि बाल !

(मध्ये एव कौशिल्यावती वदति)

**कौशल्या-** काष्ठी दधिसहिता गुर्वी भवति, तत्पात्रं नोच्चालयितुं शक्नोति



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बालः । अतोऽन्या काष्ठिका (लघुदधिपात्रं) देया ज्येष्ठभगिनि !

**चन्द्रप्रभा-** शोभनं कथितम् । काष्ठी स्वयमेव गुर्वी वर्तते, तत्रत्येन दध्ना गुर्वीतरा भविष्यतीति काष्ठिकैव प्रेष्या । तत्र रचितं दधि स्वादु एकरात्रमनम्लञ्चास्तीति सैव प्रेष्या गुरवे सिद्धाय ।

**कौशल्यावती-** इमां दधिकाष्ठिकां नय पुत्र ! योगर्षये । श्रद्धया नम्रीभूय च योगिराजे समर्पय, तदादेशञ्च परिपालय । सो हि गुरुरस्माकं अनुग्रहीता च ।

(ततो मातुरादेशानुसारेण दधिकाष्ठिकां वहन् गच्छति पृथ्वीनारयणो योगिराजम् ।)

## चतुर्थं दृश्यम्

**पृथ्वीनारायणः-** योगिन् ! आनीतवानस्मि दधि । गृहाण एतद्दधिपात्रम् । (सायासं दधिपात्रमुच्चालयन् योगिहस्तयोः समर्पयति । योगी च सहसर्षं तत्गृह्णाति प्रसन्नया मुद्रया । योगी पत्रपुटकहस्तो वर्तते । तृषार्तः स पत्रपुटके दधि सुसार्य पिबति ।)

**गोरखनाथः-** अतीव मिष्टं दधि वत्स । त्वदर्थं धन्यवादा वितीर्यन्ते । सत्यवादी आज्ञापालकः श्रमशीलश्च त्वं वर्तसे । भवतु निरन्तरं कल्याणं ते ।

**पृथ्वी-** योगिन् दधिपानपात्राणि न सन्ति तव , तान्यपि आनेयानि मया मद्गृहात् ?

**गोरखनाथः-** नहि नहि बाल । एतादृश्येवाकिञ्चनस्थितिः भवत्यस्माकं योगिनाम् । ते पात्रादीनां संग्रहं न कुर्वन्ति, करपात्रा एव ते भवन्ति प्रायेण । तत्रापि पत्रपुटकादीनि तु सन्त्येव मम पार्श्वे । तेषामुपयोगं करोमि तद्रचयामि च । भवतां पानपात्रापेक्षयाप्यन्यानि सुन्दराणि च भवन्ति पत्रपात्राणि मत्प्रासादे विशेषेण पर्वसु दृश्यन्ते तानि । सुन्दराणि भवतापि प्रयोगे आनेतव्यानि किं खोचिकया ?

**पृथ्वीनारायणः-** पत्राणि तु अरण्ये प्राप्यन्ते एव, हरितानि पत्राणि पवित्राणि सुन्दराणि च भवन्ति । तेषां प्रयोगो विधातव्यः ।

**गोरखनाथः-** सत्यं कथितं बाल । नेपालोऽयमस्माकं देशः प्रकृत्या रमणीयस्तदालयश्च । अत्रत्या गृहिण्यो रमण्यश्च प्रायेण


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पत्रभाजनानि रचयन्ति। प्रकृतदधिपानपात्रं तु मया तृणप्रयोगेण संयोजितं कार्यनिर्वाहकतया। इदं खलु पत्रभाजनं पवित्रं भवति, प्रयुज्य च स्फालयितुं शक्यते। एतद्योगिनां कृतेऽत्युपयोगि भवति इति मया तत्प्रयुक्तं बाल।

**पृथ्वी-** मन्मातरोऽपि शक्नुवन्ति पत्रभाजनानि भवदुक्तानि रचयितुम्?

**गोरखनाथः-** कथं न? ता एव न, अपि तु नेपाले प्रायेण सर्वोऽपि नारीवर्गः पत्रभाजनानि बहुविधानि रचयति, नान्यत्रैषां रचना भवति। पत्रभाजनानां प्रकाराश्च न दृश्यन्ते तत्र बाल!

**पृथ्वी-** पत्रभाजनप्रकाराः के भवन्ति योगिन्?

**गोरखनाथः-** इयं खलु पत्रस्य खोचिका वर्तते मत्प्रयुक्ता (हस्तेनोद्धृत्य दर्शयति) इमां खलु त्वमपि रचयितुं शक्नोषि। (तद्रचनाप्रकारं सारल्येन प्रदर्शयति पृथ्वीम्)।

**पृथ्वीनारायणः-** अन्ये के प्रकाराः पत्रभाजनस्य योगिन्?

**गोरखनाथः-** खोरिका, द्रोणिका, बृहत्तरम् (बोहोता), लपेसाख्यम्, टप्परिका, वरणटप्परिका इत्येवमादीनि पत्रभाजनानि, विभिन्नप्रयोजनानि अत्रास्माकं देशे विरच्यन्ते प्रयुज्यन्ते च बाल! पत्रभाजनानामिमे प्रकारा विश्वस्मिन् विश्वे न प्राप्यन्ते। अछिद्रका पानीयपातरहिताश्चेमे विरच्यन्ते बाल! तरलपदार्थो दुग्धादिकञ्च न श्च्योतति एभ्यः। अतः असाधारणस्तव देशः अयमनादितः। विकासनीयोऽयं तव देशो व्यवस्थापनीयश्च। अत्र सचेतास्त्वं भवेः।

**पृथ्वी-** एवं योगिन्! अथ च केषां पत्रैर्भाजनानीमानि निर्मीयन्ते गुरवः!

**गोरखनाथः-** उक्ताः प्रकाराः प्रायेण सालपत्रैरेव विरच्यन्ते बाल! सालवनं सालतरवश्च मेध्यानां दारूणां समिधाञ्च स्रोतांसि भवन्ति बाल! अस्य काष्ठानि समिधात्वेन प्रयुज्यन्ते। मण्डपनिर्माणादौ गृहनिर्माणादौ च विविधरूपेण च तानि प्रयुज्यन्ते। सालवृक्षस्याधिक्यमत्र देशे इति पवित्रतमोऽयं तव देशः।

(ततः हस्तस्थिते जुष्टे पत्रपुटके काष्ठिकास्थं दधि सुसार्य पृथ्वीनारायणाय पातुं प्रददाति गोरखनाथः)।

**पृथ्वीनारायणः-** नाहं गृह्णामि। अहं ओदनेन सह पृथक् च दधि भक्षितवान्। एतत्सम्पूर्णं दधि भवतः कृते आनीतवाँश्चास्मि योगिन्! नाहं पिबामि।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**गोरखनाथः-** (पृथ्वीनारायणस्य हितं चिन्तयन्) दधि पिब बाल ! पिब । (बलाद् दधि पाययितुं बालं प्रयतते । परं स हस्ताभ्यां नुदति तत्पात्रम् । अत्र प्रसङ्गे दधिपात्रं प्रणुन्नं भवति । ततो दधि दधिपात्रात् पतति । तद्धि पृथ्वीनारायणस्य पादयोः पतति समधिकम् ।)

**पृथ्वीनारायणः-** क्षम्यताम् भो गुरुर्गोरख ! क्षम्यताम् भो !

**गोरखनाथः-** त्वया यदि दधि पीतं स्यात् तर्हि सर्वापि भूस्तवाधीना स्यात्, चरणयोः पतितमिति त्वया हिण्डितं भूस्थलमेव तवाधीनं भविष्यति ।

(पृथ्वी आश्चर्येण गोरखनाथं पश्यति, जवनिका पतति ।)



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

# गोरखकृपादृष्टिः

प्रा. डा. विष्णुप्रसाददेवकोटा

## प्रथमं दृश्यम्

स्थानम्- कुन्छानगरं रागनाशस्थलञ्च । समयः- मध्याह्नः

**पात्राणि-** (राज्ञी वसन्तावती,चम्पावती च । नरपतिसाहः, द्रव्यसाहः, गोपः, कृष्णबहादुरः, घासकर्तारौ मोहनसोहनौ च ।

**वसन्तावती-** पुत्रा ! यूयमिदानीं युवानः कार्यकुशलाश्च संवृत्ताः । युष्मत्पितुर्यशोब्रह्मसाहस्य स्वर्गमनानन्तरं दुःखेनाहं राज्यमिदं रक्षन्ती वर्ते । चम्पावत्यापि यः सहयोगः कृतः स स्तुत्य एव । परन्तु राज्यसञ्चालनेऽनेकाः समस्याः प्रादुर्भवन्ति, तत्र दायित्वं केनापि ग्रहणीयं भवति । यदा कदा युष्माकं कार्यसञ्चालने वैमत्यमपि दृश्यते । अतो दायित्वसम्पादनार्थं तन्निर्वाहार्थं प्रशासन-सौकर्यार्थञ्च राज्यस्य स्थलविशेषाणां दायित्वं युष्मभ्यो दातुमिच्छाम्यहम् ।

**नरहरिसाहः-** किं राज्यमेव भज्यतेऽस्माकं कृते भवत्या मातः, कार्यभारो वा समर्प्यतेऽस्मासु ?

**वसन्तावती-** राज्यमन्यपित्रंशवन्न विभज्यते पुत्र ! सुव्यवस्थायै दायित्वबोधार्थमपि कार्याण्येव विभज्यमानानि सन्तीदानीम् ।

**नरहरिसाहः-** कया रीत्या कार्यभारो विभक्तो मातः ? किमस्माभिः श्रोतुं शक्यते ? मया ज्येष्ठपुत्रेणैकाकिना त्वत्सहयुक्तेन न शक्यते कार्यभारो वोढुम् ?

**वसन्तावती-** कथं न श्रोतुं शक्यते पुत्र ! शृणुध्वं यूयम् । त्वं ज्येष्ठपुत्रोऽनुभवी च इत्यत्रैवोषित्वा मां सहकरिष्यसि राज्यसञ्चालने । नरपतिसाहश्च पुस्तूनकूछस्य दायित्वं सम्पादयिष्यति इति मे विचारणा ।

**नरपतिसाहः-** अहमप्यत्रैव वत्स्यामि मातः ! दुर्गमे निर्धने च पुस्तूनखण्डे किमहं करिष्यामि गत्वा स यत्र राज्यश्रीस्तत्रैव वसनमहं कामये । अहमग्रजस्य साहय्ययमाचरिष्यामि मनोयोगेन ।

**वसन्तावती-** नहि नहि पुत्र ? मया या व्यवस्था कृता विचारपूर्वकमेव कृता, सानुसरणीया सर्वैः । राज्यस्य तत्तत्स्थलस्य चावश्यकतानुसारेण केनापि नियुक्तेन कार्यं करणीयम्, न तु नियुक्तस्य नियोज्यस्य वावश्यकतानुसारेण स्थलानि पदानि वा निर्धारणीयानि भवन्ति ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तत्र कार्येषु क्रियमाणेषु कठिनत्वेऽसहजत्वे वा पश्चाद्विचारो भविष्यति । तत्र नियुक्तस्त्वं गच्छ तत्रैवेदानीम् ।

**नरपतिसाहः-** मध्यमपुत्रः पित्रोरप्रियो भवतीति रुच्यते तत् सत्यं विभावयामि इदानीम् । किं करोमि वराकः अहं गच्छाम्येव तत्र ।

**द्रव्यसाहः-** मम भागो न वर्तते मातः ! मम कृते दायित्वं देयं न वर्तते ? किं कनिष्ठ इति कार्याणां करणे अपि कनिष्ठोऽस्मीति मम भाग एव नास्ति ?

**वसन्तावती-** वर्तत एव पुत्र ! कथं दायित्वहीनस्त्वं कनिष्ठपुत्रो भविष्यसि । त्वं शरीरेण बलिष्ठो वचनैश्च मिष्टभाषणो राज्यं सञ्चालयितुं न शक्नोषीति त्वं गोपालो गोष्ठालयश्च सन् अस्माकं राज्यस्य पूर्वोत्तरक्षेत्रे रागनाशे (राइनासस्थले) वस्तुं योग्यः । तत्स्थानं लिगलिगकूटस्य समीपस्थानमिति तत्परचक्रितः सुरक्षणीयमपि वर्तत इति तत्कर्तुमपि योग्यस्त्वं तत्र गच्छ ।

**द्रव्यसाहः-** रागनाशस्थले न कापि समस्या दृश्यते, किं तत्र करिष्यामि मातः ?

**वसन्तावती-** कार्यान्तरमपि तत्र त्वत्कृते वर्तते कनीयः, तच्च त्वदतिरिक्तेन भ्रात्रा नानुष्ठातुं शक्यमिति वस्तुस्थितिरिति मन्मनीषा । प्रकृते च निर्णये इदमेव कारणम् ।

**द्रव्यसाहः-** किं तत्कार्यान्तरममनन्यसाध्यं मातः !

**वसन्तावती-** गोपालनकर्म पुत्र ! तत्कर्मणि बलिष्ठस्य उपरितोऽवरतश्च हिण्डनकुशलस्य कृषिकर्मविदश्च आवश्यकता भवति पुत्र ! तुभ्यं रोचते कृषिकर्म गोपालनञ्चेत्यहं जानामि । अत्र कुन्छानगर्यामपि त्वं वेशन्तगमनागमने इच्छसि स्मः । ग्रामवेशन्तकरणं तुभ्यं रोचतेतराम् । अतः शाका, फलानि, कृषिजान्यन्यानि वस्तूनि त्वमानयसि यदा कदा हर्षेण इति त्वद्वैशिष्ट्यम् अहं जानामि । तत्र मनोयोगेन कार्यं करिष्यसि तत्र साफल्यञ्चाधिगमिष्यसि । तत्र तवोदयो भविष्यति । योग्याय योग्यं दातव्यमिति नियोगसिद्धान्त इति तथा कृतं मया ।

**द्रव्यसाहः-** शोभनं मातः, यदाज्ञापयसि तत्करोम्येव । मां गुरवः पाठयन्ति स्म, तत्स्मरामीदानीम् । 'उद्योगेन हि सिद्ध्यन्ति कार्याणि न मनोरथैः । न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ॥' इति । श्रमेणेशमानितया च प्रत्तं दायित्वं पूरयिष्यामि मातः ! (इतिराज्ञीं मातरं स्वस्वीकारं श्रावयित्वा निजां मातरं चम्पावतीं द्रष्टुं गच्छति



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स तथ्यमवगमयितुञ्च । माता स्वकीये प्रकोष्ठे रामायणं पठन्ती वर्तते । तस्याश्चरणौ प्रणमति शिरसा द्रव्यसाहः) ।

**चम्पावती-** पुत्र ! कास्ति वार्ता ? अस्माकं लम्बयुग्मराज्यस्य तत्तत्स्थलानां कृतेऽधिकारिणो नियुक्ता इति ज्ञायते किं तत्सत्यमस्ति ? कः कुत्र नियुक्तो राज्ञ्या ?

**द्रव्यसाहः-** सत्यं श्रुतं त्वया मातः ! अनौपचारिके वार्ताप्रसङ्गे तवापि सहभागिता भवेदित्यहं मन्ये । ज्येष्ठभ्रातुः कृतेऽत्रैव स्थापनमभूत्। मातुर्ज्येष्ठायाः सः साहाय्यं करिष्यति अमात्यत्वेन । मध्यमभ्राता पुस्तूनकूटे नियुक्तोऽस्ति । स तत्रत्यां विकृतिं निरस्यन् व्यवस्थां स्थापयिष्यति। अहञ्च रागनाशकूटे चम्पावतीनदीपरिसरे प्रामुख्येन गोपालनं करिष्यामि गौणत्वेन चास्मद्राज्यस्य पूर्वोत्तरसीमां रक्षिष्यामि । इदमेव निर्देशनं मत्कृते राज्ञ्या ज्येष्ठमातुर्वर्तते । किं करोमि मातः ? किं श्रेयस्करं मत्कृते प्रतिभाति तुभ्यम् ?

**चम्पावती-** निर्धारितं तत्कार्यं तुभ्यं रोचते ? तत्र मनो लगति ? अथवा कुण्ठां रक्षन् वर्तसे ?

**द्रव्यसाहः-** मातृभिर्व्यवस्थापितं कार्यं रोचनीयमेव । अरुचौ किं प्राप्स्यामि मम मनोऽपि तत्र लगत्येव । गोसेवनं चम्पासरिज्जलसेवनञ्च तत्र सुसम्भवमिति चापरो लाभः । श्रद्धया नैरन्तर्येण श्रमः करणीय इति मे विश्वासः ।

**चम्पावती-** निर्धारितकार्ये मनो लगति, कुण्ठा च नानुभूयते चेद् गन्तव्यं त्वया तदर्थम् । योग्यता निर्दिष्टकार्ये प्रदर्शनीया । तव मनः सुमनोमयं स्यात्, मार्गश्च स्यात् सुमनोमयः । गोगण्डकीसेवनं तवाहर्निशं फलितं स्यात् । तावत्कृतानि कार्याणि फलितानि स्युर्राज्यवर्धकानि च । देवगुरूणामातिथ्यं सत्कारश्च नोपेक्ष्यस्तत्रापि । एवं सदा तवोदयः स्यादिति सन्त्याशीर्वादाः ।

**द्रव्यसाहः-** मातस्त्वमपि गोसेवनं नदीस्नानञ्च सुलभं स्यादिति धिया मया गोष्ठालयेन सह गच्छसि चेत् चल । अहं राजप्रासादसुलभसेवया तत्रापि रक्षिष्यामि त्वाम् । तव पादपीडनं करिष्यामि । दुग्धानां दधीनां घृतानाञ्च प्राचुर्यं भविष्यति त्वत्कृते तत्र ।

**चम्पावती-** नहि नहि पुत्र । राजमहिष्यास्तत्र वसनमुपयुक्तं न भविष्यति । त्वं तत्र गच्छ निर्धारितकार्याणि कर्तुम् । यदाकदा राजप्रासादे दध्यादीन्यादायास्मद्दर्शनाय आगन्तव्यं त्वया। राज्ञीं द्रष्टुं तत्रत्यां स्थितिं



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तामवगमयितुञ्च समागच्छेः । चम्पासरित्परिसरगमनेच्छामवगन्तुं त्वयाहं पृष्टा तदर्थं त्वां धन्यं वदामि । तद्द्वारा मम सम्मानं कृतं मम मातृमर्यादा च रक्षिता प्रसीदाम्यहम् । गच्छ साफल्यं ते भूयात् । तव गमनेन राज्ञ्या समादेशपालनं देशहितञ्च भविष्यतीति मे विश्वासः।

(ततः स्वमातरं प्रणम्य विदापनाय वसन्तावतीं ज्येष्ठभ्रातरञ्च द्रष्टुं गच्छति द्रव्यसाहस्तदीर्यप्रकोष्ठम् ।)

**माता ज्येष्ठभ्राता च-** तत्र गोष्ठे वसनाशनयोः व्यवस्था विहिता अस्माभिः । गच्छ तत्र । तत्र नैयून्ये सौविध्याय सूचनीयम् । तत् पूरयिष्यामो वयम् ।

(इति कथयित्वा विसर्जयतस्तौ तम् । स च तौ प्रणम्य सहर्षं सोत्साहञ्च प्रतिष्ठते, गोष्ठञ्च प्राप्नोति सेवकैरन्यैः सह ।)

## द्वितीयं दृश्यम्

**गोपःकृष्णः-** स्वामिन् गावः वत्साः वत्सतराश्च भूयांसः सन्ति । के कुत्र रक्षणीया बन्धनीयाश्चेदानीमेव त्वयापि व्यवस्थाकरणीयाः । गोषु चागतेषु वत्सेषु वत्सरेषु च कूर्दमानेषु चेतस्ततो जटिलं तन्नियन्त्रणं भविष्यति ।

**द्रव्यसाहः-** अस्माकमावासस्तलद्वयकोऽस्ति । तत्रोपरितनतले वयं वत्स्यामः कोष्ठानि विभज्य । भौमे तले वत्सा वत्सतराश्च खण्डं विभज्यावरोधनीयाः । परत्र लम्बे विशाले च पर्णगोष्ठे गावो रक्षणीया इति मे मानसी व्यवस्था किमियमुपयुक्ता ? चिन्तयत यूयमपि ।

**कृष्णबहादुरः-** शोभनं चिन्तनम् । शोभना च मानसिकी त्वत्कृता गवामवरोधव्यवस्था। तथैव करणीयं स्वामिन् । कालान्तरेऽस्या व्यवस्थाया अनुपयुक्तत्वे सिद्धे विकल्पान्तरं रचयिष्यामः ।

**द्रव्यसाहः-** मोहनसोहनौ गवामवरोधानन्तरं तेभ्यो घासान् वितरताम् । पयस्वतीभ्यो गोभ्यः कोमलान् सरसाँश्च घासान् दत्ताम् । अन्येभ्यश्च गोवृषभेभ्यो यथायोग्यं घासान् पलालानि च दत्ताम् । स्तनन्धया वत्सा दाम्ना न बन्धनीयाः । कोष्ठावरोध एव तेषां कृतः स्यात् । कोमलाः घासा वत्सेभ्योऽपि दीयताम् ।

(एवं क्रमेण गोष्ठस्य सञ्चालनं गवामभिवर्धनं राज्यान्तरादागन्तुकानां निरीक्षणपरीक्षणादिकञ्च चलति स्म)


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**कृष्णः-** स्वामिन् ! गावः कोमलान् घासान् चरन्ति, चम्पावत्याः स्वच्छं जलं पिबन्ति। एता मासानन्तरमेव स्थूलायितास्तैललिम्पिता इव चिक्कणाश्च दृश्यन्ते । आसां दुग्धवृद्धिश्च जायते । वत्सा वत्सतराश्च स्थूलकाया विभान्ति उत्कुर्वते च । इदानीं दुग्धदधिसञ्चयो घृतसञ्चयश्च जातः। प्रतीक्षते प्रासादो दुग्धघृतादिकं । अतस्तत्सर्वं प्रासादे प्रापणमुपयुक्तं प्रतिभाति मह्यम् । मत्परिवारेण मम साक्षात्कारोऽपि भवतीति सर्वं गव्यमूढ्वाहं गन्तुमिच्छामि श्वो युवराज !

**द्रव्यसाहः-** उपयुक्तः प्रस्तावः । गोचारणादिकं व्यवस्थाप्य पयोदधिघृतान्यूढ्वा त्वं गन्तुमर्हसि । गमनस्य परस्मिन् दिने समय एव आगन्तासि । (ततो कृष्णबहादुरो दुग्धघृतदधिचयान् धृत्वा प्रासादं प्रस्थितवान् ।)

## तृतीयं दृश्यम्

(कृष्णबहादुरः प्राप्तवाँश्च राजप्रासादं घण्टाचतुष्टयेन । दध्युपायनसमेतं कृष्णं दृष्ट्वा वसन्तावती प्रफुल्ला भवति ।)

**वसन्तावती-** भो कृष्ण ! कदा आगतः असि । तत्र गवां गोष्ठे अस्मत्कनीयान् सरलश्च पुत्रो द्रव्यः कुशली वर्तते ? अन्ये कर्मकराः सुखिनः सन्ति ? गावः, वत्साः, वत्सतराश्च सुखं जीवन्ति ? मोदन्ते च तत्र ? वृषभाश्च प्रसीदन्ति, घासान् चरन्ति च ? गव्यचयस्तु भूयान् दृश्यते युस्माभिः प्रयोगो न कृतो गव्यानाम् ?

**कृष्णः-** सर्वे सन्ति कुशलिनः । युवराजः प्रसन्नः स्वस्थश्च वर्तते । गावः प्रसन्ना घासं चरन्ति चम्पासरितः स्वच्छं जलञ्च पिबन्ति । तासां दुग्धवृद्धिश्च जातो वर्तते । वयं गव्यैस्तृप्ताः । राजप्रासादः अपि गव्यानां स्वादुताम् अनुभवतु इति धिया युवराजेन प्रेषितः अहं तदूढ्वा आगतः । गव्यानां मूलप्रयोगकर्तारस्तु भवादृशा एवेति प्रेषितः अहं युवराजेन । एतत्सर्वं दध्यादि रक्षतु रज्ञि ! अहं मत्स्त्रीपुत्रान् द्रष्टुं गच्छामि मद्गृहम् । श्वः प्रातरेव रागनाशं गन्तास्मि ।

**राज्ञी-** मद्वचनेन युवराजो द्रव्य आशीर्वचनीयः गावश्च वर्धन्ताम् ।

(अत्रान्तरे रागनाशस्य गोष्ठालयमुपस्थाय कृष्णो नियुक्ते कर्मणि व्यापृतवान् ।)



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

## चतुर्थं दृश्यम्

**द्रव्यसाहः-** भो कृष्ण ! राजप्रासादं गत्वा समागतवान् त्वम् ? का वार्ता राजप्रासादस्य ? राज्ञ्यौ ज्येष्ठभ्राता च कुशलिनः सन्ति तव स्त्रीपुत्रादयः अपि सकुशलाः ? स्त्रीप्रणयो नवीकृतः किम् ?

**कृष्णः-** आम् युवराज ! प्रापितेन पयसा घृतेन दध्ना च मातरौ अतीव प्रसन्ने गव्यानां सम्प्राप्त्या हर्षपूरितास्ताः सञ्जाताः ।

**मोहनसोहनौ-** ग्रामतस्तेमनानि द्विदलानि च नानीतानि त्वया ? गव्यप्रकाराणां तद्विकारस्य च खादनेन वयमाकण्ठं तृप्ताः । इदानीं तत्खादनेन मनो गच्छति । तत्खादनं नरोचते चास्मभ्यम् । दध्योदने न तृप्ताः परमान्नेन पायसाभिधानेन विमनो मनस्तेमनौदनं खादितुमिच्छति, युवराजायास्मभ्यञ्च न रोचन्ते दुग्धदधिमथिततक्राणि हीदानीम् ।

**कृष्णः-** माषान्, कुल्माषान्, कुलत्थान्, शूक्तम्, वटिका, चानीतवानस्मि प्रासादात् । खादिष्यथ भोजनवेलायाम् ।

## पञ्चमं दृश्यम्

(तदा 'अलक्षो निरञ्जनः' इत्येवं रूपो ध्वनिः श्रुतः । ततो द्रव्यसाहो भिक्षादानार्थमादिशति कमपि प्रेष्यम् । तदानीमेव अधस्तः कमण्डलुसनाथितं हस्तं नैजे प्रकोष्ठे समागतं पश्यति द्रव्यसाहः । ततः असाधारणोऽयं भिक्षुकवटुरिति समवधार्याधः अवतरति पश्यति, प्रणमति च तं वटुरूपं तेजस्विनं योगिनं द्रव्यसाहः ।)

**द्रव्यसाहः-** योगिन् ! कां सेवां करोम्यहं भवतः कृते ? किं भिक्षसे महाराज, अहमानयामि भिक्षाम् ।

**गोरखनाथः-** नाहं साधारणीं भिक्षां याचे गृहस्वामिन् ! अहं गोरसप्रियो गोरसमिच्छामि । भवान् गोपालको गोभक्तश्चेति तवालयमागतवान् पूर्वम् । गव्यं पातुं खादितुञ्च समीहे । किं पयस्विन्यो गावः सन्ति ? गोपयांसि वर्तन्ते ?

**द्रव्यसाहः-** मम गोष्ठालयस्य गोष्ठे भवान् साधुरूपेण योगिरूपेण चागतवान् । अत्र गावोऽपि सन्त्येव कथं गव्यं न ददामि ? अत्र गोप्राचुर्यं गोसेवाप्राचुर्यं गव्यप्राचुर्यञ्चेति तत्र विश्वस्तो भव योगिन् ! विशाले कटाहे दुग्धानि श्रपयामि पश्यतु चाग्न्यालये भवान् । प्रतीक्ष्यतां तावत् ।


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**गोरक्षः-** शोभनं सफलञ्चात्रागमनम्, गोसेवको गावो गव्यानि च लब्धानि।

**द्रव्यः-** योगिन् ! अत्र खट्वायां कम्बला आस्तीर्णा वर्तन्ते, वसतु भवान् तत्र भिक्षापात्रं कमण्डलुं त्रिशूलञ्च स्थापयित्वा । अहं तण्डुलान् घृतेषु भर्जयामि, ततः क्षीरान्नं परमान्नं पायसं वा पक्ष्यामि । भवते परमसिद्धाय परमान्नमेव देयम् ।

**गोरखः-** नासीत् परमान्नस्यावश्यकता, कष्टं किमर्थं करोषि ? दुग्धमात्रेणापि तृप्तोऽहं भविष्यामि, मा कुरु प्रपञ्चम् ।

**द्रव्यसाहः-** नहि नहि महाराज ! न किमपि कष्टकरं पायसपाचनम् । भवानलक्षं शिवं जपन् विश्रामं कुरु नित्यकर्माणि च । एतत् सम्पन्नं भविष्यति। मदीये गोष्ठालयेऽतिथीनामागमनं दुर्लभं भवादृशां सिद्धानां योगिवराणां तु दुर्लभतममिति विभावयेऽहम् । आलुकं घृते तारयामि पायसञ्च पक्ष्यामि भवतः कृते । पायसभक्षणानन्तरं गव्यस्यामान्नस्य सिद्धान्नं सम्पाद्य दास्यामि । मम सौभाग्यमेतदनुपेक्षणीयम् ।

**गोरखः-** त्वं गोसेवको गोष्ठालयश्चासि । तथापि त्वं समस्यायामपि तेजस्वी असि, आतिथ्यशिल्पवाँश्च दृश्यसे, सभ्यभाषणोऽसीति कस्यापि राजप्रासादस्य सदस्योऽसि किं गृहस्वामिन् ?

**द्रव्यसाहः-** आम् महाराज, आम् योगिन् ! अहं लम्बयुग्मराज्यस्य अधिपतेर्यशोवर्मसाहस्य कनीयान् अस्मि पुत्रः । मम पितुः पत्न्यौ द्वे स्तः । वसन्तावती चम्पावती च । वसन्तावत्याः पुत्रौ नरहरिसाहो नरपतिसाहश्च । अहं चम्पावत्याः कनिष्ठाया राज्ञ्याः पुत्रो भवामि, पितुः कनिष्ठश्च पुत्रः ।

**गोरखनाथः-** मातरौ भ्रातरौ च कुत्र सन्ति ?

**द्रव्यशाहः-** परीते पितरि मम ज्येष्ठमाता राज्ञी चास्य राज्यस्य स्वपुत्रयोर्ज्येष्ठं नरहरिसाहं स्वामात्यत्वेन राजप्रासादे कुन्छानगर्यां रक्षितवती । मध्यमभ्राता च पुस्तूनकूटस्य संरक्षणार्थं तत्र नियुक्तः प्रेषितस्तत्र च । अहञ्च भवदग्रे नम्रीभूतो भवत्कृपासनाथो जडभरत इव शरीरेण बुद्ध्या च बलिष्ठो पीनश्च सरलस्वभावः अत्र गोष्ठालयत्वेन प्रेषितोऽद्रव्योऽपि द्रव्यसाहनामा रागनाशकूटे तत्परिसरे च ।

**गोरखनाथः-** इदञ्च स्थानं लम्बयुग्मराज्यस्य सामान्या पूर्वोत्तरा सीमा । अस्या रक्षा च मम द्वितीयं दायित्वम् । मुख्यं निरन्तरापेक्षञ्च मम कार्यं गोरक्षणं गोपालनञ्चास्ति योगिन् ! सर्वं राज्यनिर्देशनं पालयन् गोसेवां करोमि । गोपालनं चम्पासरितो जलस्नानञ्च ममाभीष्टमेव । अस्यां



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्थितौ भवतां सेवायाः शुभावसराऽपि प्राप्त इत्यत्यन्तं प्रसीदामि ।

**गोरखनाथः-** (मनसि विचारयति गोपोऽयं गोपालको गोसेवकः सिद्धानामाराधकः सिद्धिप्रणयी चेति निर्धारयन्) शोभनं वत्स ! त्वयि राजांशो विराजते तस्य संवर्धनं विधेयम् । साधवो योगिनश्च एकत्र चिरकालं यावत् न तिष्ठन्ति । एतावता या सेवा त्वत्कर्तृकामकर्मिका इष्यतेऽनुष्ठीयतां सा द्रुत्या ।

**द्रव्यसाहः-** (पायसं दर्वीपात्रेण चालयन् आलुकानि च घृते तारयन् पृच्छति) योगिन् ! साफल्याप्तिर्जनहितमुपेक्षितहितञ्च कथं भवति कथं वा तत्करणीयमिति ज्ञातुमिच्छामि ।

**गुरुगोरखः-** कर्तव्यनिष्ठो जनः स्वकार्येषु सफलतायै कठिनं श्रमं कुर्वन् गुरुषु देवेषु च श्रद्धामाराधनाञ्च विदध्यात् । लक्ष्यावाप्तये परमार्थप्राप्तये च कृतं तपो न निष्फलतां याति । योगसिद्ध्या सर्वं करतलगतं भवति । कार्येषु श्रमो योगसिद्धिश्च न कदापि निन्द्यौ । कर्तव्ये जागरुकः सन् सत्कार्येषु देशसेवायाञ्च सदा रतः स्याज्जनः, तत्र त्वमपि जागरुकः स्याः, सफलता करतलगता भविष्यति युवराज !

**द्रव्यसाहः-** तत्र प्रयतिष्ये महाराज ! इदानीं परमान्नं क्षीरत्वेन लोके प्रथितं सुसिद्धम् । भवानत्र काष्ठपीठिकायामुपविशतु । (ततो द्रव्यसाहः प्रत्यग्रपत्रनिर्मिते पत्रभाजने टप्परिकायां पायसं परिवेशयति, पत्रनिर्मिते एव बृहत्तरे तलितालुकञ्च परिवेश्य समर्पयति योगिने सिद्धराजे गोरक्षाय) ।

**गोरखः-** (भगवते भूतनाथाय अग्नये च समर्प्य प्राश्नुते पायसम् । तलितालुकञ्च सुस्वाद्य प्रसीदति । पायसालुके स्वदमानः) अतीव मिष्टममृतायितञ्च परमान्नम् । एतत्कृते धन्यं वदामि त्वाम् । खाद त्वमपि युवराज !

**द्रव्यसाहः-** पूर्वप्रत्तेनैव न तृप्ता भवन्ति प्राशकाः पाचकाश्च । भवते पायसादिकं पुनरर्पयामि । प्राश्नातु यथाशक्यम् । अत्राधिकं पायसादिकमवशिष्यते मत्प्राशनानन्तरमपि ।

**गोरखनाथः-** दीयमानं दर्वीद्वयं स्वीकृत्य पायसमालुकञ्च अन्यं निषेधति द्रव्यं निर्दिशति च खादितुम् ।

**द्रव्यः-** योगिनं तृप्तं कारयित्वा स्वयमत्ति सः । मिष्टस्य स्वादुतमस्य च परमान्नस्य च तत्त्वमनुभूय कृतकृत्यताञ्चानुभवति ।

**गोरखनाथः-** मम प्रस्थानवेला सञ्जाता । भवान् भुक्त्वा हस्तौ मुखञ्च प्रक्षाल्य


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

समागच्छतु, भोजनभाजनानि, तत्रत्यावशिष्टं पायसं सहयोगिभ्यो दत्त्वा अपसारयतु, मार्जयतु वा सहयोगिभिः । प्रस्थानवेलायां तानि न द्रष्टव्यानि भवन्ति ।

(पात्रशुद्ध्यादिकं सम्पाद्य उपतिष्ठते योगिसेवायां द्रव्यसाहः)

**गोरखनाथः-** भो युवराज ! तव विनयेन श्रद्धया सेवया चाहं प्रसीदामि । तव कल्याणं मनोरथपूर्तिश्च स्यात् । अहं गोरखनाथः अस्मि । त्वयि वर्तमानैर्लक्षणैस्तुभ्यं नवराज्यप्राप्तिर्भविष्यति । (प्रस्थितवान्)

**द्रव्यसाहः-** भगवन् ! अहं भावत्कः सेवकः । सर्वसामर्थ्यवानसि त्वम् । उपेक्षितोऽहं राज्यात् । सिद्धेः प्रसादः कोऽपि लब्धः स्यान्मया भगवत्तः । यद्यपि फलाकाङ्क्षारहिता मत्कर्तृकात्वत्कर्मिका सेवा, तथापि त्वं कर्तुमकर्तुमन्यथा कर्तुं समर्थ इति विश्वासात् ममेष्टपूरकमाशीर्वादं वाञ्छामि त्वत्तो भगवन् !

**गोरखनाथः-** शोभनं वत्स ! आत्मविश्वासवान् परमशक्तौ विश्वासवाँश्च जनो लभते । ममाशीर्वादाः सन्ति । कृते यत्ने कुशासकाधिष्ठितं गोरखाराज्यं तवायत्तं भविष्यति । तपसि सिद्धौ च विश्वासः स्यात् तव । इतोऽधिकं तपस्यायामाचरितायां तव सन्ततेः सत्प्रयासाद् भविष्यति । यत्नवान् भव ।

(ततः प्रतिष्ठते योगी । द्रव्यसाहश्चाशीर्वादान् स्मरन् तत्साफल्यार्थं चिन्तयति प्रयतते च) ॐ तत्सत् । शुभं भूयात् ।)

॥इति॥



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

# सुगताभयदानम्

प्रा. डा. विष्णुप्रसाददेवकोटा

## प्रथमं दृश्यम्

स्थानम् - लुम्बिनीपरिसरः । समयः

पात्राणि- गौतमबुद्धो ज्ञानवृद्धस्तपस्यावृद्धः परम्परापरः समन्वयवादी देवदत्तस्याग्रजश्च ।

देवदत्तो दृढव्रती महत्त्वाकाङ्क्षी च ।

अजातशत्रुः सति पितरि राजनि राज्यारोहणाय कृतत्वरो देवदत्तभक्तः ।

अन्ये स्वामिविधेयाः ।

(बौद्धेष्वपि केचन बुद्धभक्ताः केचन देवदत्तभक्ताश्चासन् । महत्त्वाकाङ्क्षी दृढव्रती च देवदत्तो बुद्धं तन्मतञ्च असहमानोऽलग्नं सङ्घं रचयामास । तेन समूहः संघो वा बुद्धविरोधे परिचालितः । प्रकृतबुद्धमार्गाद्भिन्नं मतञ्च घोषितं भिन्नाचारसंहिता च घोषिता । अस्यां जटिलायां परिस्थितौ सर्वं समीक्ष्य बुद्धो मार्गस्य हितं तत्र समन्वयस्यावश्यकताञ्च अवधार्य पारम्परिकीमाचारसंहितां च तद्विरोधे घोषितवान् ।)

**गौतमबुद्धः-** बुद्धभिक्षवोऽधिकतस्त्रीणि चीवराणि (वस्त्राणि)प्रयोक्तुं शक्नुवन्ति । भिक्षवः सुविधासम्पन्ने भवनेऽपि निवस्तुं शक्नुवन्ति । भिक्षवो राजप्रासादे धनिनां सद्मसु च निमन्त्रिताः सन्तो भोक्तुं शक्नुवन्ति । मांसादनं भिक्षूणां कृते दण्डप्रयोजकं न भविष्यति, यतोहि ते राजप्रासादाद् धनिनां हर्म्याच्चागता अपि भवन्ति । स्वस्यार्थिकसामर्थ्यानुसारेण भोजनानि भोक्तुं शक्नुवन्ति भिक्षव इति च । परम्परातः प्रचलितां विरोधस्वरस्य मुखरतां दृष्ट्वा श्रुत्वापि अपरिवर्तितामाचारसंहितामवधार्य समीक्ष्य च स घोषितवान् ।

**देवदत्तः-** भो दार्ढ्येन परम्परावादिनः कठिनव्रताश्च मदनुयायिनः यद्यपि बुद्धो मम गुरुरग्रजश्च,तथापि तदाचारसंहितायां मम, सम्भवतो भवतामपि विरोधो वर्तत एव । न मया सह्यते तत्सर्वं भवद्भिरपि न स्वीक्रियताम् । मया चोद्घोष्यमाणा आचारसंहिता च बुद्ध्यतां व्यवह्रियताञ्च । सा चेयं मम विमृष्टा निर्धारिता चाचारसंहिता । बौद्धेन भिक्षुणा एकमेव वस्त्रं चीवरपदवाच्यमुपयुज्यताम् । बुद्धभक्तैः ममानुगामिभिर्वृक्षाणां मूलमेव वसतिर्विधेया । भिक्षितान्येवान्नानि



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भक्षणीयानि भिक्षुभिः । केषामपि राज्ञां श्रेष्ठिनां धनिकानाञ्च भोजननिमन्त्रणा न स्वीकार्या । भिक्षुदीक्षायां दीक्षितानां कृते मांसादनं सर्वथा परिहरणीयं तद्दण्डप्रयोजकञ्च स्यात् ।

**देवदत्तपक्षीयो भिक्षुः-** गुरुशिष्ययोरग्रजानुजयोर्वा मतभेदे कथं चलिष्यति मार्गोऽयं देवदत्त ! स्वाचारः किल चैच्छिकोऽपि भवति भो !

**देवदत्तः-** नहि नहि, तन्न मन्यामहे वयम्। अस्माकमलग्न एव सङ्घो भविष्यति। बुद्धाचारसंहितायां वयं न समाविष्टा भविष्यामः । बुद्धोपदेशं न वयं मन्यामहे । अस्माकं पञ्चशताधिकशिष्याणामेकः सङ्घो भविष्यति । कठिनव्रता भिक्षुकाः परम्पराप्रियाश्च मां समर्थयिष्यन्ते । बुद्धं समर्थयमानो भिक्षुकस्त्वमपि उद्यतो भव, त्यज समन्वयवादचिन्ताम्।

**गौतमबुद्धः-** समन्वय आचारसारल्यञ्च समयस्य आवश्यकतास्ति यज्ञीयहिंसा-मद्यपानादि-परिव्याप्ते युगे आवश्यकी आचारस्वतन्त्रता देया एव भिक्षुकेभ्यः समन्वयार्थम् । भविष्यति परिष्कारो मर्यादा वा यद्यावश्यकं, तदाविचारो भविष्यति । इदानीमेव भिक्षुकभेदनमाचारभेदनं सङ्घभेदनञ्च कृत्वा प्राचीनं परम्पराप्राप्तञ्च बुद्धमार्गं शिथिलं मा कुरु देवदत्त ! ममायं सदाग्रहो न तु दुराग्रहः । पुनर्विचार्यैव कार्यं कुरु, न त्वावेशेन। मदावेशस्तु न प्रतीक्षते विवेकम्। त्वं सावधानो भव, अनुयायिनश्च तावका विवेचकास्तथ्यग्राहिणश्च स्युरत्र विषये। सामान्यो मतभेदो लक्ष्यभेदकः स्यात् सर्वाहितकरः।

**देवदत्तः-** नहि नहि वयमलग्ना एव भविष्यामः । बहु स्वातन्त्र्यं नेच्छामो वयम् । सङ्घः अस्माकमलग्नो भविष्यति । एवमेव सम्प्रयोजितः सः अस्माभिर्मानसिकरूपेण । एतत्संघानुयायिनां दीक्षान्तो भविष्यति प्रामाणिकतायै । तदर्थञ्च मया व्यवस्था मनसि कृता ।

**बुद्धपक्षीयो भिक्षुः-** भो देवदत्त ! त्वयाऽऽवेशेन कार्यं क्रियमाणमस्ति । यज्ञीयपशुहिंसा-मद्यपान- व्यभिचारादिभिराक्रान्ते समाजे बुद्धधर्मस्याहिंसायाश्च प्रचारवेलायां सर्वसमावेशवेलायाञ्च पथिभेदनं सम्प्रदायभेदनं वानुचितम्। आचारसंहितायाः सुसारल्यस्यावश्यकतायां तव कठोरव्रतं अनुपयुक्तम्, सफलञ्च तन्न भविष्यति, तथा सति बुद्धधर्मश्च प्रतिहतगतिरवरुद्धश्च भविष्यति ।

**देवदत्तः-** अथ च किं विधेयं भ्रातः !

**बुद्धपक्षीयो भिक्षुः-** सारल्येन बौद्धाचारस्योपासनीया पद्धतिः ह्यनुशीलनीया । तव स्वयमाचार्यत्वग्रहणं नोपयुक्तमेव, मतभेदः प्रस्तोतुं शक्यते, मतभेदेनैव



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विचारविमर्शं विना पन्था एव न भेत्तुं शक्यते । प्रकृतविषये स्वच्छेन शीतलेन च मनसा विचारणीयस्त्वया सम्भावितानुयायिभिश्च सह । तव रजसा प्रवृत्तिर्नोपयुक्ता हंसवेधेऽपि तवेदृशी एव प्रवृत्तिर्दृष्टा इदानीमपि तां प्रदर्शयसि इत्यहं गौतमबुद्धवाचा समनुरुणध्मि त्वाम् । गौतमबुद्धस्य नेतृत्वमिदानीमखण्डितं स्यादिति कामयेऽहम् । तव तादृशी तपस्या उपज्ञासिद्धिश्च नास्तीति किमर्थं रजसा प्रवर्तसे । विरम तत्कार्यादहितात् ।

**देवदत्तः-** नहि नहि, ममायं विचारो बद्धमूलः । विचार्यैवाहं घोषितवानस्मि सङ्घमलग्नम् । अत्रान्तर्गतानां भिक्षूणां दीक्षान्त आवश्यक इति तदर्थमपि मया व्यवस्था आरचिता, नाहमिदानीं परावर्ते ।

**बुद्धभिक्षुः-** दुःखदोऽयं तव निर्णयः । बुद्धधर्मं शिथिलं कारयसि । साफल्यं न लप्स्यते त्वया । आचारशैथिल्यापेक्षया कठोरव्रतित्वं नोपयुक्तं युगधर्मतोऽपि ।

**देवदत्तः-** द्रक्ष्यसि किं भविष्यति भविष्यति । नवीनसङ्घस्य दीक्षान्ताय दीक्षान्तभाषणाय च श्रीवस्तिराजाय बिम्बसाराय पत्रं लिखति प्रेषयति च देवदत्तः । तन्निषेधति च तत्कार्यं पत्रञ्च देवदत्ताय लिखति । इदं तत्पत्रस्य लिखितं वस्तु ।

**बिम्बसारः-** ममादरणीयस्य गौतमबुद्धस्य नेतृत्वे वर्तमानं वर्धमानञ्च सङ्घं त्यक्त्वा नवीने सङ्घे नाहमागन्तुं शक्नोमि नच दीक्षान्तभाषणं करोमि, तत्कर्मणि न मम सामर्थ्यं रुचिश्च । नान्यो बुद्धो भविष्यति तपोहीनो बोधहीनश्चेति ।

**देवदत्तः-** (सक्रोधम्) बिम्बसारो नागच्छतु दीक्षान्तभाषणाय तत्पुत्रः अजातशत्रुर्मद्भक्तः प्रयुक्तो भविष्यति । (जवनिका पतति ।)

## द्वितीयं दृश्यम्

(ततः स बिम्बसारपातनाय षड्यन्त्रमारचयामास । शीघ्रं राजीयन्तमजातशत्रुं स समुत्साहितवान् प्रेरितवाँश्च । ततोऽजातशत्रुः स्वपितरं राजसत्तातः पातयितुं विमृष्टे देवदत्तेन ।)

**अजातशत्रुः-** कथमन्यथा तव योजना फलान्विता भविष्यति ?

**देवदत्तः-** अहं जानामि तव पिता अस्माकं घोषणाया अलग्नसंघस्य च विरोधीति । अत एव स मन्निमन्त्रणामस्वीकृतवान् । तव पिता


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बिम्बसारश्च विश्वप्रसिद्धस्यायुर्विदो महावैद्यस्य जीवकस्य रसायनाद्यौषधप्रयोगेण स्वस्थो बलिष्ठश्च वर्तते ।

**अजातशत्रुः-** ततस्ततः किं विधेयम् ?

**देवदत्तः-** बलिष्ठो बिम्बिसारो स दशद्वादशवर्षाणि सकुशलं राजशासनं निर्वक्ष्यतीति तव राजत्वमसम्भवं ममाभिसन्धिश्च फलायितो न भविष्यति इति तत्पदच्यावनमेवोपयुक्तम् । तत्कार्ये तवाहं सहयोगं करिष्यामीति । तत्र त्वं सक्रियः सन् तं छद्मनापि बन्धने कुरु, त्वं च राजा भव । (कर्णे स गुप्तं कथितवान्) गोप्यैषा योजना सफला भविष्यति ।

**अजातशत्रुः-** तत्सर्वमहं करिष्यामि । ते प्रसरन्तु । मन्माता किं करणीया । सापि बन्धनीया न वा ?

**देवदत्तः-** नहि नहि माता न बन्धनीया भविष्यति । यतो हि सा आयोध्यकस्य राज्ञः प्रसेनजितस्य पुत्री अस्ति । स रुष्टः सन् अस्माकं योजनाया विरोधकः अवरोधकश्च स्यात् । स प्रतापशाली वीरवरश्च राजा वर्तते । अत एव तद्राज्यमयोध्या विरोधिभिर्योद्धुमशक्या वर्तते ।

(जवनिका पतति ।)

(अजातशत्रुणा बिम्बसारो बन्धने क्रियते, कारागारे च स्थाप्यते । किञ्चिदपि कर्तुमक्षमो बिम्बसारः कारागारादेव अजातशत्रोः राजत्वं स्वीकरोति । कतिपयदिनानन्तरं स देवदत्तसङ्केतेन कारामुक्तो भवति । एवं पित्रा बिम्बसारेण तस्य नृपत्वे स्वीकृते देवदत्तभक्तोऽजातशत्रुस्तस्य सर्वथा सर्वदा षड्यन्त्रे सहयोगं कर्तुं प्रारेभे । देवदत्तश्च बुद्धस्य कठोरे विरोधे बद्धपरिकरो बभूव । स च बुद्धस्य मारणमेव चिन्तयामास । स तदर्थं षड्यन्त्रं च रचयामास । सः स्वभक्तमेकं विवेकशून्यं विनेयं प्रशिक्ष्य तन्मारणाय प्रेषितवान् । स च 'बुद्धं मारयित्वा येन गमने प्रयुक्तं मार्गमतिरिच्य तदतिरिक्तेनैव मन्निर्दिष्टेन मार्गेण प्रत्यावर्तस्व' इति तमादिदेश । तं च सायुधं विश्वस्तं बुद्धविहारं प्रेषितवान् । स यथानिर्देशनं बुद्धालयं प्राप्य तच्छयनकक्षं प्राप्तवान् । तदानीं बुद्धस्तस्य पदचापान् श्रुत्वा मुक्ततन्द्रो दिशो विदिशश्च दृष्टवान् । तदाग्रत आगच्छन्तं हेतिहस्तं घातुकमिव तं ददर्श । घातुकश्च तेजस्विनं सौम्यमूर्तिं बुद्धं पश्यन् चित्रस्थ इव तस्थौ । तदीयौ करौ हेतिसञ्चालने अक्षमौ सञ्जातौ ।)

**गौतमबुद्धः-**किमर्थमागतः असि भिक्षो ! तव हस्ते किमर्थं हेतिका वर्तते ?किं



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कर्तुमिच्छसि किङ्कर ? चकित इव किमर्थं मां पश्यसि वत्स ?

**विनेयः-** भगवन् ! मां भवदीयोऽनुजो देवदत्तः प्रेषितवानस्ति ।

**बुद्धः-** किमर्थं प्रेषितवानस्ति मत्सकाशं भवन्तम् ? अस्ति किमपि पत्रादिकम् ? हेतिकां किमर्थं धारयसि वद भो आगन्तुक !

**विनेयः-** भगवन् ! नाहं वक्तुं समर्थोऽस्मि किमर्थमागतोऽस्मीति । मम तदानीं बुद्धिविवेकौ अपगतौ । विवेकाभावाद् देवदत्तीयामाज्ञां स्वीकृत्य अहमत्रागतवान् दुष्कर्महेतवे । अहमप्यपराधी अस्मि, भक्तवत्सल ! (इति कथयन् रोदिति)

**बुद्धः-** किमस्ति रहस्यं प्रेष्य ! किमर्थं देवदत्तस्त्वां प्रेषयति, कथं त्वमपराधी असि ? किमर्थञ्च रोदिषि ?

**विनेयः-** (गद्गदकण्ठेन) स्वामिन् ! स देवदत्तः षड्यन्त्रकारी महापराधी च अस्ति । स मां (कथयितुं न शक्नोति, किञ्चिद्विलम्ब्य) त्वां मारयितुं प्रेषितवानस्ति, मम बुद्धिस्तदापगतेति तदादेशं स्वीकृत्य आगतवानहमपि अपराधी अस्मि (इति कथयन् उच्चै रोदिति ।)

**बुद्धः-** किमर्थं रोदिषि वत्स ! अहं त्वत्रैव वर्ते, कथं न मारयसि माम् ? तदाज्ञां सफलां कुरु प्रेष्य ! किं रोदनेन कार्यम् ।

**विनेयः -** करुणामूर्तिमधिगतसिद्धिं तेजोरूपं लोकोपकारकं कथं मारयामि ? एतत्कुकृत्यं नैव करोमि, मम करौ न सक्रियौ, शिथिलायते मम शरीरम् । अत्र तत्कार्यकर्तृत्वेन ममागमनमेव ममापराधस्तस्य दण्डं दातुं भवान् समुद्यतो भवतु । भवत एवाहमात्मनो मरणं समीहे । ममापराधस्य अयमेव दण्डः ।

**बुद्धः-** पूर्वं कृतापराधस्यापि इदानीं विवेकः सद्बुद्धिश्च जायते चेत् पश्चात्तपनेन कृतप्रायश्चित्तो नैवापराधी भवति । त्वं त्वादेशपालक एव, तदादेशान् बाध्यतया पालयसि परन्तु सद्बुद्ध्या समादिष्टकार्यं न करोषि चेद् न त्वं दण्ड्य इति तत्र चिन्तां मा कुरु । यथानुकूलमत्र वस निश्चिन्तः ।

**विनेयः-** नात्र वस्तुं शक्नोमि भगवन् ! तेनाविवेकिना चादिष्टः अहम् । येन मार्गेण त्वं तत्र गच्छसि ततो मार्गान्तरेण मन्निर्दिष्टेनैवागमिष्यसीति स मामादिशति स्म । अत्रास्ति रहस्यम् ।

**बुद्धः-** (क्षणमक्षिणी सम्मील्य प्रकाशं वक्ति) मार्गान्तरेण


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

परावर्तनरूपादेशोऽवश्यमपि रहस्यमयो वर्तते । मम मारणोद्यतो देवदत्तहतको तं प्रेष्यमपि स्वयमेव मारयित्वा मारणद्वयमेव रहस्यमयं सम्पादयितुमिच्छतीति । एवं यथार्थं तव कथनं प्रेष्य ! दुष्टोऽभिसन्धिस्तस्य ।

**विनेयः-** एवं मां स मारयिष्यत्येव तन्निर्दिष्टमार्गेण गच्छन्तम् । दयालो ! अन्यत् किं करणीयं मया ?

**बुद्धः-** भयं मा कुरु वत्स ! त्वयाहं रक्षितश्चेदहं त्वां रक्षिष्ये । त्वं मन्मारणोद्यतस्य त्वन्मारणोद्यतषड्यन्त्रस्य चादेशं नैव पालयसि । मन्निर्दिष्टमार्गान्तरेण त्वमायोध्यकं राजानं प्रसेनजितं गच्छ । त्वदीयं वृत्तान्तं श्रुत्वा मामनुस्मृत्य च स तव सर्वथा संरक्षणं करिष्यति । स भोजनावासादेः प्रदानेन त्वां पालयिष्यति । तत्र देवदत्तहतको न सफलो भविष्यति । तस्य मारकता तत्र भस्मसाद् भविष्यति वत्स !

**विनेयः-** अजातशत्रोः प्रयोगेण देवदत्तस्तत्रापि मां न मारयिष्यति स्वामिन् ?

**बुद्धः-** (नहि नहि, प्रेष्यभिक्षुक ! अजातशत्रुस्तत्रत्यं सम्राजं प्रसेनजितं नाभिभविष्यति, किन्तु ततो बिभेति सः । अजातशत्रोरपेक्षया प्रसेनजितः अवधनरेशो महान् शक्तिशाली । महान् बुद्धभक्तः असौ बुद्धमारणषड्यन्त्रमवधार्य सतर्कः क्रुद्धश्च भविष्यति । बुद्धमारणे तव कातर्यं गुणग्राहिताञ्च श्रुत्वा समीक्ष्य च स त्वां प्रति दयोपकारप्लावितो भविष्यति । त्वाञ्च सर्वथा रक्षिष्यति । सम्पूर्णानि सौविध्यानि धनानि च दत्त्वा त्वां यत्नतः पालयिष्यति । गच्छ तत्र निःसङ्कोचम् ।

(एवं स प्रेष्यस्तामयोध्यां गतवान् । स च सर्वं वृत्तान्तं समाचारवाहकैर्बुद्ध्वा तं देवदत्तप्रेष्यमशनवसनादिभिः संरक्षितवान् । एवं योगबलेन बुद्धो रक्षितो मारकप्रेष्यश्च रक्षितो देवदत्तस्य षड्यन्त्रस्य प्रकाशनञ्चाभूत् ।)

(पटाक्षेपः)



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

# कर्मसिद्धिः

प्रा. रामहरिदाहालः

**पात्रपरिचयः**

जाजलिः- कश्चन तपःसिद्धो मुनिः ।
ग्रामीणाः- ग्रामवासिनः ।
गृहिणीः- काचित् गृहस्थपत्नी ।
वृद्धाः युवानः- ग्रामीणा युववृद्धवयस्काः ।
तुलाधरः- जनकपुरस्य कश्चन वैश्यः ।

## प्रस्तावना

गुणातीतरूपो गुणाधाररूपः
समेषां हितार्थं दधद्विश्वरूपः ।
समस्तेषु भूतेषु तिष्ठन् दयार्द्रः
प्रदद्याच्छिवं वः शिवो मङ्गलेशः ॥
(नान्द्यन्ते प्रविशति सूत्रधारः ।)

**सूत्रधारः-** अलं विस्तरेण ! (नेपथ्याभिमुखं निरीक्ष्य) आर्ये ! यदि नेपथ्यविधानं पर्यवसितं तर्हि इहागम्यताम् ।

**नटी** (प्रविश्य) आर्यपुत्र ! इयमस्मि । आज्ञापयत्वार्य ! किं प्रपूरणीयम् ?

**सूत्रधारः** मान्याः सभ्याः कर्ममर्यादायाः सम्बन्धे बुभुत्सका दृश्यन्ते । विषयश्चायं सामयिकः । अतो वत्सगोत्रीयकवे रामहरेर्नवेन कर्मसिद्धिनामकेन लघुरूपकेण परिषदेषा परितोषयितव्या ।

**नटी-** भावत्कं निर्देशनं यथासम्भवं परिपाल्यते ।

**सूत्रधारः-** आर्ये ! प्रथमं तावत् सभ्यानभिमुखीकर्तुं गीतं गीयताम् ।

**नटी-** आज्ञापयत्वार्यः किमधिकृत्य गायानि ?

**सूत्रधारः-** सम्प्रत्येव प्रवृत्तं हेमन्तर्तुमधिकृत्य गीयताम् ।
सम्प्रति हि तुहिनं नवनीतपिण्डवत् पथि वृक्षेष्वजिरेषु राजते ।
वकहंसगणा विहारिणो घनखण्डा इव भान्ति किं जले ॥

**नटी-** सत्यमार्यपुत्र ! तथा हि कनकानि फलन्ति किं तरावितिं नारङ्गफलानि विभ्रमम् । दधते मनुजेषु भूरिशो नवधान्यानि च क्षेत्रजानि नः ॥

**सूत्रधारः-** आर्ये मधुरं गीतम् । गीतेन चाभिमुखीकृताः सभ्याः ।


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**नटी-** आर्यपुत्र ! सम्प्रति रूपकप्रदर्शनावसरोऽस्तीति मन्ये । उच्यताम् केन रूपकेण सामाजिकानाह्लादयाम ?

**सूत्रधारः-** नवकविना रामहरिणा प्रणीतं कर्मसिद्धिनामकं समयानुकूलं लघुरूपकं प्रदर्शनयोग्यं वर्तते ।

(ततो द्वावेव निष्क्रामतः ।)

(इति प्रस्तावना)

## प्रथमं दृश्यम्

(ततो लोकलोचनगोचरीभवति तपोनिष्ठो जाजलिः । असौ गुहामुखे तपति । अस्य शरीरं प्रायस्तृणादिभिराच्छन्नं वर्तते । निश्चलोऽसौ 'ओ३म्' इति ध्वनिमुच्चारयन्नस्ति ।)

**जाजलिः-** ओ३म् ! ओ३म् ! ओ३म् ! ओ३म् !

**ग्रामीणाः-** आश्चर्यम्, आश्चर्यम् । विलोकयत ! मुनेः शिरसि वर्धितजटाजाले चटकदम्पतिभ्यां नीडं रचितं दृश्यते ।

**कश्चन युवा-** कियत्कालं तपस्तप्तं स्यान्मुनिवरेण ? पक्षिभिः शिरसि रचितं नीडमपि न जानाति ।

**अपरः-** ज्ञातं चेदपि उपेक्षितं स्यात् । 'पक्षिणो नीडं रचयन्तु नाम का हानिर्मे ?' इति विचारितं भवेत् ।

**इतरः-** मुनेर्धैर्यमासनस्थैर्यञ्च प्रशस्ये स्तः ।

**अन्यः-** (निकटमेत्य निपुणं निरीक्ष्य च) अहो ! पक्षिभिर्नीडस्य मध्येऽण्डान्यप्युत्पादितानि दृश्यन्ते ।

**सर्वे-** सत्यं सिद्धोऽस्ति मुनिः । प्रणमामामुम् ।

(प्रणम्य प्रतिष्ठन्ते ।)

**जाजलिः-** (शनैर्नेत्रे उन्मीलयति) तपोनिष्ठस्य मम कियान् समयो व्यतीतो भवेत् ? शरीरस्यावस्थां विलोक्य) अहो ! बालतृणाच्छन्नं शरीरम् । तथा हि -

पादे श्यामा वर्धमानाऽस्ति दूर्वा
मालत्याद्यैर्वेष्टितं चाङ्गमन्यत् ।
वल्ल्या नद्धः पादपो वा मनुष्यो
वर्ते चेत्थं स्वां तनुं तर्कयेऽहम् ॥



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अन्यच्च -

शिरसि मम समृद्धे केशशैवालजाले
विविधशकुनयो वै नीडमारच्य तस्थुः ।
तदपि मुनिरतिष्ठन्निश्चलोऽसौ समाधौ
यमनियमधनाढ्यं किं जयेयुर्हि विघ्नाः ।

(शरीरे व्यापृतं घासादिकमपसारयति । अपसारणस्य कारणाद् घासाच्छन्नशिरसि रचितकुलायाः पक्षिण उड्डीयन्ते । उड्डीयमानः कश्चन पक्षी विष्टां पातयति, या जाजलेर्दक्षिणकरे पतति ।

**जाजलिः-** (करक्षिप्तां विष्टां विलोक्य)

प्राप्यन् चेतश्चेन्द्रियाणां समूहं
दीर्घं रुद्ध्वा श्रीपतौ सन्दधानम् ।
तेजोदीप्तं मामनादृत्य पक्षी
यायात् कुत्रायं तपो मे प्रपश्य ॥

(किञ्चिद्रोषदृष्ट्या पक्षिणं विलोकयति । पक्षी तपोऽग्निना दग्धतनुर्भूमौ पतति । भष्मीभूतं पक्षिणं पश्यन् ) सिद्धं मे तपः । कृतापकार एष पक्षी प्राणैर्विमुक्तः । यदि नाम कश्चनान्योऽपकुर्यात्, तस्याप्येतादृश्येव गतिर्निश्चितास्ति । (उत्तिष्ठति) अहो ! दर्शनीया खलु तपोवनरमणीयता । तथा हि-

कियद् वा प्रमाणं दिवश्चेति बोद्धुं
विहाराजिरं वा मघोनो विबोद्धुम् ।
इमे नन्दनं किं जयन्तीति रीत्या
मुहुः स्पर्द्धमाना विभान्तीह वृक्षाः ॥

अपि च

कमलिनीमकरन्दकधूलिभिः
शवलिता ह्रदिनीजलराशयः ।
ननु विलोकयतां किल मानसे
सुरशरासनविभ्रममादधुः ॥

(किञ्चिदग्रे गत्वा तपोनिष्ठान् मुनीन् निरीक्ष्य)

गिरौ गुहायामथ शाखिमूले
ध्यायन्ति स्थित्वा मुनयो महेशम् ।
स्वरूपनिष्ठा यतयो न देहं


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जानन्ति गेहं न कलत्रपुत्रान् ॥

अधुना समाधेर्विरतोऽस्मि । समाधेरवसरे सुखं दुःखं वा नासीत् । केवलमात्मानन्दानुभव एव व्यापृणोति स्म मानसम् । भवतु भिक्षार्थं ग्रामं यामि । सम्प्रति बुभुक्षा वर्धमाना प्रतिभाति । (किञ्चिदटित्वा अग्रतो नदीं पश्यन्)

वने सञ्चरन्तो वृषास्तर्णकाद्याः
खगा वा महिष्यः पिबन्तीह नीरम् ।
प्रणालीश्च कुल्या विनिर्माय दक्षाः
समाकृष्य तोयं कृषिं वर्धयन्ति ॥

अपि च

नदीकूपधारादयः स्युर्न भूमौ
कथं नाम सत्त्वानि प्राणान् धरेयुः ।
कथं वृक्षगुल्मा व्रतत्यश्च शोभां
दधाना धरायां समृद्धा भवेयुः ॥

(नमति । घासकाष्ठाद्यानयनाय वनं प्राप्ता नदीतटवासिनो ग्रामीणा मुनिं पश्यन्ति।)

**एकः-** अहो ! समाधेः प्रबुद्धोऽसौ मुनिरेष जाजलिः, वन्दनीयो गृहिभिः ।

**अन्ये -** वाढम् ! वन्दनीयो मुनिः । (निकटमेत्य)

**ग्रामीणाः-** मुनिवर ! वयं ग्रामीणाः । बीजवपन- घासकर्तन- गोपालनादिकर्मभिर्गतमस्माकं जीवनम् । अस्माभिः किं कर्म विधातव्यम् ? केन सुखिनः स्याम वयम् ? कृपां कृत्वोपदिश्यतामेतद् ।

**जाजलिः-** यूयं गृहस्थाः । गृहस्थानां कर्तव्यं गृहसम्मार्जनम्, सन्ततिपालनम्, मातापित्रोः शुश्रूषणम्, मान्यानामादरः, गोपालनम्, अतिथिसेवनञ्च । संक्षिप्तं चेदपि प्रातः सायञ्च सन्ध्यावन्दनमाचरणीयमेव ।

**ग्रामीणाः-** अस्माकं ग्राममेत्योपदिशत्विति प्रार्थयामहे ।

**जाजलिः-** भवति । भिक्षार्थमहमपि ग्रामं जिगमिषामि । गृहस्थानां साहाय्येन ब्रह्मचारिणो वानप्रस्थाः तपस्विनः संन्यासिनश्च जीवन्ति ।

**ग्रामीणाः-** अनुगृहीताः स्म ।

**जाजलिः-** अहं दिवासन्ध्यामाचरामि । भवन्तश्च घासकाष्ठादीनि सङ्कलयन्तु । तदनु सहैव चलिष्यामः ।

**ग्रामीणाः-** एवमेव करवाम ।

(इति प्रतिष्ठन्ते ।)



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(मुनिः सन्ध्यामाचरति । ग्रामीणा घासं काष्ठञ्च कर्तयन्ति ।)

**ग्रामीणाः-** घासकर्तनं प्रपूरितम् । काष्ठसञ्चयनमपि सम्पन्नम् । मुनिः कदा जागृयात् ?

(अत्रान्तरे मुनिः किञ्चिन्नेत्रे उन्मीलयति) अहो ! जागृतो मुनिः । यामस्तत्सन्निधौ । (हिण्डन्ते)

(जाजलिः उत्तिष्ठति । ग्रामीणा घासं काष्ठञ्च शिरसि पृष्ठे च धारयन्तो मुनिसन्निधौ समागच्छन्ति ।)

**ग्रामीणाः-** श्रद्धेय मुनिवर ! वयमागताः । भवन्तं परिवेशं दर्शयितुमिच्छामः ।

**जाजलिः-** साधयामस्तावत् ।

## द्वितीयं दृश्यम्

(जाजलिरासनमध्यास्ते । एतं परिवेष्ट्य वृद्धा युवानः स्त्रियो बालाश्च तिष्ठन्ति ।)

**वृद्धाः-** भो मुनिवर ! भवानस्मिन्नेव ग्रामे विराजताम् । अत्रोषित्वा विषयकूपपतितानस्मान् प्रतिदिवसं किञ्चित्कालमुपदिश्य उद्धरत्वित्यनुरुन्ध्महे । तथा हि -

कलत्र-पुत्रादिक-नप्तृवर्गैर्दष्टान् परं तन्नहि शोचमानान् ।
उद्धर्तुमस्मान् प्लवमाविधाय मुरारिणा त्वं किल प्रेषितोऽत्र ॥

**युवानः-** वयमपि किञ्चिन्नैतिकशिक्षामत्रार्जयितुमिच्छामः । तथा हि

तरुणे वयसीह भौतिकं
सुखमाकाङ्क्षति मानसं किल !
कथमस्य फलं सुदुःसहं
परिजानाति जडं हि मानसम् ॥

**स्त्रियः-** मुनिवर !

विषया विषवन्मता बुधैः
परमेतेऽतिप्रिया भवन्ति नः ।
विषमिश्रितमोदकं द्रुतं
किमु नाकर्षति बालमूषकम् ॥

**जाजलिः-** भो ग्रामवासिनः ! अहं खलु तपस्वी यतिः । तपश्चरित्वा सिद्धेर्त्यर्जनं मे कर्तव्यम् । यतिभिर्भोगबहुले गृहस्थाश्रमे नैव बहुकालं स्थातव्यम् । अतो हि चिरं स्थातुं नेच्छामि । विनाऽवस्थित्या उपदेष्टुं न शक्यते ।


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तथा हि -

श्रव्यं दृश्यं त्रिभुवनभवं नैव सत्यं समग्रं
बुद्ध्वा चैतद् वयमिह परेशे मतिं सन्दधामः ।
दाराः पुत्रा द्रविणवसने सन्ततं सत्यमात्मा
भोक्तुं चाप्तुं प्रयतनपरान् किं गृहस्थान् वदाम !
तथा हि किञ्चिद् वच्मि -
सन्ततं स्मर्यतामीश्वरो मानसे
नैव विस्मर्यतामीश्वरो मानसे ।
भोगभुक्त्यै मनो नैव देयं जनैः
उत्थितास्त्यागतः सज्जनाः सर्वदा ॥

(ग्रामीणाः फलानि ददति)

**जाजलिः-** अहं गृहत्रयाद् भिक्षां प्राप्यैव जीवननिर्वाहं करिष्यामि । फलानि भवन्तो भुञ्जताम् । (उत्थाय निष्क्रामति ।)

## तृतीयं दृश्यम्

(जाजलिर्भिक्षणाय कस्यचन गृहस्थस्य गृहं प्राप्नोति)

**जाजलिः-** जय शम्भो ! का को वाऽत्र भो !

**गृहिणी-** (अन्तर्देहलीतः) प्रतीक्ष्यतां मुनिवर ! अहं जरत्तरश्वसुरयोः सेवायामस्मि ।

**जाजलिः-** (किञ्चित् प्रतीक्ष्य) न बहु प्रतीक्षिष्ये । शीघ्रमायाहि । अन्यथाऽन्यत्र गच्छामि । (नेपथ्ये)

आगच्छामि मुनिवर ! द्रुतमागच्छामि, यदि द्रुतं नागच्छामि तर्हि भवान् मामपि विष्टापातिनीं चटकामिव भस्मसात्करिष्यतीति बिभेमि ।

**जाजलिः-** (आत्मगतम्) अनया सुदूरवनान्तरस्य घटना कथमवगता ? भो ! संयमिततया स्थास्ये ।

**गृहिणी-** (आगत्य प्रणम्य च) मुनिवर ! गृह्यतां भैक्ष्यम् ।

**जाजलिः-** (भिक्षां गृह्णन्नाशिषं प्रयुञ्जानश्च) मातः ! वनान्ते घटिता सा घटना भवत्या कथं ज्ञाता ? अपि भवत्या तपसा दूरदर्शनसिद्धिर्लब्धा ?

**गृहिणी-** मुनिवर ! मया सिद्धये जातुचिन्न प्रयतितम् । न च कैश्चिदनुगृहीताऽहम् । अनधीता गृहिणी अविहिततपश्चर्या चाहं तत् कथं सिद्धा स्याम् ? सिद्धस्तु भवान्, यो दृष्टिमात्रेण चटकां भस्मसात्कृतवान् ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**जाजलिः-** मातः ! एवं मा वद ! यदि नाम भवती असिद्धा, तर्हि वनान्तर्वर्तिनीं चटकाहतसम्बद्धां घटनां कथं जानाति ?

**गृहिणी-** एतत् सिद्ध्या न, परं स्वकर्मपालनेनैव विज्ञातम् ।

**जाजलिः-** कीदृशं स्वकर्म !

**गृहिणी-** अहमहर्निशं पत्युः श्वसुरयोश्च सेवायै दत्तावधानाऽस्मि । मदीयौ श्वसुरौ जरत्तरौ, क्षीणदृष्टिकौ, क्षीणश्रवणौ च स्तः, अनयोः स्वास्थ्यं कथं सबलं स्यात् ? कथं चेमौ तुष्टौ स्याताम् ? अप्यनयोः सेवायां त्रुटिस्तु न जाता ? इत्यत्राहं सशङ्का भवामि ।

**जाजलिः-** वृद्धयोः श्वसुरयोः शुश्रूषा त्वसिधारावहेलनवद् दुष्करा भवति । कथं खलु भवती तन्निर्वहति ? वृद्धसेवायां पथ्यभोजनस्य तप्तजलस्य औषधजातस्य च व्यवस्थापनं विधातव्यं भवति । कासश्वासैर्वातरोगा मधुमेहादय उच्चनिम्नरक्तप्रवाहादिरोगा मूत्रकृच्छ्र- मलस्तम्भादिरोगाश्च भवन्ति । रात्रिन्दिवमेव चिन्ताकुलया भवत्या कथमेतन्निरुह्यते ?

**गृहिणी-** अयि ! एतत्तु मम सौभाग्यम्, पित्रोः शुश्रूषायै समयः प्राप्तः । पित्रोः सेवा लक्ष्मीनारायणयोरेव सेवेति मन्ये । एतत्तु गृहिणीनां कृते निर्धारितं कर्म, अत्र कठिनता का ?

**जाजलिः-** अस्त्येव काठिन्यं तु, परं भवत्या तन्न मतं भवेत् ।

**गृहिणी-** न हि मुने ! एतन्न । यतः -

आलस्यं वै कार्यव्यापारहाने-
र्मूलं बीजं वर्तते साधुवर्य !
त्यक्त्वाऽऽलस्यं सावधानाऽस्मि कार्ये
को वाऽऽलस्यादुत्थितो भूतिमार्गे ॥

**जाजलिः-** सुन्दरं मधुरञ्च गीतम् । अपरञ्च भण्यताम् ।

**गृहिणी-** मुनिवर ! यथासम्भवं स्वकर्मणः परिपूरणाय यतमानाऽस्मि । अत्रैव सन्तुष्टाऽस्मि । अन्यत् किमपि न जाने । भगवद्गीतायां भगवता एवमेव प्रतिपादितमिति गुरुजनमुखान्मया श्रुतमपि 'स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः' इति । अस्मिन् सन्दर्भे जनकपुरनिवासी तुलाधरो वैश्यो भवतो जिज्ञासां समाधातुं शक्ष्यति ।

**जाजलिः-** आकाशवाण्याऽपि पूर्वं मे तत् संसूचितम् । भवती चैतद् दर्शयति । अहं तुलाधरवैश्यस्य पार्श्वे प्रस्थास्ये तथ्यबोधाय । वन्दे मातरम् ।

**गृहिणी-** वन्दे मुनिवरं चाहम् । यात्रायाः सफलतां च कामये । (इति निष्क्रान्तौ)


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

## चतुर्थं दृश्यम्

(जनकपुरक्षेत्रं विदेहनगरम्)

(तुलाधरो वैश्यः क्रयविक्रयव्यापारं कुर्वन्नास्ते । ग्राहकास्ततो विविधा आवश्यकसामग्रीः क्रीणन्ति । अत्रान्तरे जाजलिः प्रविशति )

**जाजलिः-** भो व्यापारिन् ! अपि भवान् तुलाधरो वैश्योऽस्ति ?

**तुलाधरः-** (पादौ स्पृष्ट्वा) मुनिवर ! अभिवादये । जना मामेवमेव वदन्ति ।

**जाजलिः-** भवान् सिद्धो वैश्यवर इति श्रुत्वा दूरादागतोऽस्मि ।

**तुलाधरः-** मुनिवर ! नाऽहं सिद्धः, न च मया तदर्थं प्रयतितम् । भवतो दृष्टिमात्रेण चटका भस्मसाद्भूता । अतो भवान् सिद्धः । सम्प्रति ग्रामीणया कुलवध्वा प्रेषितोऽस्तीति मत्सकाशमिति जाने ।

**जाजलिः-** वैश्यवर ! विना सिद्ध्या भवतैतत् कथं विज्ञातम् ? रसगन्धौषधीनामन्यखाद्यवस्तूनाञ्च व्यापारेण सिद्धिः कथं न लुप्तेति जिज्ञासे ।

**तुलाधरः-** मुने ! भूतानमद्रोहेण अल्पद्रोहेण वाऽहं जीवामि, विक्रयावधौ छलदम्भयोरसत्यस्य च लेशमपि नाश्रये, मनसा कर्मणा वाचा च समेषां हिताय प्रयतमानोऽस्मि । तदधिकं न किमपि जाने ।

**जाजलिः-** साधोरिव प्रशस्योऽस्ति व्यापारो भवतः ।

**तुलाधरः-** मुने !

धनी वाऽस्तु दीनः कुलीनोऽकुलीनः
समाना तुलाऽऽस्ते मदीया समेषु ।
असत्यं छलं नाश्रये तुच्छलब्ध्यै
सुकार्यात् प्रभुः स्यान्नरोऽनल्पभूत्यै ॥

**जाजलिः-** एष एव महान् धर्मो वैश्यवर !

**तुलाधरः-** धर्मार्जनार्थमीशप्राप्तये शान्त्यै वा नास्ति वनप्रस्थानस्य दीक्षाग्रहस्य काषायपरिधानस्य चाऽऽवश्यकता । लोकहितकारिणा, सर्वभूतहितकारिणा च कर्मणा सर्वे परितुष्यन्ति ।

**जाजलिः-** वैश्यवर्य ! सम्प्रति मयाऽनुभूतं यत् कामरोषदम्भाः सिद्धेरन्तरायाः । मदवर्धिकाः सिद्धयोऽप्यन्तराया एव।

**तुलाधरः-** मुनिवर ! तथा न वक्तव्यम् । कोऽपि पदार्थो हानिकृन्न, प्रयोक्तुर्बुद्धिरेव हानिकारिका । तत्राऽऽसक्तिरेव हानिकारिका ।

**जाजलिः-** स्वकर्मणः परिपालनमेव वस्तुतो भगवदाराधनमस्ति । मया रहस्यं



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ज्ञातम् । अधिकं न किञ्चिद् वाञ्छामि । अधुना प्रस्थातुमीहे ।

**तुलाधरः-** कार्यान्तरासक्त्या भवतः सपर्या न कृता । निकटमेव गृहमस्ति । तत्र गृहिणी वर्तते । तत्रैत्य आतिथ्यं स्वीकर्तुमनुरुन्धे ।

**जाजलिः-** मया अक्षयभोजनं भुक्तं सम्प्रत्येव । अधुना तृष्णाऽपगता, बुभुक्षा च शान्ता । तथापि मम भिक्षुत्वमादृत्य मुष्टिमितान् तण्डुलकणान् याचे ।

**तुलाधरः-** अनुगृहीतोऽस्मि । (तण्डुलान् ददाति प्रणमति च ।)

(जाजलिः आशिषं प्रयुज्य प्रतिष्ठते । तुलाधरः स्वकार्यनिरतो भवति ।)

भरतवाक्यम्

जनजनपदकार्यं नैजकार्यं विचार्य,
विदधतु धरणीशा दम्भमानौ विहाय ।
निजपरगणनां वै मानवाः सन्त्यजन्तु
धृतिगतिमतिमन्तः सर्वलोका भवन्तु ॥

(पटाक्षेपः)

॥ इति ॥


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

# प्रत्यादेशनम्

प्रा. रामहरिदाहालः

**पात्रपरिचय :**

| | |
|---|---|
| कृपाचार्यः- | कौरवपाण्डवकुमाराणां कुलगुरुः । |
| द्रोणाचार्यः- | कौरवपाण्डवकुमाराणां प्रधानाचार्यः । |
| युधिष्ठिरः- | पाण्डुकुन्त्योः ज्येष्ठसुतो राजकुमारः । |
| दुर्योधनः- | कौरवकुमोरषु ज्येष्ठ । |
| दुश्शासनः- | मध्यमकौरवराजकुमारः । |
| धृतराष्ट्रः- | हस्तिनापुरस्य राजा । |
| भीमः/भीमसेनः- | पाण्डुसुतेषु मध्यमः । |
| विदुरः- | हस्तिनापुरस्य महामन्त्री । |
| भीष्मः- | कुरुपाण्डुकुमाराणां पितामहः । |
| कर्णः- | अर्जुनप्रतिरोधी योद्धा, दुर्योधनस्य मित्रम् । |
| कुन्तीः- | पाण्डुपुत्राणां माता । |

**प्रस्तावना**

रूढं दर्पं दुर्जनानां निरस्तुं
लोके ख्यातिं सज्जनानाञ्च स्रष्टुम् ।
शाटीभूत्वा द्रौपदीं यो ररक्ष
सोऽव्यात् कृष्णोऽनेकसामर्थ्ययुक्तः ॥

(नान्द्यन्ते प्रविशति सूत्रधारः)

**सूत्रधारः-** (प्रविश्य अञ्जलिं बद्ध्वा) रङ्गकक्षः अस्मिन् समुपस्थाय . प्रेरणादायिन आर्यमिश्रान् सादरं प्रणमामि । (निरूप्य) आर्ये कुत्राऽसि ?

**नटी-** (प्रविश्य) आर्यपुत्र, इयमस्मि ।

**सूत्रधारः-** श्रीमतः सभासदस्तोषयितुं किञ्चिद् गायतु ।

**नटी-** (गायति)

ब्रूते जनः किन्नु कदेत्यपेक्ष्य
कार्यं निजोत्थानकरं विधेयम् ।
विशिष्टकार्यं न विधाय कुत्र
को वा कथं वा यशसा प्रदीप्तः ॥

(नेपथ्ये) भो ! कुमाराः स्वस्वकौशलप्रदर्शनाय त्वरितमागम्यताम् ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**सूत्रधारः-** (श्रुतमभिनीय) भवतु, विज्ञातम्, कुमाराः अधीतविद्यापरीक्षायै आकारिताः सन्ति । हन्त !

**आचार्यः-** कथमेतान् परीक्षिष्यन्ते । विस्मयावहमेवैतद् दृश्यम् -

तीक्ष्णै रिपो रुधिरपायिशरैरसङ्ख्यैः
प्राशैश्च वेगपतितैरपि भिन्दिपालैः ।
आच्छादितं दिनकरं सहसा निरीक्ष्य
स्वर्भानुग्रस्तमिव तर्कयते नु लोकः ॥

(निष्क्रान्तौ)

॥इति प्रस्तावना ॥

## प्रथमं दृश्यम्

स्थानम् - हस्तिनापुरस्य प्रेक्षागारः । समयः

(ततः प्रविशन्ति कुमाराः आचार्यैः सह)

**कृपाचार्यः-** कुमाराः, भद्रमस्तु वः । भवद्भिर्विज्ञातमेव भवेद् यदद्य अधीतविद्यायाः कौशलं प्रदर्शनीयं वर्तते । एतद् युद्धकौशलपरीक्षणार्थम् आयोजितं सदपि वास्तविकमिव रोमाञ्चकारि भविष्यतीति आशासे । तदर्थं सर्वे कुमाराः सज्जा भवन्तु ।

**(नेपथ्ये)** (वीराग्रणीः, अतिरथी, राज्यसंरक्षको गङ्गातनयो भीष्म आगच्छति । चक्रवर्ती महाराजः, कुमारमाता देवी, वीरप्रसूः पाण्डवमाता कुन्ती, मन्त्रनीतिज्ञो महामन्त्री विदुरः, अन्ये चामन्त्रिता विशिष्टातिथयश्च आगच्छन्ति । (सर्वे ससम्भ्रममुत्तिष्ठन्ति, आगता विशिष्टातिथय आसनमध्यासते ।)

**कृपाचार्यः-** स्वस्ति भट्टारकाय, स्वस्ति कुमारमात्रे देव्यै, स्वागतं विशिष्टातिभ्यश्च । श्रीमतां सविधे एतद् विज्ञापयामि यत् कुमाराः स्वकौशलप्रदर्शनाय समुपस्थिताः सन्ति । कुमारैर्योधनकलायां कथंविधं पाटवमधिगतमिति श्रीमन्तो विलोकयिष्यन्त्येव । पौरवकुमाराणामेतद् अद्भुतं रणकौशलं समेषां कृते गौरवास्पदं भविष्यतीति मन्ये । सम्प्रति केन केन कियत् कियद् अस्त्रनैपुण्यमधिगतमिति विज्ञापयितुं समादरणीयं प्रधानाचार्यं विनिवेदयामि ।

**द्रोणाचार्यः-** (उत्थाय) महाराजाय देव्यै पाण्डवमात्रे च, स्वस्तीत्युक्त्वा अतिरथिने शान्तनवाय, कुलगुरुकृपाचार्याय, अन्येभ्यो


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विशिष्टातिथिभ्यो दर्शकसमुदायाय च यथोचितमभिवादनं समर्पयामि। सम्प्रति राजकुमाराणां प्रधानाचार्यतया विज्ञापयामि यत् कुमाराः शस्त्रास्त्रसञ्चालने, दिव्यास्त्रप्रयोगे च पूर्णतया निपुणाः सन्ति । तत्र चार्जुनो विशेषतः शराणामादानसन्धानविमोक्षेषु, लाघवे, सौष्ठवे, शब्दवेधित्वे, हस्त्यश्वरथभूमिभ्यः प्रहारे चाऽप्रतिमो वर्तते । सुयोधनो भीमश्च नियुद्धे, गदाप्रहरणे, युधिष्ठिरः रथस्थः अस्त्रप्रहारे, कुन्तप्रहारे च, नकुलसहदेवौ भूमौ, रथे, अश्वे च स्थित्वा करवालप्रहारे च, युयुत्सु-दुश्शासन-दुस्सहप्रभृतयो भर्तृदारका अपि शरकुन्त-शक्तितोमरखड्गप्रभृतीनामस्त्रशस्त्राणां प्रयोगकलायाम्, एकलयुद्धे, सङ्कीर्णयुद्धे च प्रवीणा वर्तन्ते । दिव्यास्त्रधारणस्य हेतोरपि कुमाराणां शौर्यमतुलनीयं दरीदृश्यते ।

**कृपाचार्यः-** प्रधानाचार्यस्य सुशिक्षया, सततसाधनया च दिव्यास्त्रसन्धानमोक्षणकुशलाः महारथिनः कुमाराः अभीरवः पुरोगाश्च संवृत्ताः सन्ति । अकल्पनीयः खलु दिव्यास्त्रमहिमा । तथा हि-

वह्न्यस्त्रं वह्निवर्षं भवति च जलदं भूरि पर्जन्यमस्त्रं
वायव्यास्त्रात् प्रयुक्तात् प्रसरति च समीरः समन्ताद् नितान्तम् ॥
ब्रह्मास्त्रं ध्वंसकर्तृ-त्रिभुवनमपि यद् ब्रह्मणा शक्तिवाहं
किङ्कर्तुं हि क्षमं नो समरभुवि प्रयुक्तं च दिव्यास्त्रजातम् ॥
दिव्यैरस्त्रैरन्तरिक्षं पिधातुं
सेतुं दीर्घं सागरे वाऽथ बद्धुम् ।
धीराः शूराः लीलया शक्नुवन्ति
किं वा शूराः पौरुषैर्नाप्नुवन्ति ॥

**द्रोणाचार्यः-** कुमारा अवहिता भवन्तु युद्धकौशलप्रदर्शनाय । पश्यन्तु वृक्षस्य उपरिभागे कृत्रिमो भासो विद्यते । एतल्लक्ष्यं भवद्भिर्वेद्धव्यम् । तत्पूर्वं कुमाराः शरप्रयोगादिकलाः प्रदर्शयन्तु ।

(तदनु बद्धाङ्गुलित्राणाः, बद्धवर्माणः, बद्धतूणाश्च धानुष्काः कुमाराः प्रविशन्ति) ।

(कार्यसञ्चालनसूचकः घण्टानादः श्रूयते ।)

**युधिष्ठिरः** प्रविश्य मञ्चस्थान् प्रणमति। शरान् प्रक्षिप्य नभसि वर्तुलं पुष्करिणीबिम्बं निर्माति । तदनु रथे स्थित्वा प्रतिपक्षस्य शरकरवालाकुन्तप्रहारान् लघुहस्ततया छित्त्वा, शिरः परावर्त्य च विफलयति ।)

**दुश्शासनः** प्रविश्य रथसञ्चालनकलाः प्रदर्शयति ।)



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नकुलसहदेवौ कौतुकावहं करवालप्रहारकौशलं, प्रतिकरणपाटवञ्च प्रदर्शयतः । अन्ये कुमाराश्च समूहोपसमूहान् परिकल्प्य विचित्राः रथगतीः, हस्त्यश्वरथचालनकलाः, शरमोचनकौशलञ्च प्रदर्शयन्ति । यच्च दृष्ट्वा प्रेक्षागारस्य रङ्गशालाऽजिरस्य च दर्शका विस्मिताः सन्तः कुमारान् जय जयेति ध्वनिभिरभिनन्दन्ति ।

**दुर्योधनः-** (आचार्यसम्मुखमेत्य) अहं गदायुद्धकौशलं प्रदर्शयामि । अत्र प्रतियोद्धा भीमो भवितुमर्हति ।

**द्रोणाचार्यः-** कुमार सुयोधन, प्रतिद्वन्द्वितायै भीममेव किमर्थं वृणुषे ?

**दुर्योधनः-** आचार्य ! भीमः सर्वथा शिक्षायां, सामर्थ्ये चाऽस्मान् स्पर्द्धते । जानातु स इदानीं सुयोधनस्य युद्धकौशलं, प्रहारकलाञ्चेति ।

**भीमः-** आचार्य, अहमपि अनेन कापटिकेन, द्वेषिणा अमर्षिणा च सह स्पर्द्धितुं कामये । एष दुर्बुद्धिर्जानातु भीमस्य शौर्यं, कौशलञ्च । (गदामुत्तोलयति) ।

**दुर्योधनः-** भीम ! कथम् अतिमात्रं विकत्थसे, इदानीमेव ते दुर्भाषिणो वदनं भनज्मि (अग्रे वर्धते) ।

(भीमः किञ्चिद् वक्तुमीहते, युधिष्ठिरस्तं वारयति)

**आचार्यः-** कुमार सुयोधन ! कुमार भीम ! शृणुतम् । एतत् क्रित्रिमयुद्धं वर्तते, तदपि स्निग्धस्य उपरि । संयमिततया कटेरुपरि एव प्रहर्तव्यम् । विशेषतो विपक्षस्य प्रतिरोधनायैव गदा प्रहर्तव्या । अमर्षेण, कोपेन वा नेति बुद्धेथाम् ।

(भीमो दुर्योधनश्च नभसि गदां घूर्णयतः)

**द्रोणाचार्यः-** भो भीम ! भो सुयोधन ! अधुनैव ब्रूत- नियमान् परिपाल्य क्रीडथो वा नेति ?

**उभौ-** आचार्य ! प्रहारनियमान् अनुसृत्यैव प्रहरिष्यावः ।

**आचार्यः-** एवं चेत् प्रहारकौशलं प्रदर्श्यताम् ।

(तदनु रङ्गमञ्चे गदाधरयोः भीमदुर्योधनयोः प्रवेशः)

**भीमदुर्योधनौ-** वामदक्षिणभुजाभ्यां दक्षिणवामभुजौ प्रताड्य दक्षिणकरेण गदां भ्रामयन्तौ परस्परं प्रहरतः ।

**धृतराष्ट्रः-** भूयो भूयश्चट्चटद्भीमघोषः
भित्तीः स्पृष्ट्वा वर्धमानोऽस्ति विष्वक् ।
पक्षे को वा कोऽस्ति द्वन्द्वे विपक्षे
भावी जेता को भवेद् ब्रूहि भ्रातः ॥


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**विदुरः-** देव, किं वा ब्रूयाम्, यतो हि -
मैत्रीभावात् क्रीडनीयाऽस्ति क्रीडा
शत्रुत्वात् किं क्रीडमानेव भाति ।
भीमो ज्येष्ठस्त्वत्सुतः स्पर्द्धमानौ
जेता कः स्याच्चेति वक्तुं न शक्यम् ॥

**अश्वत्थामा-** अहो दर्शनीयतमं प्रहारकौशलम् । तथा हि-
अभिद्रुतिश्चङ्क्रमणं, प्रवञ्चनं
**रिपोः** स्तनौ निर्दयताडनञ्च ।
विधाय रङ्गे चरतः कुमारौ
जयैषिणौ किं द्विरदाविव स्तः ॥
(अत्रान्तरे दर्शकमध्यात् भीम ! भृशं प्रहर प्रहर, दुर्योधन ! निर्दयं प्रहर प्रहरेति सङ्कुलध्वनयः प्रसरन्ति । रङ्गभूः क्षुब्धार्णव इव दृश्यते)

**द्रोणचार्यः-** (अश्वत्थामानं लक्ष्यीकृत्य) वत्स, रङ्गभूमौ कोलाहलः प्रसृतः । भीमदुर्योधनयोः प्रहारो युद्धे रूपान्तरित इति तर्कये । अविलम्बं निवारय ।
(अश्वत्थामा वेगेनैत्य भीमदुर्योधनयोः हस्तौ अवरुद्ध्य युद्धं निवारयति)

**द्रोणाचार्यः-** आचार्य कृप ! सर्वेऽपि कुमाराः शस्त्रास्त्रप्रयोगकुशलाः सन्ति । सर्वेषां प्रयोगकौशलं द्रष्टुमसम्भवम् । अत्र धनुःकौशले, दिव्यास्त्रप्रयोगे चार्जुनः अप्रतिमोऽस्ति । एतदीयं कौशलमवलोकयितुं महाराजप्रभृतयः उत्कण्ठिता वर्तन्ते । अतः अर्जुनमाह्वयतु अस्त्रकौशलप्रदर्शनाय ।

**कृपाचार्यः-** दर्शकमहोदयानाम् आग्रहेण, प्रधानाचार्यस्य निर्देशनं प्राप्य च अहमधुनाऽस्त्रप्रयोगदक्षतां प्रदर्शयितुं कुमारम् अर्जुनं निर्दिशामि । असौ रङ्गभूमौ दाक्ष्यं प्रकटयतु ।
(अर्जुनो धनुरुत्तोल्य उत्तिष्ठति । सर्वान् प्रणमति । दर्शकमध्यतः करतलध्वनिः प्रसरति ।)

**दुर्योधनः-** कुलगुरो ! अस्मानुपेक्ष्य लक्ष्यवेधनाय कथमर्जुनः पुरस्सार्यते । एतदनुचितम् । अत्र कुमारेषु सर्वेष्वपि ज्येष्ठो युधिष्ठिरो वर्तते । अहमपि ज्येष्ठो राजपुत्रः । मर्यादाक्रमस्य आधारेणाऽपि युधिष्ठिरेण, मया, मध्यमपाण्डुसुतेन वा क्रमशो लक्ष्यवेधनम् उपयुक्तं सेत्स्यति ।

**विदुरः-** कुमार सुयोधन ! त्वं किमर्थं कुलचार्यादिभिराधृतां परम्परां भङ्क्तुमिच्छसि ? । तव सामर्थ्यम्, असामर्थ्यञ्च आचार्या जानन्ति । कुमारस्य अर्जुनस्य क्षमतां विचार्यैव एभिरसावाहूतोऽस्ति ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**दुर्योधनः-** महामन्त्रिन् भवान् अस्मदन्नमुपभुज्याऽपि पाण्डवानां पक्षमेव पुष्णाति । भवतः पाण्डवपक्षपातित्वम् अस्माभिरवगतम् । अतो भवते किञ्चिन्निवेदनं बालुकायां जलपातनवद् निरर्थकमेव ।

**भीष्मः-** (उत्थाय) कुमार सुयोधन ! स्वल्पे विषये कथं विवदसे ? त्वं चापल्यं कुलमदं, बलमदं मात्सर्यञ्च प्रकटयसि । चपलः, गर्वितो मत्सरश्च जनो न कदाचित् सफलायते । तथाऽपि वरीयताक्रमेण युधिष्ठिराय भीमाय तुभ्यं च लक्ष्यवेधनस्य अवसरं प्रदातुं कुलाचार्यमहम् अनुरुणध्मि ।

**कृपाचार्यः-** कुरुकुलसंरक्षकस्य, अतिरथिनो महात्मनो भीष्मस्य अनुरोधं स्वीकृत्य वरीयताक्रमेण लक्ष्यप्रहाराय युधिष्ठिरादीन् आह्वयामि । अर्जुन ! भवान् प्रतीक्षतां कतिचित् समयान् । अधुना ज्येष्ठराजकुमारो युधिष्ठिरो रङ्गभुवि आगत्य लक्ष्यप्रहरणं सफलयतु ।

**द्रोणाचार्यः-** युधिष्ठिर ! अत्राऽऽयाहि ।

**युधिष्ठिरः-** (उत्थाय) ज्येष्ठपाण्डुसुतोऽहं सर्वान् आचार्यादीन् सश्रद्धम् अभिवादये ।

**द्रोणः-** यशस्वी भव । इदानीं त्वं किं पश्यसि ?

**युधिष्ठिरः-** अत्रभवन्तम्, रङ्गशालायां विद्यमानं विपुलतरुम्, एतदुपरि लम्बमानं भासशकुन्तं च पश्यामि गुरो !

**द्रोणः-** अपसर, त्वं लक्ष्यं वेद्धुं न प्रभवसि । भीम ! आगच्छ ।

**भीमः-** (उत्थाय) गुरो ! एषोऽहमस्मि । (प्रणमति)

**द्रोणः-** अस्यां रङ्गभुवि त्वया किं दृष्टम् ?

**भीमः-** वृक्षस्य पुरोभागः,यत्रान्तरितो भासपक्षी च मम दृष्टौ ।

**द्रोणः-** अपेहि । (भीमः अपसरति ।) कुमार सुयोधन ! अत्राऽऽयाहि ।

**सुयोधनः-** (उत्थाय) अयमस्मि आचार्य !

**द्रोणाचार्यः-** अपि त्वं लक्ष्यवेधनाय तत्परः ?

**सुयोधनः-** कथं न गुरो !, सहजतया लक्ष्यं पातयामि ।

**द्रोणाचार्यः-** तर्हि कथय । अत्र त्वया किं किं दृष्टम् ?

**सुयोधनः-** आचार्यो दृष्टः, वृक्षो दृष्टः, शाखाश्च दृष्टाः ।

**द्रोणाचार्यः-** लक्ष्यं न दृष्टम् ?

**सुयोधनः-** (निपुणं निरीक्ष्य) भासपक्षी लक्ष्यमस्तीति दृष्टम् ।

**द्रोणः-** अपसर, कथनं, लक्ष्यवेधनञ्च पृथक् पृथक् कर्मेति जानीहि । (दुर्योधनः हूमिति दीर्घं निःश्वस्य आलोहितनयनाभ्यां गुरुवर्गं पश्यन् अपसरति ।

**द्रोणाचार्यः-** अर्जुन ! सम्प्रति तव पौरुषप्रदर्शनस्य पर्यायः । लक्ष्यं संविध्य गुरुवर्गस्य मोदमावह ।


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(अर्जुनो बद्धगोधाङ्गुलित्राणः काञ्चनकवचभृद् धनुरुद्यम्य उत्तिष्ठति। सर्वान् प्रणम्य धनुषि शरं सन्धत्ते।)

**दर्शकगणः-** धन्वी शूरो नैजकार्येऽवधानः,
लक्ष्ये निष्ठः, क्षिप्रकारी च धीरः।
जानीमोऽसौ लक्ष्यवेधे प्रभुः स्यात्,
शूरो धीरः कुत्र वा निष्फलः स्यात्॥

**द्रोणः-** अर्जुन कथय साम्प्रतं त्वं किं पश्यसि ?

**अर्जुनः-** आचार्य ! साम्प्रतमहं भासस्य ग्रीवामात्रं पश्यामि।

**द्रोणः-** तर्हि शरपातनेन तद् दर्शय।

(अर्जुनः शरं प्रहृत्य भासपक्षिणो गलं छिनत्ति। पक्षी छिन्नग्रीवो भूत्वा भूमौ पतति। सर्वे साधुवादेनार्जुनम् अभिनन्दन्ति।)

**द्रोणः-** नैतावन्मात्रेण तव परीक्षा पूर्णा भवति। रङ्गभुवं पश्य- कुत्रचिद् रज्जौ गव्यविषाणः लम्बितः, कुतश्चिल्लोहसूकरः, व्यात्ताननः भ्रमति, पर्वताकारिकायां भित्तौ मध्यमसूक्ष्म-सूक्ष्मातिसूक्ष्माणि लक्ष्यचित्राणि स्थाने स्थाने सन्ति। सर्वाणि वेधय।

**अर्जुनः-** यदाज्ञापयत्याचार्य। (तदनु अर्जुनेन सौष्ठवेन स्फूर्त्या च सूक्ष्मातिसूक्ष्माणि लक्ष्याणि सहजतया विद्धानि। शूकरमुखे युगपदेव पञ्चबाणाः प्रवेशिताः। गव्यविशेषे एकविंशतिर्बाणाः पातिताः। अर्जुनस्य हस्तलाघवं लक्ष्यपातनगौरवञ्च वीक्ष्य सर्वे विस्मयान्विता अभवन्।

**द्रोणः-** कुमार अर्जुन ! साधु साधु। त्वया गुरोः निर्देशनं सम्यक् प्रपूरितम्। अद्य मम शिक्षा सफलायिता।

**अर्जुनः-** (सर्वान् प्रणमन्) अनुगृहीतोऽस्मि गुरुदेव !

**द्रोणः-** अर्जुनो दिव्यास्त्राणि च प्रकटय। तत्र प्रथमम् अग्न्यास्त्रम्।

(अर्जुनो धनुषि शरं संयोज्य अग्न्यास्त्रं प्रकटयति। मञ्चस्याग्रभागे अग्निः प्रज्ज्वलति, सर्वे भीत्या किंकर्तव्यमूढा भवन्ति।

**द्रोणः-** पर्जन्यास्त्रेण शमय।

(अर्जुनः पर्जन्यास्त्रेण जलं प्रवर्ष्य अग्निज्वालां शमयति।

**द्रोणः-** वायव्यास्त्रमाविर्भावय।

(अर्जुनो वायव्यास्त्रमाविष्करोति, सर्वत्र समीरः प्रसरति।

**द्रोणः-** पर्वतास्त्रेण शमय। (अर्जुनः पर्वतास्त्रं प्रकटय्य वा वात्यां शमयति।

**द्रोणः-** नागास्त्रमाविर्भावय (अर्जुनो नागान् आविर्भावयति।)

**द्रोणः-** गारुडास्त्रेण विद्रावय। (अर्जुनो गारुडास्त्रेण नागान् विद्रावयति।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**द्रोणः-** जलकुल्यामाविर्भावय । (अर्जुनो जलकुल्यां प्रकटयति)

**द्रोणः-** कुल्यायां शरसेतुमाविर्भावय । (अर्जुनः शरमाध्यमेन सेतुमाविर्भावयति ।

**द्रोणः-** सेतुं भञ्जय । (अर्जुनः शरान् प्रयुज्य सेतुं भनक्ति ।

(अर्जुनस्य वीरोचितसाहसिकलक्ष्यवेधनसफलतया, दिव्यास्त्रप्रहरणदक्षतया च प्रभाविताः सभासदस्तं साधुवादेन अभिनन्दन्ति, जयघोषञ्च उच्चारयन्ति ।)

**द्रोणः-** अहं कुरुराज्यरक्षकं गाङ्गेयं भीष्मम्, महाराजम्, अन्यान् सभासदो देशाद् विदेशाच्च उपस्थितान् अतिथिगणांश्च साक्षिणः कारयित्वा उद्घोषयामि यत् साम्प्रतम् अर्जुनेन समो धनुर्धरो विश्वस्मिन् विश्वे कोऽपि न वर्तते ।

(तदनु रङ्गमञ्चे विजयघोषः प्रसरति । विजयवाद्यानि वाद्यन्ते । अस्मिन्नेवावसरे मञ्चद्वारि घनगर्जितमिव गभीरं भुजताडनं श्रूयते । सर्वे द्वारभुवमवलोकयन्ति । कश्चन कुण्डलद्योतिताननो रविरिवोज्ज्वलो ज्वलन इव तेजस्वी, बद्धकवचः, सधनुर्निस्त्रिंशो युवा अन्तः प्रविशति । अधः सर्वसाधारणदर्शकाः कौतुकाविष्टा दृश्यन्ते । धनुर्धरः युवा प्रविश्याऽश्रद्धयेव सभ्यानाचार्यांश्च नमति ।)

**धानुष्को युवा-** भो आचार्य ! प्राक् पुरस्ताद् न दृष्ट्वा
धानुष्कं तं सर्वश्रेष्ठं न ब्रुत ।
कोदण्डे वा मल्लयुद्धेऽपि ह्येनं
जेतुं शक्तः कोऽस्ति सभ्याः शृणुध्वम् ॥
लक्ष्यं किं किं विद्धवानेष योद्धा
तत्तत्सर्वं सत्वरं सम्भिनद्मि ।
एतं मञ्चे चाह्वये द्वन्द्वयुद्धे
यः स्याज्जेता सर्वश्रेष्ठः स भावी ॥

**दुर्योधनः-** (सहर्षमुत्तिष्ठति) वीरवरं युवानं वयम् अभिनन्दयामः ।

(प्रणमति, आलिङ्गति च । तदनु दुश्शासनप्रभृतयो भ्रातरश्च नवप्रवेशिनं युवानं परिवेष्टयन्ति ।)

**कृपाचार्यः-** भो धन्विन् !
कस्त्वं कस्मिन् राजवंशे प्रसूतः,
केनाऽऽहूतो दिव्यमस्त्रं कुतोऽभूत् ।
एते सर्वे राजपुत्राः कुलीनाः
न स्पर्द्धन्ते राजपुत्रान् विहाय ॥


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

धानुष्कोऽसौ कौरवः पाण्डुपुत्रः
कुन्त्यास्तुष्टेर्वर्धकः शुद्धवंश्यः ।
स्वीयं वंशं राजसम्बद्धमेव
पित्रोर्मामाद्यञ्च नो ब्रूहि वत्स !
श्रुत्वा त्वत्तो वंशवृत्तं यथार्थं
योद्धव्यं वा नैव योध्यं वदामः ।
उच्चे वंशे सम्भवा राजपुत्रा
नो युद्ध्यन्ते नीचवंश्येन साकम् ॥
(कृपाचार्यवचनं श्रुत्वा कर्णो व्रीडानतोऽभूत् ।)

**कर्णः-** आचार्य ! मम भुजबलमेव कुलम् । जनाः मां कर्ण इति व्याहरन्ति ।

**दुर्योधनः-** (सरोषमुत्थाय) आचार्य ! राज्ञां त्रिविधा योनिर्भवति- कुलम्, शौर्यं, सैनापत्यञ्च । शौर्यस्य कारणादेष युवाऽपि राजैव । तथापि यदि भवन्तो राजभिः सह राजकुलमेव स्पर्द्धनीयमिति वदन्ति चेदहम् अधुनैवामुम् अङ्गराज्येऽभिषेक्ष्यामि । (ततो दुर्योधनो राज्ञा, गाङ्गेयेन च सहामन्त्र्य कर्णं काञ्चनसिंहासने संस्थाप्य, राजोचितचिह्नाऽऽभरणादीनि परिधाप्य ब्राह्मणद्वाराऽभिषिञ्चति ।

**दुर्योधनः-** अङ्गराजस्य जयः, अस्मन्मित्रस्य जयः । (जयघोषो भूरि प्रसरति ।)

**कर्णः-** राजन् ! राज्यप्रदानसदृशं किं ददानि ?

**दुर्योधनः-** अविच्छिन्नसख्यम् ।

**कर्णः-** एवमस्तु । (तदङ्गीकरणस्य पश्चादुभौ परस्परमाश्लिष्य मुदमापतुः ।)

**दुर्योधनः-** आचार्य ! अङ्गदेशस्य राज्ञा मन्मित्रेण सह साम्प्रतमपि अर्जुनो योद्धुं न प्रभवति किम् ?

**कर्णः-** रङ्गभूः सर्वसामान्या भवति । शौर्ये बाहुबले च यः श्रेष्ठो दृश्यते स एव मान्यो भवति । अर्जुन ! त्वं वृथा शूरो वर्तसे, अन्यथा आहूताः शूराः क्षत्रियास्तूष्णीं नावलम्बन्ते स्म । लालाटिकैस्तव वृथा शौर्यं प्रचारितम् ।

**अर्जुनः-** कर्ण ! अनाहूतो वृथाजल्पकश्च जनो निन्दनीयान् लोकान् प्राप्स्यति । मया हतस्त्वमपि निन्दनीयान् लोकान् प्राप्स्यसि ।

**कर्णः-** दुर्बलशस्त्रेण, वाक्प्रपञ्चेन च मां न प्रतारय । शरैर्जल्प । पश्य मे बलम् । अधुनैव गुरूणां समक्षं त्वच्छिरः पातयामि ।

**अर्जुनः-** मा प्रलप । द्रुतमेव तवेच्छा पूरयिष्यते । मच्छरैश्छिन्नमूर्धा शयिष्यसे ।

**कर्णः-** अर्जुन ! अलं प्रलापेन । कश्चिच्छिन्नमूर्धा शयिष्यते इति तु सर्वे



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्रक्ष्यन्त्येव ।

(स धनुरुत्तोलयति, अर्जुनश्च गुरुभिः सह सम्मन्त्र्य धनुरादत्ते, मौर्वीमाकर्षति च । तदनु एकत्रार्जुनः, एतस्य समर्थने भीष्मद्रोणकृपाचार्याः, अपरत्र कर्णः, एतस्य सहयोगाय दुर्योधनप्रभृतयः शतं धार्तराष्ट्राश्च धृतधनुषोऽवर्तन्त । उपस्थिताः प्रेक्षकाः अर्धमर्धं पाण्डुपुत्रपक्षे, कर्णदुर्योधनपक्षे च विभक्ता भवन्ति ।)

**अर्जुनः-** कर्ण ! सावधानो भव । तव गर्वापहाराय आगतोऽस्मि ।

**कर्णः-** अर्जुन ! सावधानो भव । पश्यन्तु रथिनो मामकीनं शौर्यं, हस्तलाघवञ्च । (उभौ धनुषि शरं सन्धाय प्रहाराय मण्डलाकारतया भ्रमतः)

**कुन्तीः-** नवधानुष्कं नियुक्तं निरीक्ष्य (आत्मगतम्) एष दिव्यकवचकुण्डलान्वितो मध्यदिनभास्करवत् तेजस्वी मत्सुत एव कानीनः, लोकलज्जावशाद् मया परित्यक्तः । हा धिक् ! किं करवाणि, कथमेतद् युद्धं निवर्तेत ! मम कारणाद् भ्रातरौ परस्परं युद्ध्येते (मूर्च्छति) ।

(मञ्चे किमापतितम् ! किमापतितमिति कलरवः प्रसरति । ततः परिचारिकाः विश्रामाय कुन्तीं नयन्ति । प्रहाराय सन्नद्धावपि कर्णार्जुनौ मण्डलानि चरन्तावेव तिष्ठतः । पक्षद्वये विभक्ताः प्रेक्षकाः 'कर्ण ! प्रहर प्रहर, अर्जुन ! प्रहर प्रहर ! कथं विलम्बसे' इत्याम्रेडितं जल्पन्ति । अत्रान्तरे पुत्र ! पुत्र ! त्वं कुत्रासीति कथयन् यष्टिसहायः अधिरथः प्रविशति ।)

**कर्णः-** (आत्मगतम्) पिता प्राप्तवान् । (तदनु शरं तूणीरे प्रवेश्य पितुः पादयोः शिरो नमयति । अधिरथः सुतस्य राजोचितसम्मानं विलोक्य हर्षोत्फुल्लः शिरो जिघ्रन् परिष्वज्य च उत्तरीयेण अभिषेकार्द्रं पुत्रस्य शिरः प्रमृजति । भीमोऽधिरथस्य पादयोः पतितं कर्णं दृष्ट्वा तमुपहस्य अर्जुनं युद्धाद् विरतो भवितुं निर्दिशति ।)

**भीमः-** अर्जुन ! आगच्छ । किं त्वया न दृष्टमसौ सूतपुत्रोऽस्ति । अस्य कर्म रथचालनं, हयशुश्रूषणं, प्रतोदग्रहणञ्च समाजेन निर्धारितम् । त्वमनेन साकं युद्धायाऽनर्हः । अस्मै दुर्योधनेन अस्मद्द्वेषाद् अङ्गराज्यं दत्तम् । दाने राज्यं प्राप्तवान् जनो वस्तुतो राजा न मन्यते । राज्यं शौर्येणैव प्राप्तव्यं वर्धयितव्यञ्च ।

**दुर्योधनः-** (प्रकुप्य) वृकोदर ! त्वयैवं न वक्तव्यम् । क्षत्रियाणां बलं प्रधानम् । बलवान् अस्ति चेत् हीनजात्या सहापि क्षत्रियैर्योद्धव्यम् । आचार्यो


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्रोणः कलशोद्भवः, आचार्यः कृपः शरस्तम्भादुत्पन्नः । अन्येषां का वार्ता ? युस्माकं समेषां भ्रातृणां जन्मापि कथमभवदित्यहं जाने । एष युवा क्षत्रियगुणान्वितश्शूरोऽस्ति । अस्मै आक्षेपणं न सह्यम् । अनेन साकं युयुत्सवो न स्थ चेद् अस्माभिः सह युद्ध्यध्वम् ।

**कर्णः-** भो आचार्य द्रोण ! मया पूर्वं धनुर्विद्यायै भवानभ्यर्थितः । तदानीं राजपुत्रमात्रस्य गुरुणा भवताऽहं प्रत्यादिष्टः । अधुना प्राप्तविद्यः, प्राप्तराज्यः सन्नपि योधनायार्जुनं न सम्प्रेष्य पुनः प्रत्यादिष्टः । एतन्न प्रत्यादेशनम्, परं मम पराक्रमादुत्पन्ना भीतिर्वर्तते ।

**द्रोणः-** कर्ण ! एवं मा कथय । अस्माभिः समाजस्य राष्ट्रस्य नियमाः परिपालनीया भवन्ति । समाजो राष्ट्रञ्च त्वां प्रतोदग्रहणायैव आदिशतो न युद्धाय ।

**दुर्योधनः-** सर्वेऽपि आचार्याः पाण्डवपक्षपातिनः सन्ति । भवद्भ्यो न्यायप्राप्तेराशा पङ्गोः पर्वतारोहणवद् निष्फलायते ।

(युद्धचर्चया रङ्गमञ्चे कोलाहलः प्रसरति । अत्रान्तरे सूर्यः, अस्तमितो दृश्यते ।)

**कृपाचार्यः-** अधुना सूर्योऽस्तमितः । सभा विसर्जिता भवति ।

(सर्वे उत्तिष्ठन्ति)

**कर्णः-** भो आचार्याः, भो सभासदः, शृण्वन्तु । हीनोच्चकुलजं सामाजिकविभेदं भेत्तुमहम् आजीवनं युध्ये । मन्ये एवंविधो विभेदो दूरसमयं यावद् न जीवति ।

**दुर्योधनः-** अस्मिन् कार्ये त्वमेको नासि । अहमपि यथासंभवं सहयोगी भविष्यामि ।

**कर्णः-** उत्तममित्राद् एतदेवापेक्ष्यते ।

**दुर्योधनः-** मित्र ! साधयामस्तावद् विश्रामाय ।

भरतवाक्यम्

उच्चो नीचश्चेति वैषम्यदृष्टि-
र्नश्येद् मेलो वर्धतां व्यक्तिमध्ये ।
शान्त्या मैत्र्या वर्ततां मर्त्यसङ्घो
भूयाद् राष्ट्रे न्यायदो नेतृवर्गः ॥

"इति निष्क्रान्ताः सर्वे"



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

# शान्तिदूतम्

रचनाकारः प्रा. रामहरिदाहालः

**पात्रपरिचयः**

राजा- हस्तिनापुरस्य भूपः ।
श्रीकृष्णः- युधिष्ठिरस्य शान्तिदूतः ।
भीष्मः- कुरुपाण्डुकुमाराणां पितामहः ।
प्रतीहारी- राजसेवकः कश्चित् ।
दुर्योधनः- धृतराष्ट्रपुत्रो राजकुमारः ।
शकुनिः- दुर्योधनादिकुरुकुमाराणां मातुलः ।
कर्णः- दुर्योधनस्य मित्रम्, अङ्गनरेशः ।

## प्रस्तावना

योगीशवन्द्यो जगदेकबन्धुः सुरासुरैन्द्रैरपि ध्येयपादः ।
त्रिलोकधाता भवभीतिहर्ता कुर्याच्छिवं वः सततं महेशः ॥
प्रदद्याच्छिवं वः शिवो मङ्गलेशः ।
(नान्द्यन्ते प्रविशति सूत्रधारः) ।

**सूत्रधारः-** अलं विस्तरेण ! (नेपथ्याभिमुखं निरीक्ष्य) आर्ये यदि नाम नेपथ्यविधानं तदिहागम्यताम् । (प्रविश्य)

**नटी-** आर्यपुत्र ! इयमस्मि । आज्ञापयत्वार्यः किमनुष्ठेयम् !

**सूत्रधारः-** एषा पुरुकुलवंश्येन अजेयधानुष्केण पितामहभीष्मेण सरोषता भयस्य प्रज्ञाचक्षुषो धृतराष्ट्रस्य शान्त्याभिलाषुका परिषद् । सभासदश्च शान्तिकामिनः । तदर्थं प्रथमं शान्तिगीत्या सभासदः अभिमुखीक्रियन्ताम् । सम्प्रति हि -

प्रहर्तुकामैर्ननु वीरवर्यै-
रस्त्राणि शस्त्राणि च तैर्जितानि ।
न जातु जानन्ति हि दुर्हृदस्ते
पराभवं याति न सत्यपक्षः ॥

**नटी-** आर्यपुत्र ! सत्यमेव । सत्पक्षस्यैव विजयो भवति, नासत्यपक्षस्य । पश्यतु भवान्-

यत्रास्ति सत्यं विजयोऽस्ति तत्र


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तत्रास्ति शान्तिर्विजियोऽस्ति यत्र ।
एतद् द्रुतं बोधयितुं युयुत्सु-
र्नायाति गोष्ठ्यां किल शान्तिदूतः ॥

(इति निष्क्रान्तौ)

(तत्र प्रविशति राजसभां शान्तिप्रस्तावमादाय कृपाहृदयः शान्तिदूतः श्रीकृष्णः । एतेन साकं सात्यकिः, कृतवर्मा, अन्ये कतिचन वृष्णिप्रवराश्च । युवराजो दुर्योधनश्च सस्वागतमभ्यागतान् प्रवेशयति, तदनु दुश्शासनयुयुत्सुविंशतिप्रभृतयः कौरवाः कर्णशकुनिप्रभृतयः अन्ये बहुशो मण्डलेश्वराश्च ।

**सर्वे-** (उत्तिष्ठन्ति)

**राजा-** (उत्थाय) कुरुराजसभायां विशिष्टातिथये स्वागतं व्याहरामः ।

(अन्ये सभासदश्चोत्थाय किञ्चिच्छिरः अवनम्य प्रणमन्ति । श्रीकृष्णो राजानम्, राज्ञीम्, पितृस्वसारम्, अन्यान् सभासदश्च नमति । देवव्रतो भीष्मः, आचार्यो द्रोणः, कुलाचार्यः कृपः, महामन्त्री विदुरो बाल्हीकः सोमदत्तः सभासदश्च ससम्मानं निर्धारितम् आसनम् समधिवसन्ति ।)

**राजा-** भो कृष्ण ! भवानस्माकं सर्वमान्योऽतिथिः । अतो भवते गां मधुपर्कजलञ्च समर्पयामः ।

(कः कोऽत्र भो !)

**प्रतीहारी-** जयन्तु भर्तारः, आज्ञापयन्तु ।

**राजा-** अतिथये गां मधुपर्कं जलं चाहर ।

**प्रतीहारी-** यदाज्ञापयति देवः ! (निर्गच्छति)

**प्रतीहारी-** (प्रविश्य) देव ! आनीतानि निर्दिष्टानि वस्तूनि ।

**राजा-** वासुदेव ! विशिष्टातिथे ! स्वीकरोतु अभ्यर्थिनोपायनम् ।

**श्रीकृष्णः-** (सस्मितम् स्पृशति)

**राजा-** वासुदेवं कृष्णम्, अन्यानतिथींश्च हस्तिनापुरस्य राजसभायां प्राप्य वयं हृष्टाः स्मः । कृष्ण ! दूरागतो भवान् । श्रान्तो बुभुक्षितश्चेति विभावयामि । अन्नपानादिकमुपभुज्य अस्मदातिथ्यम् अनुमोद्यताम् ।

**दुर्योधनः-** वासुदेव ! भवदर्थे नैकविधान्यन्नानि, महार्घाणि वासांसि, उत्तमानि शयनोपकरणानि सज्जीकृतानि ।

**श्रीकृष्णः-** राजकुमार ! दूताः निर्धारितस्य स्वकार्यस्य सफलतायामेव भुञ्जते । यदि त्वमनुकूलव्यवहारेण अस्मान् कृतार्थयेस्तर्हि तदैव भोजनादिकं



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वीकुर्याम् ।

**दुर्योधनः-** कृष्ण ! एतन्न वाच्यम् । भावत्कमुद्देश्यम् उपयोगि न वेति विमृक्ष्यते । सम्प्रति भुज्यताम् ।

**श्रीकृष्णः-** राजकुमार ! अन्नानि प्रीत्या आपद्गतावस्थायां वा भुज्यन्ते । अस्मासु भवतः प्रेम नास्ति, आपद्गताश्च वयं न वर्तामहे ।
सम्प्रीतिभोज्यान्यन्नानि चापद्भोज्यानि वा पुनः ।
न च सम्प्रीयसे राजन् न चैवापद्गता वयम् । इति ।

**दुर्योधनः-** अस्मदातिथ्यस्य अस्वीकरणम् अस्मदवहेलनमेव । (श्रीकृष्णं सरोषं विलोकयति)

**श्रीकृष्णः-** यद् भवान् मनुते ।

**राजा-** अस्माभिर्विशिष्टातिथये विशिष्टमेव अशनजातं सम्पादितमस्ति । अस्मत् सन्तोषाय भवतैतद् भोक्तव्यमासीत् ।

**श्रीकृष्णः-** राजन् ! यदुद्देश्येन अहमागतस्तदुद्देश्यपूर्तिर्भवत्सहाय्येनैव सम्पद्यते । परं भवन्तः सहयोगाय तत्परा न दृश्यन्ते । अस्यां स्थितौ कथमहं भोक्तुं शक्नोमि ? तथा हि-
अशनं वसनादिसेवनं
क्रियते मित्रजनैः परस्परम् ।
यदि कापटिकी तु मित्रता-
ऽशनपानादि भवेत् कथं तदा ?

**राजा-** आस्तां तर्हि भोजनचर्चा । भवान् भ्रातृजस्य युधिष्ठिरस्य सन्देशमूढ्वाऽऽगतः इति शृणोमि । कीदृशः सन्देश आनीतः ? अत्र अस्मत्तो भवान् किंविधं सहयोगम् अपेक्षते ?

**श्रीकृष्णः-** राजन् ! भवान् प्रथितयशसः पुरुराजस्य वंशजः । चक्रवर्ती सम्राट् । अपराजेयो वीरः । पितामहस्य देवव्रतस्य संरक्षकत्वे भवानासमुद्रं पृथिवीं शास्ति । भवतोऽन्यायस्य सम्भावनाया लेशोऽपि भवितुं नार्हति ।

**राजा-** मूलसन्देशं श्रोतुमिच्छामि ।

**भीष्मः-** वत्स ! त्वरा न विधेया । असौ सर्वसमर्थः सन्नपि युद्धवारणाय शान्तिदूतो भूत्वा समागतोऽस्ति ।

**श्रीकृष्णः-** श्रूयताम्, पाण्डुयशोवर्धनोऽजातशत्रुर्धर्मराजः कथयति - 'समुद्रमेखलाया


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भूमेः सम्राजं पितृव्यं महाराजं प्रणम्य विनिवेदयामि यदहं शान्तिं कामये । भ्रातरश्च मे युद्धाय तत्परा न । यद्यपि वयमन्यायपूर्वकं निर्वासितास्तदपि युद्धात् कस्मै अपि लाभो न, पराजय एव मिलतीति विश्वसिमः ।

**राजा-** अग्रे अग्रे !

**श्रीकृणः-** महाराज ! बहुधा विचार्य भ्रतृभिः सह विमृश्य च वासुदेवोऽहं शान्तिदूतत्वेन प्रेषितः । स्वयं वासुदेवोऽपि त्रीनुपायान् निरस्य चतुर्थोपायस्य अवलम्बनम् अश्रेयस्करं मनुते । जनभावना च युद्धविरोधिनी वर्तते । वस्तुतोऽत्रभवानपि युद्धविरोधी एवेति वेद्मि ।

**राजा-** उपायान्तरेषु सत्सु युद्धं प्रवर्तयितुं को वा कामयते ? अग्रे अग्रे ।

**श्रीकृष्णः-** श्रूयताम्, चिरशान्तये, स्थिरशान्तये चास्माभिर्ग्रामपञ्चकमभि-याचितमस्ति । अस्मदिच्छिताः पञ्चग्रामाः सन्ति- इन्द्रप्रस्थः, वृकप्रस्थः, जयन्तः, वारणावतः, कश्चनापरो विपुलग्रामश्च ।

**राजा-** अग्रे अग्रे ।

**श्रीकृष्णः-** ग्रामपञ्चकस्य प्रस्तावनोद्देश्यमस्ति भ्रातृपञ्चकस्य कृते प्रतिभ्रातृ एकैकं ग्रामस्य आवश्यकताप्रदर्शनम् । यद्वा भवतां विचारेण विस्तीर्णक्षेत्रेषु पञ्चसु ग्रामेषु व्यवस्थापितेषु सत्सु वयं समरक्रीडाया विमुखा भविष्यामः ।

**भीष्मः-** साधु पौत्र, साधु । त्वं कीदृग् उदारोऽसि । न त्वत्समो दयालुस्तितिक्षुर्वा दृष्टः कश्चित् ?

**राजा-** कथ्यतामग्रे ।

**श्रीकृष्णः-** पूर्वं सञ्जयमाध्यमेनाऽपि एवंप्रकारकः सन्देशः प्रेषित आसीत् ।

**राजा-** स्मरामि । (दुर्योधनः किञ्चिद् वक्तुमीहते, कर्णः शकुनिश्च तं वारयतः) ।

**शकुनिः-** भागिनेय ! सन्देशं श्रुणु, अनन्तरं ब्रूहि ।

**श्रीकृष्णः-** (पत्रं विलोक्य पुनः सन्देशं वाचयति) अत्रभवता महाराजेन अन्यैर्भ्रातृभिः सहयोगिभिश्च एतद् नावध्येयं यद् युद्धात् विभीय शान्तिप्रस्तावः प्रेषितः इति । महारथिभिरतिरथिभिश्च सह रणकौशले वयं पश्चाद् न भवाम इत्यस्ति द्रढीयान् विश्वासः । यदि भवान् जनमतमुपेक्ष्य कतिचन अङ्गसिन्धुगान्धारेश्वरादिमण्डलेश्वराणां दुष्परामर्शैरात्मानं



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विजयिनमनुमिनोति तद् भवतो दिवास्वप्न एवास्तीति स्मारयामः ।

(कर्णः, शकुनिश्च असूयया श्रीकृष्णं विलोकयतः)

**राजा-** अहं युद्धप्रणयी नेति युधिष्ठेरेण न ज्ञातम् ।

**दुर्योधनः-** महाराज ! अस्मत् सैन्यचक्रस्य विशालतां निभाल्य भीत्यैव पाण्डवैः शान्तिप्रस्तावः प्रेषितोऽस्ति ।

**कृपाचार्यः-** युवराज ! भयाद् युधिष्ठिरेण शान्तिप्रस्तावः प्रेषित इति कर्हिचिदपि न चिन्तय ।

**भीष्मः-** अलं विवादेन । अवशिष्टसन्देश उच्यताम् ।

**श्रीकृष्णः-** शान्तिप्रस्तावेऽस्वीकृते यो दुष्परिणामो भावी, तस्य दोषः सर्वथा महाराजस्य शिरसि नर्त्स्यति । पुत्रभ्रातृसम्बन्धिविहीनं महाराजं विधवाः शालाश्च न शपेयुस्तथाऽस्मासु च युद्धप्रियताया आरोपो न भवत्विति धिया सद् विनिवेद्यते । अत्र निर्णयो भवदधीनः । स्नेहाभिलाषी युवराजो युधिष्ठिरः ।

विराटनगरस्य उपप्लव्याः स्कन्धावारतः ।

**भीष्मः-** सन्देशः सर्वैः श्रुत एव । युद्धस्य दुष्परिणामश्च सन्देशे निरूपितः । माहाराज ! शान्तिप्रस्तावः सर्वथाऽनुमोदनीयोऽस्तीति निवेदयामि । अत्रैव सर्वेषां हितमाहितं वर्तते ।

**विदुरः-** पितृचरणैः साधूक्तम् । शान्तिप्रस्तावस्य अनुमोदनादेव युद्धविभीषिका शाम्यति । कौरवपाण्डवराजकुमारेषु स्थायिमैत्री च सम्पत्स्यते ।

**दुर्योधनः-** पितामह ! एष शान्तिप्रस्तावो भर्त्सनप्रस्तावो न, वस्तुतः एष पलायनप्रस्तावोऽस्ति ।

**कर्णः-** मित्र युवराज ! एष न शान्तिप्रस्तावः, पलायनप्रस्ताव एव वर्तते ।

**दुर्योधनः-** (विहस्य) वासुदेव ! अस्माकम् अदम्योत्साहं विपुलसैन्यसमवायञ्च विलोक्य युद्धाद् भीतैः कुन्तीपुत्रैर्ग्रामपञ्चकं याचितम् । शूराः शौर्येण वसुन्धरां भुञ्जन्ते न तु याचनेन ।

**श्रीकृष्णः-** राजपुत्र दुर्योधन ! वीराग्रणीषु ईदृशमशोभनीयं मा व्यवहर । पाण्डवानां शौर्यं त्वं किं जानासि ? गाण्डीवी एकाक्येव सर्वं समरव्यूहं भङ्क्तुमलम् । एभिर्विपुलजनधननाशस्य भीत्यैव शान्तिरभिलषिता न भयादित्यवजानीहि ।

**दुर्योधनः-** वासुदेव ! भवान् पाण्डवपक्षपाती अतः एवं ब्रवीति । उद्यतेषु शस्त्रास्त्रेषु



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वादितासु रणभेरीषु श्रूयमाणेषु सिंहनादेषु कथमिदानीं शान्तिचर्चा ? अस्मात् स्पष्टं भवति पाण्डुसुता अस्माकम् अजेयसमरोद्यमाद् भीताः सन्ति ।

**धृतराष्ट्रः-** पुत्र दुर्योधन ! त्वं सत्परामर्शं न शृणोषि । सर्वेषां कल्याणायैव श्रीकृष्णेन युधिष्ठिरेण च शान्तये प्रस्तावितमिति बुद्धस्व । प्रस्तावमेतं स्वीकुरु । अन्यथा कुरुराजवंशस्य क्षयो निश्चित एव ।

**दुर्योधनः-** महाराज ! भवता मौनमवलम्ब्यताम् । मम सहयोगिनः सन्ति सहस्राधिका महारथिनः । को मां जेतुं प्रभवति ? राज्यप्राप्तये पाण्डवैरस्माभिः सह संयुध्य विजयः प्राप्तव्य एव । अन्यथा ते किमपि न प्राप्नुवन्ति ।

**श्रीकृष्णः-** कुरुसत्तम ! त्वम् उत्तमपुरुकुले जातोऽसि । तत् कथमसद्वृत्तिं प्रकटयसि ? दुराग्रहं त्यज, अपयशो न प्राप्नुहि । पाण्डवैस्सह सन्धिं विधेहि । सन्धिः सर्वेषां सर्वदा हितकारी भवति । पाण्डवैः केवलं पञ्चैव ग्रामाः याचिताः सन्ति । तत्रैव ते तुष्यन्ति । अन्यत् सर्वं साम्राज्यं चिरकालं त्वदायत्तं भविष्यति ।

**भीष्मः-** वत्स ! कुरुराजवंशस्य शममिच्छता श्रीकृष्णेन प्रस्तावितं सन्धिम् अनुमन्यस्व । एष त्वत्कृते स्वर्णावसरः । प्रस्तावोऽसौ धर्मार्थयोः आनन्दवर्धकः । एतदवसरे त्यक्ते त्वं कदापि शान्तिं न लप्स्यसे ।

**दुर्योधनः-** पितामह ! युधिष्ठरेण द्यूते राज्यं हारितमस्मभिर्जितमस्ति । विजितं राज्यं कः कस्मै प्रत्यर्पयति ? अद्य च भवान्, आचार्यः, कुलाचार्यः, अनन्यमित्रकर्णश्च अस्मत्पक्षे सन्ति । एतान् जेतुं देवा अपि न प्रभवन्ति । कथमिह को नु विजयी भूयः पराजिताय भूपाय राज्यमर्पयति ?

**श्रीकृष्णः-** (ईषद् रोषमभिनीय) दुर्योधन ! एष प्रस्तावस्त्वद्हितेऽस्ति न पाण्डवहिताय । परं सन्धये त्वमनिच्छुको वर्तसे । अत्र वयं किं कर्तु शक्नुमः ? त्वया रचिता कपटद्यूतक्रीडा देव्याः केशाभिमर्शनं लाक्षागृहदाहः, विषभोजनोपाहरणं छलेन राज्यहरणञ्चेति ।

**दुर्योधनः-** केशव ! पित्रा पूर्वमेव पाण्डवेभ्योंऽशभागः प्रदत्त इति यदुच्यते तत्तु पितुः अदूरदर्शितायाः प्रमाणम् । तदा वयं बालाः पराधीनाश्च । इदानीं युवानो बोद्धारश्च संवृत्ताः वयम् ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**श्रीकृष्णः-** दुर्योधन ! त्वं न बिभिहि, केवलं पञ्चैव ग्रामाः पाण्डवैरिष्टाः सन्ति ।

**दुर्योधनः-** जनार्दन ! मयि जीवति पाण्डुपुत्राः सूच्यग्रपरिमितमपि भूमिं प्राप्तुं न शक्ष्यन्ति । ग्रामपञ्चकस्य वर्ता दूरे आस्ताम् । ते स्वान् वीरान् मन्वते चेद् युद्धाय सन्नद्धा भवन्तु । शक्तिरस्ति चेदस्मान् विजित्य समग्रमेव राज्यं लभन्तां न ग्रामपञ्चकमात्रम् !

**विदुरः-** दुर्योधन ! हठं मा कुरु । त्वं पाण्डवैस्सह भाविनि महासमरे अवश्यं भूमिशायी भविष्यसि ।

**दुयोर्धनः-** दासीपुत्र ! त्वं कृतघ्नः, त्वं मम पिण्डं भुक्त्वा शत्रुपक्षं समर्थयसे ?

**विदुरः-** विज्ञेन अधर्मसभायां न स्थातव्यम् । अहं सत्वरं यामि । (श्रीकृष्णं महाराजं सभासदश्च प्रणम्य पदीयचिह्नानि राजकीयवस्त्राभूषणानि च त्यक्त्वा निष्क्रामति)

**श्रीकृष्णः-** राजन् ! अहम् ऋतं वच्मि, सर्वे सभासदश्च शृण्वन्तु- 'कुरुराजवंशस्य रक्षायै पाण्डवैः महान् त्यागो विहितः । तथापि असौ न बुध्यते । दुष्पुत्रवशगो राजा अचिरादेव स्ववंशस्य आमूलं नाशं श्रोष्यति ।

**दुर्योधनः-** केशव ! तवागमनप्रयोजनं समाप्तम् । शीघ्रमतः प्रतिष्ठताम् । अन्यथा भवन्तं बद्धुमपि वयं बाध्या भविष्यामः ।

**श्रीकृष्णः-** मूढ ! त्वया पाण्डवानां राज्यं न प्रत्यर्पितम् । अस्य फलं त्वं शीघ्रमेव सान्वयः सबान्धवश्च रणभूमौ शयित्वा लप्स्यसे । अतः परं युद्धक्षेत्रे एव आवयोः सङ्गमो भविष्यति । एतद् युद्धमेव शान्तिं स्थापयिष्यति । भो सभ्याः ! अन्यद् वः प्रियं किं करवाणि ?

(भरतवाक्यम्)

शरचयैर्हृतवैरिशिरोधरा
भुजबलार्जितभूरमणीप्रियाः ।
वसुमतीपतयोऽपि गता अतो
धरत भो ! मनुजाः ! शमसम्पदम् ॥

(इति निष्क्रामति) (इति निष्क्रान्ताः सर्वे) ॥



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

# शान्तिसंविदा

प्रा. रामहरिदाहालः

**पात्रपरिचयः**

प्रधाननायकः- शान्तिसंविदाकर्तृषुप्रधानः ।

प्रचण्डः- युद्धरतपक्षस्य प्रमुखः । माओवादिनामध्यक्षः । खड्का, जोशी, वाग्ले, गच्छादार, बास्तोला, नरहरिप्रभृतयः शान्तिवार्ताकर्तारः ।

प्रधानामात्यः- नेपालदेशस्य तात्कालिकः प्रधानमन्त्री ।

महानायकः- प्रधाननायक एव महानायकः ।

प्रतिपक्षिनेताः- प्रतिपक्षस्य आधिकारिको नेता ।

सिटौला- शान्तिसंविदाकर्तृष्वन्यतमः ।

## प्रस्तावना

ईर्ष्या वैरं कटुतरवचो लोभमोहौ मदाश्च
शान्तेरेते रिपव इति सम्बुद्ध्य चैतान् त्यजामः ।
शान्त्या सर्वं भवति सफलं मित्रता चैधतेऽतः
शान्तेः कार्यं सफलयतु यो भूतनाथो महेशः ॥

(नान्द्यन्ते प्रविशति सूत्रधारः ।)

**सूत्रधारः-** आर्यमिश्रान् किन्नु विज्ञापयामि । (विचिन्त्य) आः ! प्रगीतशान्तिमहत्त्वं शान्तिसंविदेति लघुनाटकं प्रदर्शनायोपयुक्तं मन्ये । (नेपथ्यमुखं निरीक्ष्य) आर्ये ! नेपथ्यविधानं प्रपूरितं चेदिहागम्यताम् ।

**नटी-** (प्रविश्य) आर्यपुत्र ! आगतास्मि आज्ञापयतु भवान् किमनुष्ठेयमिति ।

**सूत्रधारः-** आर्ये ! परिषदियं शान्तिं कामयते । तदस्याः परितोषाय शान्तिमधिकृत्य गीयताम् ।

**नटी-** बाढम्, (गायति)

शान्तिलतेयं मृदुला
पल्लवति फुल्लति फलति च मेलतः ।
वर्द्धनीयैषा लता ! सर्वैर्मेलननीरादेव !

**सूत्रधारः-** आर्ये साधु गीतम् । अस्मिन्नस्ति सभासदामिच्छा प्रतिबिम्बिता । (नेपथ्ये भीरुभयदो रवश्श्रूयते) आर्ये ! ज्ञातव्यं भवत्या, यत् कथमयं श्रुतिकर्कशो महारवश्श्रूयते इति ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**नटी-** (कर्णं दत्वा) आः ज्ञातम्, शान्तिविरोधिभिराग्नेयगोलकं विस्फोटितम् ।

**सूत्रधारः-** नेतारश्चिरशान्त्यै, लोकतुष्ट्यै च सन्ति प्रयासरताः ।
न सफलायते नु विरोधिनां विध्वंसनं किञ्चिदपि ॥

(निष्क्रान्तौ)

इति प्रस्तावना

## प्रथमं दृश्यम्

(ततः प्रविशन्ति कर्गजलेखनीहस्ताश्चिन्तितमुद्रा राजनेतारः)

**प्रधाननायकः-** भो सुहृदः ! सम्प्रति आन्दोलनकारिणामसन्तोषं विम्रष्टुं भवन्त आहूताः सन्ति । श्रूयते चेदानीं तैर्ग्रामीणाः बहवो युवानो जनसेनानाम्नि योद्धृदले प्रवेशिता इति । भ्रातः खड्का ! किमधुना श्रेयस्करं स्यात् ? शान्तये वार्तादलस्य सङ्घटनं वरं मन्ये ।

**खड्का-** भवता साधु तर्कितम् । वार्तादलसङ्घटनाय भवते पूर्णाधिकारोऽस्ति । दले के के समावेश्याः, कथं ते नियन्त्रणीया आनेतव्याश्च । तत्रास्माकं प्रस्तुतिः कीदृशी भविष्यतीति सम्यक् चिन्तनीयम् ।

**जोशी-** वार्तायाः नाटकं बहुधा दृष्टम् । नात्र सफलता लब्धा । जाल्मा वार्तायाम् उपस्थितिं प्रदर्श्य सैन्यसङ्घटनाय यतन्ते । दमनेनैवैतत् समाधातव्यम् । अन्य उपायो न दृश्यते ।

**वाग्ले-** नैतत् साधु, वार्ता जातुचिदपि त्याज्या न भवति । विना शान्तिवार्तां नैतेषां याचनानां सम्बोधनं भवति, न च जनयुद्धं समाप्स्यते ।

**गच्छदारः-** वार्ताया विकल्पो नास्ति । कियन्मात्रं सोढव्यम् । जनधनानां कियती क्षतिः सोढव्या । शान्तये युद्धरतः पक्षः प्रत्यावर्तनीय एव ।

**प्रधाननायकः-** राष्ट्रस्य प्रहरिणः प्रतिरक्षायै अपि असमर्थप्रायाः दृश्यन्ते । सर्वसाधरणा अकारणं मारिताः सन्ति । विरोधिपक्षे वाऽस्मत्पक्षे हतास्तु नेपालिन एव ।

**बास्तोला-** अधिकारसम्पन्नं वार्तादलमेकं सङ्घटयितव्यम् । सुरक्षणस्य विश्वासं प्रदाय नियतस्थाने युद्धरतपक्षो निमन्त्रियितव्यः ।

**प्रधाननायकः-** महेश ! कथय, युद्धरतपक्षस्य का का याचना पूरिताः काश्चावशिष्टा इति ।

**महेशः-** प्रधाननायक ! ते विद्यमानं संविधानं न
स्वीकुर्वन्ति संविधानसभायाः निर्वाचनं


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कामयन्ते । पञ्चाशदुत्तरोनविंशतितमस्य
नेपालभारतशान्तिमैत्रीसन्धेरसमानधारणानिरसनं, जलस्रोतः
सम्बद्धमहाकालीसन्धेर्निराकरणञ्चाभियाचन्ते ।

**प्रधाननायकः-** असम्भवयाचनां प्रस्तुत्य व्यक्तिहत्यां प्रबर्ध्य च युद्धयन्तीति हेतोरेते जाल्मा इति निश्चितम् । एते वस्तुतो निर्मूलनीयाः प्रतिभान्ति, तदपि वार्तायां तिष्ठन्ति चेद् यथासम्भवं कतिपयाः याचनाः प्रपूरयितुं शक्ष्यन्ते ।

**सेनाधिकारी-** (प्रविश्य, अभिवादनपूर्वकं पत्रं ददाति) प्रधाननायक ! एतत् प्रधानसेनापतेः पत्रमस्ति गृह्यताम् । (समर्पयति)

**प्रधाननायकः-** (गृहीत्वा नरहरये समर्प्य च) नरहरे ! पत्रं वाच्यताम् ।

**नरहरिः-** (वाचयति) प्रधाननायक ! शान्तिवार्तायां भवन्तः प्रयतमानाः सन्तीति प्रमोदस्य विषयोऽयम् । शान्तिवार्ता निष्कर्षे प्राप्नोत्विति वयं कामयामहे । परं गुप्तचरप्रभृत्याकलनेन सेनया यद् ज्ञातं ततो निष्कर्षेऽस्मिन् सेना प्राप्तास्ति, यदान्दोलनकारिणो हत्याहिंसाऽऽतङ्कं प्रवर्ध्य संविधानं राजतन्त्रञ्च विफलयितुं चेष्टन्ते। जनसर्वकारनाम्ना स्वेच्छाचारितया दण्डनं विदधानाः सन्ति । सेनाया अधिकारसङ्कोचने राष्ट्रस्य गरिम्णः स्खलनञ्च यथा न भवति तथा वार्ता विधास्यत इति सेना विश्वसिति। आवश्यकतायामनुभूतायां सर्वविधसहयोगाय सेना तत्परास्तीति कथ्यं प्रधानामत्याय च सूचितं वर्तते ।

भावत्कः
नेपालिसेनायाः प्रधानसेनापतिः

**प्रधाननायकः-** नेपालीसेनाऽपि शान्तये त्वर्यमाणास्ति । वार्तायाः विफलतायामतः अपि जनधनानां क्षतिर्भविष्यतीत्यहं मन्ये । तदवसरे सेना परिचालनीयैव । प्रथमं वार्तायाः सफलतायै ध्यातव्यम् । अहं प्रधानामात्येन राष्ट्रियदलैः सुरक्षानिकायप्रभृतिभिश्च मन्त्रयितुं यामि । भवन्तो विचारयन्तु । (इति निष्क्रान्तः)

**नरहरिः-** अद्य विविक्ते स्थित्वा पृथक् पृथग् विचारयामः श्वो वा परश्वो मेलितारः ।

सर्वे- एतदेवोपयुक्तं स्यात् । (इति निष्क्रान्ता)



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

## द्वितीयं दृश्यम्

प्रधानामात्यस्य सभाकक्षः । तत्र प्रविशन्ति प्रधाननायकः प्रधानामात्यः, अन्ये राजनेतारश्च ।

**प्रधानामात्यः-** प्रधाननायकमहोदय ! अन्ये सहयोगिनश्च ! अहमधुना सूचयामि सर्वकारीयवार्तादलं द्वन्द्वरतेन माओवादिसमूहेन सह वार्तां कुर्वदस्ति। अधुना यावदधिगतायाः सूचनाया अनुसारेण माओवादिसमूहः स्वीययाचनायामीषदपि परिवर्तनं नेहते । संविधानस्य संशोधनं नेच्छति, परं याचनायाः स्वरूपं वर्धयति ।

**राजपुरुषः-** प्रधानामात्य ! महाननर्थो घटितः ।

**प्रधानामात्यः-** किमभवत् ?

**राजपुरुषः-** शान्तिवार्ता भङ्गा । माओवादिनो वने पलायिताः । अधुना तैर्द्विचत्वारिंशज्जनपदेषु प्रहरिकेन्द्राणि सेनाशिविराणि चाक्रान्तानि ।

**प्रधानामात्यः-** एतत्तैरात्मघाति कार्यं कृतम् । मन्ये सङ्कटकालम् उद्घोष्य सेनायाः परिचालनादन्यो नास्त्युपायः कश्चन ।

**प्रधाननायकः-** सम्यक् निर्देश्य सेना परिचालनीयेति ममापि विचारोऽस्ति । भवन्तः किं कथयन्ति ?

सर्वे- एतदेवोपयुक्तं भवति ।

(सर्वेऽपि निष्क्रान्ताः)

## तृतीयं दृश्यम्

(नेपथ्ये बम्बास्त्रस्य भुसुण्डिकाध्वननस्य, 'छिन्धि छिन्धि भिन्दि भिन्दि, एतं न त्यज, असौ वर्गशत्रुः, म्रिये, हा हताः स्मः' इत्यादयः चीत्कारशब्दाः श्रूयन्ते)

**गुप्तचरः-** (प्रविश्य) नेपालिसेनायाः परिचालनस्य पश्चाद् युद्धरतपक्षोऽपि उग्रतया आक्रमणरतोऽस्ति । अस्मद्गुप्तचरेषु अनुसन्धानरतेष्वपि सफलता न गण्यैव । प्रछन्नयोधिना क्रियाकलापाः बहुशो नैवाभिज्ञाताः । सूचकस्याक्षेपेण सर्वसाधारणास्तत्रसिताः, उच्छिन्नसम्पदः कारिताः, कर्तितहस्तपादा विहिताः, मारिताश्च । भवतु प्रधानामात्यं सूचयिष्ये-

भर्तुर्निर्देशेन कार्यं दधाना
भृत्याः स्वामिन् नैव तन्त्रा भवन्ति ।
यद् यत् स्वामी निर्दिशेत् तत्तदेव



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कार्यं कुर्वन् स्वस्थतां याति भृत्यः ॥

(नेपथ्ये 'भो राजनेतारः राज्ञा प्रधानमन्त्रिणमसक्षमं समुद्घुष्य शासनाधिकारः स्वस्मिन् नियन्त्रितोऽस्ति । परिस्थितिरिदानीं दलीयनेतॄणां प्रतिकूलं वर्तते । सावधाना भवन्तु ।' इति शब्दः श्रूयते ।

**गुप्तचरः-** हन्त ! गुप्तचरनिकायस्य नीतिरपि परिवर्तिता भविष्यतीति मन्ये । भवतु यामि । अस्य निकायस्य प्रमुखेन सह मेलितुम् । (इति निष्क्रान्तः)

## चतुर्थ दृश्यम्

(गुप्तमन्त्रणास्थलम्, तत्र प्रविशन्ति प्रधाननायकः, अपदस्थः प्रधानामात्यः, सत्तापक्षीयाः प्रतिपक्षीयाश्च नेतारः)

**प्रधाननायकः-** भो सखायः ! सम्प्रति पदे पदे दत्तावधानैर्भाव्यम् । किमर्थमिति ? भवन्तो जानन्त्येव । राज्ञा संविधानमुल्लङ्घ्य शासनाधिकारः स्वायत्तीकृतः । अस्माभी राजतन्त्रस्य सुरक्षायै किं किं न कृतम् ? कियद्भिः कार्यकर्तृभिर्जीवनमुत्सृष्टम् । राज्ञा सर्वं विस्मृत्य सर्वसत्तावादः प्रवर्तितः ।

**कश्चन नेता-** प्रधाननायक ! अधुना किमुपयुक्तं भवति ?

**प्रधाननायकः-** राज्ञ एतस्य असांविधानिकस्य अधिनायकवादस्य विरुद्धे सर्वैर्दलैरेकीभूय शान्तिपूर्णं विरोधप्रदर्शनं विधातव्यम् ।

**प्रतिपक्षदलीयनेता-** राज्ञा दलानि अकिञ्चित्कराणि मत्वा समस्ताधिकारग्रहणं कृतम्, सर्वसत्तावादोऽधिनायकवावादश्च उपस्थापितः । एतद् दलैः सम्भूय प्रतिकर्तव्यम् ।

**अपरनेता-** सन्दर्भेऽस्मिन् नागरिकेषु जागरणं वर्धयितव्यम् । मित्रराष्ट्राणां नेतारश्च सूचनीयाः । राज्ञः सर्वसत्तावादं विरोद्धुमनुरोद्धव्याः ।

**सत्तापक्षीयसदस्यः-** साधु विचारितम् । एतदेव विधातव्यम् ।

**प्रधाननायकः-** अस्मद्दलेन २००७ तमस्य विक्रमाब्दस्य सङ्घर्षे निर्विकल्पपञ्चायतव्यवस्थायां, २०४६ तमवर्षस्य जनान्दोलनस्यावसरे जनतायाः अधिकाररक्षणाय अर्धशताब्दतो युद्धं विहितम् । माओवादिजनयुद्धावसरेऽपि राजतन्त्रं समर्थितं परं सर्वदैव राजतन्त्रमस्मत्प्रतिकूलायितम् ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जनता एव सार्वभौमाः भवति इति राजा न जानाति किम् ? सम्प्रति आस्माकीननीतौ परिवर्तनं विधातव्यमिति मन्ये ।

**सत्ताविपक्षयोः सदस्याः-** कीदृशं परिवर्तनं महानायक !

**महानायकः-** युद्धरतपक्षेण सह गूढतया मिलित्वा यथासम्भवं तदीया याचनाः प्रपूर्य शान्तिसंविदां विधाय तेषामपि सहकार्येणान्दोलनं सञ्चालयितव्यम् ।

**अपदस्थो महामात्यः-** अस्मान् दुर्बलान् असक्षमांश्च दर्शयितु थापाभिधं चन्दञ्च प्रधानमन्त्रिणं विधाय वार्ताया नाटकमपि प्रदर्श्यमानं वर्तते । परं तन्न सफलायते । महानायकस्य विचारः उपयुक्तः अस्ति ।

**सर्वे मन्त्रकाः-** अपि स पक्षः अस्माभिः प्रस्तुतं सपथं स्वीकृत्य शान्तिप्रक्रियायामागच्छेत् ?

**महानायकः-** कथं न सम्भवम् ? तेऽपि आजीवनं योद्धुं न प्रभवन्ति । वयमपि युद्धकामिनो न । ता अपि जनता एव । राजेच्छायाः पूरणापेक्षया तेषां याचनापूरणं जनेच्छापूरणं भविष्यति । राज्यस्य विभाजनं तेषामपि नाभीष्टम् । अन्ययाचनानां पूरणं किन्नु दुष्करम् ?

**सर्वे मन्त्रकाः-** साधु महानायक ! साधु । एतदेव विधातव्यम् ।

**प्रतिपक्षीयनेता-** राजतन्त्रसम्बन्धेऽस्माकं धारणास्ति यदेतत् समापनीयम् । सङ्घीयलोकतन्त्रं सङ्घीयगणतन्त्रं वा स्थापनीयम् ।

**महानायकः-** वयमधुनापि राजतन्त्रमुन्मूलनीयमिति मान्यतायां न स्मः । राजतन्त्रस्य निरङ्कुशता समापनीया । सांविधानिकम् आलङ्कारिकं वा राजतन्त्रं स्थापनीयम् । राजदूतानां पदीयप्रमाणपत्रग्रहणं, मन्त्रिपरिषदः परामर्शस्य स्वीकरणम्, सांविधानिकाङ्गे प्रेषितपत्रेषु हस्ताक्षरणमात्रं तदीयकार्यं भवतु ।

**प्रतिपक्षिनेता-** अस्मद् विचारे राजतन्त्रं समापनीयमेव । अनेन मुहुर्मुहुः संविधानं त्रोटितम् । सर्वे राज्याधिकाराः स्वस्मिन् नियन्त्रिताः । दलानि प्रतिबन्धितानि निर्बलीकृतानि वा । अतो राजतन्त्रं समापनीयमेव ।

**महानायकः-** अलं विवादेन । एतत्सम्बन्धेऽपि विचारयिष्यामः । सर्वसम्मतो वा बहुमतो निर्णयः स्वीकरिष्यत एव । राजतन्त्रस्य समाप्तौ


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मतबाहुल्यं भवति चेत् तदपि स्वीक्रियते इति ।

**कश्चन मन्त्रकः-** जनयुद्धकारिपक्षेण साकं वार्ता अविलम्बेन विधातव्या ।

**महानायकः-** सहजकर्तुर्माध्यमेन तैस्सह सम्पर्कं विधाय शीघ्रातिशीघ्रं वार्ता विधास्यते । मन्त्रणा गोप्या तिष्ठतु । अहं सहजकर्तॄन् मिलामि । दूरभाषादिमाध्यमेन भवत्सु घटनाविवरणं सूचयिष्यत एव । साधयामस्तावदधुना ।

सर्वे-साधयामस्तावत् । (इति निष्क्रान्ता)

## पञ्चमं दृश्यम्

(भारतस्य राजधानी दिल्ली, वैदेशिकद्वयस्य प्रवेशः ।)

**प्रथमः-** नेपालीराजनेतारः अस्मद्राजनेतारश्च . कथं युद्धरतपक्षं शान्तिसंविदायामानेतव्यमिति परामृशन्तः सन्ति उचितमेवैतत् -

युद्धं भीतेवर्धकं नाशकारि
राष्ट्रियायाः सम्पदो ध्वंसकृच्च ।
युद्धेऽनल्पा बालवृद्धा युवानो
हन्यन्तेऽतो लाभकृत् कुत्र युद्धम् ? ॥

**द्वितीयः-** नेपालोऽस्ति विकासोन्मुखराष्ट्रमेकम् । विकासचरणे प्रवेशस्यावसरेऽ नेन युद्धबिभीषिकाऽनुभूता । विपुलपरिमाणा जनसम्पदश्च नष्टाः । शान्तिवार्तायामसफलितायामस्योत्थानं दुष्करम् ।

**प्रथमः-** मित्र ! एतन्नैव चिन्त्यम् । नेतारो बुद्धिमन्तः सन्ति युद्धरतपक्षोऽपि शान्तये त्वरितो वर्तते । इत्यतः शान्तिवार्ता सफलायते । इति विश्वसिमि तथा हि-

शिल्पोद्योगाः शान्तितो वै चलन्ति
तुष्टिः पुष्टिः श्रीः कलाः सम्भवन्ति ।
शान्त्या मेलो वर्धते मानवेषु
शान्त्या किं वा सम्भवेद् नो जनेषु ॥

**द्वितीयः-** शान्तिवार्ता सफला भवतु, येन नेपालः पारस्परिकमेलने अग्रे अग्रे वर्धितुं सफलो भविष्यतीति । (ससम्भ्रमं प्रविश्य)

**पत्रकारः-** वन्दे मातरम् ।

**उभौ वैदेशिकौ-** वन्दे मातरम् । राम राम ! पत्रकारमित्र ! सहर्षं त्वां पश्यावः ।


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्वरितं श्रावय कास्ति शान्तिवार्तायां प्रगतिः ?

**पत्रकारः-** भो वैदेशिकमित्रे ! मोदावहं वृत्तान्तं श्रावयामि, शान्तिसन्धेः प्रारूपं निश्चितमिति। पक्षद्वयमेवात्र सहमतम्। श्रूयते, अद्यैव बृहच्छान्तिसंविदो घोष्यन्ते इति। वार्तास्थलमेव याम।

**वैदेशिकौ-** एवं याम। तत्रैव बृहच्छान्तिसंविदायाः सूत्राणि शृणुमः।

(इति निष्क्रान्ताः सर्वे)

## षष्ठं दृश्यम्

(ततः प्रविशन्ति सामोदाकृतौ काङ्ग्रेसदलीया माओवादिदलीयाश्च कतिचन भारतीयनेतारः, वैदेशिका वरिष्ठाधिकारिणः, पत्रकाराश्च)

**प्रधाननायकः-** (सर्वान् प्रणम्य) अतीव प्रमोदावहोऽयं क्षणः। माओवादिमित्राणि युद्धाद् निवृत्य शान्तिप्रक्रियायामागतानि सन्ति। अस्याः प्रतिक्रियायाः श्रेयो माओवादिनेतृषु तत्र च विशेषतः अध्यक्षाय मिलति।

**माओवादी अध्यक्षः-** नैतद् वाच्यम्। काङ्ग्रेसदलीयो प्रधाननायको विशेषतः श्रेयोभाग् वर्तते, एवञ्चास्मद्दलीयाः नेतारः, सर्वेषां दलानां कार्यकर्तारः, सहजकर्तारौ, वैदेशिकमित्राणि, समग्रमित्रराष्ट्राणां प्रमुखनेतारः, पत्रकाराश्च श्रेयोभाजः सन्ति। सर्वेभ्योऽहं क्रान्तिकारि अभिवादनमर्पये।

(मुष्टिमुत्तोलयति, उपस्थिताः नेतारः पत्रकाराश्च प्रत्यभिवादमर्पयन्ति)

**महानायकः-** सिटौला भ्रातः ! वाच्यतां तावच्छान्तिसंविदाया विवरणम्।

**सिलौटा-** सर्वान् नेतॄन् जयनेपालस्याभिवादनमर्पये। (वाचयति) बृहच्छान्तिसंविदायां द्वादश सूत्राणि सन्ति तदहं वाचयामि -

१. द्विपञ्चाशदधिकद्विसहस्रतमविक्रमवर्षात् प्रारब्धस्य माओवादियुद्धस्य विधिवत् समापनम्।
२. माओवादीजनमुक्तिसेनाः निरीक्षणशिविरे संस्थाप्य अनुसन्धाय च योग्यतां परीक्ष्य च योग्यानां नेपालीसेनायां समावेशनम्।
३. राज्ञः सर्वानधिकारान् निरस्य तदीयसम्पदो राष्ट्रियकरणपूर्वकं राजकोशे स्थापनम्।
४. इतः पूर्वं विहितानां सहमतीनाञ्च पूर्णतः परिपालनम्।
५. उभयपक्षत एव सम्पूर्णानां सैनिकगतिविधीनां तत्कालं रोधनम्।
६. पक्षद्वयस्यैव नागरिकस्वतन्त्रतायां मानवाधिकारप्रभृतिविषयेषु च पूर्णप्रतिबद्धतायाः प्रकटीकरणम्।


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

७. मोओवादिपक्षतः सङ्घटितानां जनसर्वकारः-जनन्यायालयादीनां निरसनम् ।

८. राष्ट्रियमानवाधिकारायोगस्य अनमिनसङ्घटनस्य च माध्यमेन जनमुक्तिसेनाया नेपालिसेनायाश्चानुगमनम् ।

९. सत्यनिरूपणमेलायोगस्य विलोपितव्यक्तीनामनुसन्धानायास्य च सङ्घटनतत्परता ।

१०. युद्धाद् विस्थापितानां व्यक्तीनामौचित्यपूर्णरीत्या समाजे पुनः स्थापनम् आवासनञ्च ।

११. राष्ट्रे व्याप्तं भ्रष्टाचरणं निरस्य तथाविधार्जितसम्पदोऽधिगृह्य सुशासनस्य स्थापनम् ।

१२. राष्ट्रे शान्तिसुव्यवस्थयोः स्थापनायै पक्षद्वयेनैव सहयोगकरणम् ।

शान्तिसंविदामेतां परिपालयितुं पक्षद्वयमेव सहमतमस्ति ।

हस्ताक्षरकतारौं
सप्तदलपक्षतः
माओवादीपक्षतः
गिरिजाप्रसादकोइराला प्रचण्डः

(सर्वे करतलध्वनिना द्वादशसूत्रीयायां बृहच्छान्तिसंविदायां विहितं हस्ताक्षरणमनुमोदयन्ति । वैदेशिका वरिष्टाधिकारिणो राजदूताश्च हर्षमभिव्यज्य शान्तिसंविदायाः सफलतां कामयन्ते ।)

भरतवाक्यम् -

विपद्विनाशं धनधान्यवृद्धिं
सौहार्दमेलं रिपुताविनष्टिम् ।
सम्प्राप्य हृष्टां मनुजा भवन्तु
नेता जनेच्छाञ्च विचार्य शास्तु ॥



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

# नृसिंहप्रभवम्

उप प्रा. रोहिणीराजतिमल्सीना
त्रि.वि.

साक्षी स्वयं परमभक्तहितं समीक्ष्य
बभ्रे विचित्रकवपुः त्रिदिवेशवन्द्यः ।
प्रह्लादह्लादमुपचित्य धृतावतारः
पायात् स नो नरहरिर्जगदेकसारः ॥१॥

**अपि च–** वेदज्ञं सर्वधर्मज्ञं ज्ञानविज्ञानवारिधिम् ।
व्यासं विश्वगुरुं वन्दे परं सत्यवतीसुतम् ॥२॥
पाराशर्यमहं वन्दे जगदादिगुरुं वरम् ।
भागवतादिना येन नाट्यवस्तु प्रकाशितम् ॥३॥

(नान्द्यन्ते प्रविशति सूत्रधारः)

**सूत्रधारः-** अलमनेन आर्यमिश्राणां कौतूहलविवर्धनेन । आर्यमिश्रान् सविनयं विनिवेदयामि यदिदमस्माभिरिह महर्षिमुद्गलवंशावतंसेन यतीशरामानन्दशिष्येणभगवच्चरणारविन्दचञ्चरीकेण देवराजसूनुना तिमिल्सिनापाह्वेन संस्कृतसेविना कविना रोहिणीराजेन प्रणीतमिदं नाट्यकाव्यमभिनेतव्यमिति । एषोऽस्मि हिरण्यकशिपो राजप्रासादीयः सत्ययुगीनश्च परिभावितः ।

(परितः अवलोक्य) प्रिये ! अयि प्रिये !

**नटी** (प्रविश्य) इयमस्मि, इयमस्मि । (सूत्रधारमुपयाति ।)

(नेपथ्ये) भो भो ! आहूयतां महाराजः ।

**सूत्रधारः-** प्रिये ! कोऽयं ह्वयते महाराजम् ?

**नटी** न जानासि किम् ?
प्रह्लादः प्रेषितो राज्ञा गुरुकुलमितः पुरा ।
अध्याप्य गुरुपुत्राभ्यामानीतो वर्ततेऽधुना ॥४॥
आह्वयितुं महाराजं हिरण्यकशिपुं भटम् ।
आदिश्य कथयन्तौ तौ गुरुपुत्रावनन्तरम् ॥५॥

(निष्क्रान्तौ)

इति प्रस्तावना

(राजकुमारं प्रह्लादं पुरस्कृत्य सभागारं प्रविशतः शण्डामर्कौ)



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**शण्डः-** (निकटस्थं भटं वीक्षमाणः) भो भो ! आहूयतां महाराजः ।

**अमर्कः-** निवेद्यतां च महाराजः,
महाराजाज्ञया नूनं पाठितो राजनन्दनः ।
अध्यापितार्थनीतिश्च दण्डनीतिश्च शोभना ॥६॥

**भटः** (नतशिरसा) सपदि सूचयामि ।

(निष्क्रान्तः)

(राज्ञा कयाध्वा सह महाराजस्य प्रवेशः, द्वारपालौ जयघोषं कुरुतः । तत्रत्याः सर्वे उत्थाय नमस्कृत्य च राजदम्पती अभिनन्दन्ति ।)

**हिरण्यकशिपुः-** (सिंहासनमधितिष्ठन् समुपस्थितान् स्वस्थाने समुपवेशनाय सङ्केत्य) अहो ! मम प्रियपुत्रः समागतः किम् ?

**प्रह्लादः-** (पितरावुपसृत्य प्रणिपत्य च) अम्ब ! अभिवादये । तात ! अभिवादये ।

**राजदम्पती-** (पुत्रशिरसि करौ निवेश्य) ओजस्वी भव सौम्य !

**गुरुपुत्रौ-** (सगर्वम्) राजकुमाराय अर्थनीतिदण्डनीत्योः शिक्षा सम्यक् प्रदत्तास्ति महाराज !

**हिरण्यकशिपुः-** (सस्नेहमङ्कमारोप्य) अभिधीयतां वत्स ! किं किमधीतं गुरुकुले ? श्राव्यतां पुत्र ! यद् विदितं साधु किञ्चित् ।

**प्रह्लादः-** (गाम्भीर्येण) अहम्ममेत्यसद्ग्रहकूपे संसारिणो निमज्जन्ति निमज्जेयुः, विवेकिना तु अधःपतनकारणं गेहं परिहाय वनं गत्वा श्रीहरिः समाश्रयणीयः ।

**हिरण्यकशिपुः-** (विहस्य) केन शिक्षितमिदं वत्स ! कथमिव समाकृष्टोऽसि अस्मद्वैरिणं प्रति ?

**प्रह्लादः** (प्रसादितवदनः) अयःपिण्डं यथाकर्ष आकर्षति स्वभावतः ।
अहम्ममेत्यसद्ग्राहात् श्रीहरौ याति मे मनः ॥७॥

**हिरण्यकशिपुः-** (बोधयितुकामः) वत्स ! एतत्तु अस्मत्कुलविरुद्धम् । दनुजजातेर्हितविपरीतमिदम् । अतस्त्यज वैरिचर्चाम् । यदुत्तममधीतं स्वगुरुभ्यां सकाशात्, तच्छ्रावय किञ्चित् ।

**प्रह्लादः-** श्रवणं कीर्तनं तस्य स्मरणं पादसेवनम् ।
अर्चनं वन्दनं दास्यं सख्यमात्मार्पणं शुभम् ॥८॥
भगवति समर्पणबुद्ध्या अस्या नवलक्षणाया भक्तेरनुशीलनं हि उत्तममधीतं मन्ये ।

**हिरण्यकशिपुः-** (गुरुपुत्रावुद्दिश्य सरोषम्) अरे दुष्टौ ! किमेतत् शिक्षितम् ? एतादृशी



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सारहीना शिक्षा मत्पुत्राय ? शाम-दाम-दण्ड-भेदादिविषयेषु तु किमपि न ब्रवीति एषः । शत्रुश्लाघां हि कुरुते केवलम् । छद्मवैरकार्येण लज्जा नानुभूयते युवाभ्याम् ?

**शण्डः-** (ईषद् रोषभावेन) अस्माभिर्नैव शिक्षिता शत्रुश्लाघा ।

**अमर्कः-** (समर्थनभावेन) न चान्यैः कैश्चिद् दानवारिभिः । आवयोश्च दोषदर्शनं मास्तु राजन् ! राजकुमारस्येयं नैसर्गिकी मतिः ।

**हिरण्यकशिपुः-** (उपगम्य) अयि वत्स ! तर्हि कुतोऽवाप्तैषा अहितमतिः ?

**प्रह्लादः** अजितेन्द्रियाणां गृहव्रतानां मतिः स्वतः परतो वापि भगवति नाभिपद्यते । संस्पर्शजानां भोगानामभीष्टत्वं विचिन्त्य अन्धैर्नीयमानानामन्धानामिव प्रवर्तनं खलु अहितमतिः । एतेषां समेषां कल्याणाय श्रीहरिरेव अन्यतमश्शरण्यः । मम आराध्योऽपि स एव ।

**हिरण्यकशिपुः** (ईषद् रोषदृष्टिं क्षिपन्) अरे पुत्र ! किमेतद् अभिदधासि ? सौकरं वपुः धृत्वा त्वत्पितृव्यं हतवान् स कथं त्वदीय आराध्यो भवितुमर्हति ?

माता दितिर्भ्रातृजाया भ्रातृजाश्शम्बरादयः ।
सान्त्वयितुं कृतं किं तान् स्मृत्वा चेखेत्ति मे मनः ॥९॥

(किञ्चित् स्मरन्) हरिरयं पूर्वन्तु एवं नासीत् । देवदानवैः सह साम्येन व्यवहरति स्म । यदा तु कुटिलमतिभिर्दैवैर्विनयानुनयैः स्वपक्षे समानीतः, तदनु अस्मदहितं साधयितुं मायाप्रयोगेण सौकरादिरूपधारणशीलोऽभवत् ।

**प्रह्लादः-** कथमिति न जाने परन्तु श्रीहरिर्मम समाराधनीयोऽस्तीति भावः सततं मे स्वान्तं समारूढोऽस्ति ।

**हिरण्यकशिपुः-** (साभिमानम्) ब्रह्मणो वरबलेन मया सकलञ्च त्रिलोकं वशीकृतम् । यद्यद् अभिलषसे तत्तद् इहैव लप्स्यसे । अतो मामेव आश्रयस्व । मच्छत्रोर्हरिराश्रयणं किमर्थम् ?

**प्रह्लादः-** भोग्यपदार्था अयं विग्रहश्च जलाद् बुद्बुदा इव, मृत्तिकाया घटादिरिव, सुवर्णाद् हारकुण्डलादिरिव च महाभूतेभ्यः समुद्भूताः । किञ्चित् कालं यावदेव इह एषां स्थितिः । जले बुद्बुदा इव, मृत्तिकायां घटादिरिव, सुवर्णे हारकुण्डलादिरिव च महाभूतेषु एतेषां विलयः सुनिश्चितः । अत एतेषां निःसारत्वञ्च प्रातस्तन दिनकरकिरण इव सुस्पष्टम् । एतेषामनुधावनेन को लाभः ?



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**हिरण्यकशिपुः-** (क्रोधावेशं भावयन्) व्यर्थं मा प्रलप । अहं त्रिलोकेशः, न तु हरिः । अतो मद्वचनं पालय, सुखं लप्स्यसे ।

**प्रह्लादः-** कथं भवान् त्रिलोकेशो भवितुमर्हति ? सकलस्यापि जगत ईशत्वन्तु श्रीहरौ खलु । स हि स्वाभिलाषेण सरीसर्ष्टि पापर्ति जरीहर्ति च जगत् । जगदिदं तस्य क्रीडनकमात्रम् ।

**कयाधूः-** (उत्थाय भर्तारं संलक्ष्य) सम्यक् प्रसरतु पितापुत्रयोः संलापः । निर्जिगमिषामि आर्य ! आज्ञाप्यताम् । किञ्चित् कार्यं साधनीयमस्ति । (महाराजस्य अनुज्ञासङ्केतमवाप्य निर्गच्छति । गुरुपुत्रौ च राज्ञः अनुमतिं स्वीकृत्य निष्क्रामतः ।)

**हिरण्यकशिपुः-** (साहङ्कारम्) मद्भ्रातरमिव न शक्नोति स मां हन्तुम् । दुष्करेण तपसा ब्रह्मणः सकाशान्मया अमरत्ववरः समादत्तः अस्ति ।
ब्रह्मणः सृष्टिरन्यो वा प्राणी हन्तुं न शक्ष्यति ।
अन्तर्बहिर्दिवा नक्तं धरायां खे च वायुधैः ॥१०॥

**प्रह्लादः-** (प्रबुद्धभावेन) मृत्योश्चिन्ता कथं तात ! जातोऽवश्यं मरिष्यति ।
आत्मा न जायते नैव कदाचिद्वा विनङ्क्ष्यति ॥११॥

**शरीरान्तः** सञ्चारी च वायुर्यथा शरीरेण नहि सम्बध्यते, देहान्तर्वर्ति च वियद् यथा देहेन नहि सम्बध्यते तथैव आत्मापि सर्वत्रगो वायुरिव शरीरासम्बद्धः, देहासम्बद्धं व्यापकं वियदिव असंश्लिष्टश्च वर्तते । जडं कलेवरमात्रं विनङ्क्ष्यति, न तु चेतनात्मा ।

**हिरण्यकशिपुः-** (साश्चर्यम्) किं नु सिसाधयिषसि ? मद्भ्राता मृतो नास्ति किम् ?

**प्रह्लादः-** पितृव्यस्य देहांशमात्रन्तु विनष्टम्, तच्च स्वकर्मवशात् । देहाध्यक्षः चेतन आत्मा कथं म्रियते मार्यते वा ? अतः तद्धेतुकस्य भवतः शोकस्य प्रतिशोधस्य वा वैयर्थ्यमिति मदभिप्रायः ।

**हिरण्यकशिपुः** (तीव्रं क्रोधं भावयन्) नहि नहि । हरिरेव मद्भ्रातृहन्ता । यथाशीघ्रं सुतीक्ष्णशूलेन तद्गलं विभेद्य तच्छोणितधाराभिरनुजं तितर्पयिषामि । अनन्तरमेव मत्परिवारस्य मत्पीडा च प्रशमिष्यति । छिन्ने मूले विटवावयवा यथा शुष्कायन्ते, तथैव तदाश्रिता देवाश्च दैन्यभावमापत्स्यन्ते । तदुपासकान् ब्राह्मणान् वर्णाश्रमिणश्च विध्वंसितुं सद्य एव मद्भृत्या मया सम्प्रेषिताः । तपोयज्ञव्रतस्वाध्यायनिरतान् सर्वांश्च हरिभक्तान् ते हनिष्यन्ति ।

**प्रह्लादः-** ऐश्वर्यमदमत्तेन भवता शास्त्रमर्यादां च लङ्घिता । वर्णाश्रमिभिर्यज्ञाग्नावाहूता हविर्भागाः परिहृता । त्रिलोक्याः



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सकलाश्च देव-दानव-मानवा उत्पीडिताः । एतन्नहि सत्कार्यम् ।

**हिरण्यकशिपुः-** (सदर्पम्) वसुधायाः सप्तस्वेव द्वीपेषु मम अकण्टकं साम्राज्यं वर्तते । सर्वे च ते त्रिविष्टपादिलोकाः साम्प्रतं मदधीनताङ्गताः । दैतेया आदितेयाश्च आहरन्ति बलिं सदा ।
संवृत्तोऽस्मि लोकजिन्मे वैशिष्ट्यं बुध्यसे कदा ?॥१२॥

**प्रह्लादः-** (ईषत् स्मित्वा) लोकजिन्मन्यते तात ! भवान् वेद्मीत्यसंशयम् । मनोजित् सर्वजिद् भूत्वा राजते वेत्ति वा भवान् ?॥१३॥
लोकत्रयस्य दुर्लभानां सौविध्यसाधनानां समुपलब्धावपि मनश्शान्तिर्नास्ति भवति । तेनैव तु भ्रातृमृत्योः शोकज्वालाभिरवलेह्यमानोऽस्ति भवान् ।
देवेषु वेदेषु गोषु विप्रेषु साधुषु धर्मे श्रीहरौ च विद्वेषो नहि श्रेयस्करः । अतो विरम्यतां तात ! विरम्यताम्मादसाधुकृत्यात् ।

**हिरण्यकशिपुः-** स्वपितरमुपदिशसि ? किं साधु कर्म किञ्च असाधु इति अहमपि जानीयाम् । इतोऽपि हरिं भजसि चेद् मद्वात्सल्याद् वञ्चितो भविष्यसि ।

**प्रह्लादः-** पिता सन्ततिषु स्निह्यतीति नैसर्गिकोऽयं तत्स्वभावः । अतो भवद्वात्सल्यन्तु वर्षत्येव मयीति न मे सन्देहः ।

**हिरण्यकशिपुः-** अमात्य ! स्वीयः सूनुश्च मद्विरुद्धं चञ्चुरीषि चेत् किं करणीयम् ?

**अमात्यः-** (राजकुमारं विलोकमानः) आमयस्येव अस्यापि वैरित्वं मननीयं महाराज !, मतिमद्भिः स्वस्मै हानिकरं विकृतमङ्गञ्च छेदनीयं भवति । भवदीय आत्मजोऽयं राजकुमारोऽपि शत्रुपक्षपरिपोषणेन अस्मच्छत्रुत्वमापन्नोऽस्ति ।

**हिरण्यकशिपुः-** उचितं परामृष्टं मन्त्रिवर्य ! अस्मत्कुले समुत्पन्नः अप्ययं शत्रोः समर्थकत्वेन अस्मच्छत्रुरेव । अतो येन केनापि प्रकारेण एष हन्तव्यः ।

**अमात्यः-** (सविनयम्) अवश्यं महाराज !

**प्रह्लादः-** (निर्भयेन) येन सर्वमिदं व्याप्तं जगद्यत् सचराचरम् ।
तदिच्छामतिक्रम्यात्र न पत्रमपि कम्पते ॥१४॥
शरीरं जायते नात्मा शरीरं म्रियते पुनः ।
अहमात्मा न जायेऽहं न मरिष्यामि कर्हिचित् ॥१५॥

**हिरण्यकशिपुः-** (आत्मगतम्) बालोऽप्ययं प्रबुद्धोऽस्ति । नास्मिन् भयं विलोक्यते । रक्षको हरिरेव स्यात् । रोषो न वा शुभङ्करः । (रोषलोहितलोचनाभ्यां


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वीक्षमाणः, प्रकाशम्) अरे रे कुलकलङ्क ! अयि अधमाधम ! भयं नानुभूयते किम् ?

कम्पन्ते मद्भयाल्लोका दानवा मानवाश्च ते ।
त्रस्यन्ति त्रिदशाः सर्वे भयं त्वयि कुतो न हि ? ॥१६॥

**प्रह्लादः-** द्वितीयाद्वै भयं भवति । इह कः खलु द्वितीयः ? हरिरेव जगद् जगदेव हरिः । सर्वत्र स एव तु वर्तते । मयि, अमीषु भटेषु, अमात्ये, भवति च सर्वेषु सर्वत्र एक एव श्रीहरिर्विराजते । कुतो भयं तावत् ?

**हिरण्यकशिपुः** (किञ्चिदुच्चैः) तर्हि त्वं कदाचित् कुतश्चिदपि किञ्चिद् भयं नानुभवसि किम् ?

**प्रह्लादः** यस्तु रागद्वेषादिवशात् स्वात्मनः पाशबद्धतामङ्गीकुरुते, स सर्वत्र भयमनुभवति परेभ्य आत्मीयेभ्यश्च । तस्य कृते सकलोऽपि संसारोऽयं नूनं भयसङ्कुलः । अत एव हे तात ! अमी सुरारयः सर्वे दानवा यदि आसुरं भावं समुन्मुच्य सर्वत्र सर्वभूतेषु सौहृदं भावं समाश्रयेरन्, तर्हि अवश्यं प्रसत्स्यति भगवान् श्रीहरिः ।

**हिरण्यकशिपुः** (क्रोधातिवेगं प्रकटयन्) श्रीहरिः श्रीहरिः, शत्रोर्नाम श्रावं श्रावमपि प्रज्वलितो मे हृदि रोषप्रकर्षनिर्ज्वलनः । ऋते हरिं कस्यापि अस्तित्वं मूल्यहीनं वा लोके ?

**प्रह्लादः** शास्त्रेषु ये धर्मार्थकामाः पुरुषार्था वर्णिताः, न्याय- धर्मशास्त्र-दण्डनीत्यादिविषयेषु च यद्यद् व्याख्यातम्, तत्सर्वं मूलतः श्रुतिप्रतिपाद्यं खलु परन्तु यदि तच्च श्रीहरेः प्रसादाय सहायत्वं न भजते चेत् सकलं निरर्थकम् ।

**हिरण्यकशिपुः-** मे वात्सल्यञ्च अविगणय्य पौनःपुन्येन अस्मच्छत्रुपक्षग्रहणे हि यतमानोऽसि दुर्मते !

**प्रह्लादः** स्वस्यैव हृदये विराजमानस्य श्रीहरेः चिन्तनाय यतमानत्वं कथम् ? कश्चेह विशेषो यत्नः ? नह्येदं श्रमसाध्यं कार्यम्, इच्छाशक्तिर्हि केवलमपेक्ष्यते । एतादृशं साहज्येन साध्यमपि सत्कार्यं परित्यज्य यस्तु क्षणभङ्गुराणां भोगसामग्रीणामर्जनाय वृथा इतस्ततः बम्भ्रमीति तन्मूर्खता कीदृशी ?

**हिरण्यकशिपुः** (साभिमानम्) त्वदीयः पिता त्रिलोकविजयी वर्तत इति नूनं वेत्सि । दुष्करेण तपसा वशीकृतं सर्वम् । अपरिमेयं बलमस्ति मयि । प्रभवामि च कर्तुं यत्किमपि ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**प्रह्लादः** तात ! भ्रमोऽयं भवतः । आब्रह्मभुवनाल्लोकाः सर्वेऽपि भगवद्वशे सन्ति । बलवतां बलञ्च भगवानेव । सकलप्राणिनां मनोबलं देहबलमिन्द्रियबलञ्च स एव । कर्तुमकर्तुमन्यथा कर्तुञ्च समर्थः सर्वसमर्थशाली परमेश्वरः स एव । अवशङ्गतं मनो हि अस्मदीयं महद् वैरि । अत आसुरभावं परिहाय मनसि समभावोऽवधार्यतां तात ! समभावो हि श्रीहरेर्महत् समर्हणम् ।

**हिरण्यकशिपुः** (क्रोधोत्कर्षं भावयन्) त्वन्तु मरिष्यसि नूनं विपरीतं विकत्थसे ।
अहं हि जगतः स्वामी मदन्यः कश्च शक्तिमान् ?॥१७॥
(प्रह्लादं हन्तुं समुद्यतो भवति परन्तु पुनः किमपि विचिन्त्य)
अबाभाषीर्भयं त्यक्त्वा सर्वस्वं हरिरेव हि ।
रक्षेत् सोऽद्य शरण्यस्ते क्वासौ स्तम्भे न दृश्यते ?॥१८॥

**प्रह्लादः** (भीतिशून्यभावेन) सर्वत्र सर्वथा यस्तु
सर्वदिक्षु विराजते ।
स कथं न भवेत् स्तम्भे ?
सद्दृष्टिः परिभाव्यताम् ॥१९॥

**हिरण्यकशिपुः** (स्तम्भं प्रति तर्जनीनिर्देशेन) अहो ! अस्मिन् स्तम्भेऽपि विराजते तव हरिः ? तावत् प्रथमं तं हन्मि, तदनु त्वाञ्च । (खड्गपाणिः सजवेन सिंहासनात् समुत्पत्य स्तम्भमुपसरति, मुष्टिमुद्यम्य प्रहरति च वेगेन ।
प्रह्लादभाषितं सत्यं विधातुं श्रीहरिर्द्रुतम् ।
अखिले जगति व्याप्तिं साधयन्नागतं स्वयम् ॥२०॥
विचित्रं नृसिंहं रूपं धृत्वा स्तम्भाद्विनिर्गतः ।
हत्वा हिरण्यकशिपुं भक्तः सपदि रक्षितः ॥२१॥
(भक्तराजः प्रह्लादो नृसिंहरूपं श्रीहरिं प्रणमन्नवतिष्ठते । भयानकस्य नृसिंहस्वरूपस्य वीक्षणेन महद्विस्मयमुपगता अमात्यादयो भयेन कम्पन्ते ।)

(भरतवाक्यम्)

भक्ता भद्रं समीक्षेरन् लभेरन् महतीं कृपाम् ।
दुर्जनाः सज्जनाः सन्तु भुञ्जन्तु सत्फलां सुधाम् ॥२२॥


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

# निरक्षरता

**श्रीहरिहरशर्मा-अर्यालः**
पाल्पाभिजनः

(अथ प्रविशति सूत्रधारः)

सूत्रधारः-केचिद् भजन्ति विपणिं धनवर्द्धनाय,
केचिद् भजन्ति कृषिमेव समं विहाय ।
केचिद् भजन्ति मृगणां ग्रहमण्डलानाम्,
एते वयं तु खलु साक्षरतां भजामः ॥१॥

अद्य खलु केन नाट्याभिनयेन अत्र समुपस्थितानां सुरभारतीसमाराधनसंलग्नजीवनानां महानुभावानां विदुषां मनोरञ्जनं कुर्वीमहि ? (किञ्चिद् विचार्य) भवतु, दृष्टम् । नवनवेन अनेन अरविन्दोपनाम्ना हरिणा विरचितेन "निरक्षरता"-नामकेन लघुरूपकेणैव अत्र भवतां मनोविनोदं कर्तुमुचितम् । तर्हि शीघ्रमेव सज्जीकरोमि अभिनेतॄन् ।

(निष्क्रान्तः)

॥ इति प्रस्तावना ॥

## प्रथमं दृश्यम्

(ततः प्रविशति एको ग्रामीणजनो निजगृहद्वारि स्थितः)

(टुन्-टुन्-टुन् इति द्विचक्रिका वदति, एकः पत्रालयकर्मकरः आधुनिकवेषयुक्तः आयाति ।)

**पत्रालयकर्मकरः-** (रक्तवर्णं पत्रकं वितरन्) गृहाण, तव इदं पत्रकम् । (इति निष्क्रान्तः)

**काकूनः-** (पत्रकं पश्यन् विवर्णमुखः) इयं का विपत्तिः आपतिता ? अनेन पत्रकेण तु मनसः शान्तिः दूरं प्रापिता । भवतु, कुत्र गताः सर्वे ? सर्वान् विज्ञापयामि (मञ्चे भ्रमति)

(ततः प्रविशतः चित्रराव-माघरुतौ)

**चित्ररावः-** काकून ! किमिदं करे ?

**माघरुत्-** इदं तु रक्तवर्णं पत्रकम्, यत् खलु मृत्युसूचकं भवति । चीरकूटस्य गृहेऽपि एतादृशमेव पत्रकं पुरा मया दृष्टमासीत् । चीरकूटस्य पुत्रो दिवङ्गतः इति तस्मिन् पत्रे लिखितमासीत् ।

**चित्ररावः-** अहो ! अत्याहितम् । अत्रापि कस्यचित् मृत्युसूचना वर्तते किम् ?



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**काकूनः-** अहो ! किमत्र कुर्मः ? किं कुर्मः ? (चिन्ताग्रस्तः)

**माधरुत्-** असम्भाव्यं नास्ति चित्ररावकथनम् । अहं तु मन्ये, काकून ! तव पत्नी या गर्भसेवायै चिकित्सालयं भजते, सैव स्वर्गता भवेत्- इति ।

(ततः प्रविशति चीरकूटः)

**चीरकूटः-** (स्कन्धस्थं कुद्दालकं भूमौ संस्थाप्य) अरे ! यूयं किमर्थं मलिनमुखाः तिष्ठथ ? (रक्तपत्रकं विलोक्य) अहो ! अत्रापि इदं पत्रकम् आगतम् ? तर्हि जानीथ निश्चितमपि कस्यचित् स्वर्गारोहणं जातम् ।

(क्षणं सर्वे मलिनमुखाः तिष्ठन्ति)

(ततः प्रविशति प्रौढशिक्षकः)

**प्रौढशिक्षकः-** कथं युष्माकं विमनायमानानि मुखानि मुकुलित्तकमलानि इव श्रीविहीनानि परिलक्ष्यन्ते ?

**चित्रावः-** (सखेदम्) अद्य खलु अस्माकं गृहे विपत्तिः समापतिता ।

**शिक्षकः-** भोः कीदृशी इयं विपत्तिः ? केन सूचिता ?

(काकूनः पत्रमर्पयति)

**शिक्षकः-** (पत्रं निरीक्ष्य, वृत्तं विज्ञाय, उच्चैर्हसित्वा) निरक्षराः मूर्खाः सर्वत्र विपत्तिमेव सम्भावयन्ति । (उच्चैर्हसति, हसत्येव)

**काकूनः-** (रुदन्निव) अहह ! मम पत्नी मृता । मम कृते सर्वत्र अन्धकारो दृश्यते । विपत्समुद्रस्य पारं नैव लक्ष्यते । किं करोमि ?... अये ! इदानीं भवान् हसति ?

**शिक्षकः-** अरे ! त्वं प्रथमं मिष्टान्नानि वितर । मित्रजनान् निमन्त्रय । नृत्यगीतादिकं समायोजय । यतो हि, अद्यप्रभृति त्वं पिता सञ्जातः । (सर्वे शिक्षकमुखे दृष्टिं निक्षिप्य स्तब्धाः तिष्ठन्ति)

**काकूनः-** शिक्षकमहाशय ! अहं कस्य पिता सञ्जातः ?

**शिक्षकः-** निजपुत्रस्य ।

**काकूनः-** महाशय ! किमिदं सत्यम् ?

**शिक्षकः-** किम् अहम् असत्यं वदामि ? पश्य अस्मिन् पत्रे इदमेव लिखितं वर्तते

**काकूनः-** (विहसन्) अरे ! अद्य अहं पिता सञ्जातः ? अहा ! तर्हि महत् सुखम्, सुमहत् सुखम् । (चित्ररावादीन् प्रति) अरे जानासि भोः ! अहं पिता सञ्जातः, पिता सञ्जातः ।


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(हसति, कूर्दते, नृत्यति, गायति च)

**सर्वे-** महत् सुखम् । तर्हि सुमहत् सुखम् । भोः काकून ! सर्वान् अस्मान् भोजय मिष्टान्नानि (सर्वे हसन्ति, नृत्यन्ति च) ।

॥ पटाक्षेपः ॥

इति प्रथमं दृश्यम् ॥

## द्वितीयं दृश्यम्

(ततः प्रविशति स्वगृहद्वारि स्थितः सभ्रातृकः काकूनः)

(द्विचक्रिका ध्वनयति, पत्रालयकर्मकरः प्रविशति)

**पत्रालयकर्मकरः-** (रक्तवर्णं पत्रकमर्पयन्) एतत् तव पत्रकम् । (गन्तुमिच्छति)

**काकूनः-** शृणोतु भवान् । मम पुत्रोत्सवे न सम्मिलितो भवान् । अतोऽहम् इच्छामि- अद्य भवान् मम गृहे भोजनं करोतु ।

**कर्मकरः-** (ससम्भ्रमम्) अत्यावश्यककार्यवशात् अद्य तु गच्छामि । अवकाशे सति कदापि भोक्ष्यामि । (इति निष्क्रान्तः)

**काकूनः-** पश्य चित्रराव ! इदम् अपरं पत्रकम् आगतम् । अहं खलु द्वयोः पुत्रयोः पिता सञ्जातोऽस्मि । अहा ! महत् सुखम् । सुमहत् सुखम् ।

**चित्ररावः-** अहा ! महत्सुखम् । तर्हि सुमहत् सुखम् । चीरकूटादीनपि सूचयामि । (इति निष्क्रान्तः) (चीरकूटादयः प्रविशन्ति)

**चीरकूटः-** (सहर्षम्) अहो ! वृद्धाः कथयन्ति यद् 'भगवान् ददाति चेत् छदिर्भित्त्वा ददाति' इति तत् सत्यम् ।

**माघरुत्-** अरे ! किं तावत् कथनीयम् खलु !, भवतो भाग्यं सानुकूलं वर्तते । पुनरपि निमन्त्रयतु अस्मान् । भोजन-पान-नृत्य-गान-प्रभृतीनां व्यवस्थां करोतु । (ततः प्रविशति प्रौढशिक्षकः)

**सर्वे-** नमस्कारः, नमस्कारः (नमन्ति) आगच्छन्तु, आगच्छन्तु भवन्तः ।

**शिक्षकः-** अरे ! अद्य किं कारणं भवतां प्रसन्नतायाः ?

**काकूनः-** (रक्तपत्रकम् अर्पयन्) भाग्यवान् खलु अस्मि । अपरोऽपि मम पुत्रः समागतः ।

अहं द्विपुत्रवान् सञ्जातः अहा ! महत् सुखम् ।

**शिक्षकः-** (पत्रं समीक्ष्य, गम्भीरतां नटति)

**चित्ररावः-** अरे ! अस्मिन् आनन्दमये वातावरणे भवान् कथम् अप्रसन्नो जातः ? कोऽत्र हेतुः ? कोऽत्र हेतुः ?



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**शिक्षकः-** (कण्ठध्वनिपूर्वकम्) अहो ! अत्याहितम् । (जनान्तिकम्) निरक्षराणां मूढानां कृते सम्पत्तिरपि विपत्तिः, विपत्तिरपि च सम्पत्तिः ।

**सर्वे-** (शिक्षकमुखे दृष्टिं स्थिरीकृत्य) किं जातम् ? किं जातम् ? किम् अस्ति ? किमस्ति ?

**काकूनः-** शीघ्रं वदतु भवान् । (अङ्गुल्या निर्दिश्य) अत्र किं लिखितमस्ति ? पत्रे अस्मिन् किं लिखितमस्ति ? अये ! कथं भवान् मूकः सञ्जातः ?

**शिक्षकः-** अहो ! विचित्रा दैवगतिः । शृणु, अत्र एषा वार्ता लिखिता अस्ति यत् चिकित्सालये तव यः पुत्र उत्पन्न आसीत्... ।

**काकूनः-** त्वरया उच्यताम् त्वरया उच्यताम् । कथं विरम्यते ?

**शिक्षकः-** चिकित्सालये तव यः पुत्र उत्पन्न आसीत् सः सः मृतः ।

**काकूनः-** किम् ? किं स मृतः ? मम पुत्रो मृतः ? हा पुत्र ! हा वत्स ! (इति मूर्च्छति, भूमौ पतति)

**चित्ररावादयः-** हा ! हा ! हा ! हा ! अत्याहितम् । अत्याहितम् ।

॥ पटाक्षेपः ॥

(नेपथ्य उद्घोषणा क्रियते)

साक्षरता वर्द्धताम् ।

साक्षरता वर्द्धताम् ।

निरक्षरता नश्यतु ।

निरक्षरता नश्यतु

॥ इति द्वितीयं दृश्यम् ॥

॥ इति निरक्षरताख्यं रूपकम् ॥



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

# मुद्रामेधव्रतम्

श्रीहरिहरशर्मा-अर्यालः
पाल्पाभिजनः

## प्रथमं दृश्यम्

(स्थानं ग्राम्यगृहम्)

(ततः प्रविशति श्रीकण्ठः गृहद्वारि चतुष्पादिकास्थः शिवार्चासंलग्नः)

**श्रीकण्ठः-** (शिवलिङ्गे जलमर्पयन्)
तन्मे मनः शिवसङ्कल्पमस्तु ।
नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च... शिवतराय च ।
शीशं च मे लौहं च मे त्रपुश्च मे यज्ञेन कल्पन्ताम् ।
(नेपथ्याभिमुखम्) अरे चित्रगो ! चित्रगो ! कुत्र गतः ?
द्यौः शान्तिरन्तरिक्षं शान्ति.....
अरे चित्रगो ! न जाने क्व गतोऽसौ भृत्यापसदः ? गवादीनाम् आहारप्रबन्ध इदानीमपि न कृतः ?
कर्पूरगौरं करुणावतारं..... ।
एतस्य भृत्याधमस्य कृते महान् व्ययः क्रियते, परन्तु जाल्मोऽसौ सम्यक् कार्यं न कुरुते । अरे चित्रगो ! चित्रगो ! (प्रविश्य)

**चित्रगुः-** (साञ्जलि) स्वामिन् ! किम् आदिश्यते ?

**श्रीकण्ठः-** (सरोषम्) सूर्यो गगनमण्डलं चुम्बति । एतदवधि पशूनाम् आहारव्यवस्था किमिति न कृता ?

**चित्रगुः-** स्वामी स्वाराधनां निभालयतु । मया सर्वोऽपि प्रबन्धः क्रियते । (इति निष्क्रान्तः)

**श्रीकण्ठः-** न जाने पुत्रोऽपि क्व गतः ? ह्यः प्रातःकाल एव गृहान् निर्गतः सः, अधुनाऽपि नायाति । परशा ग्रामस्थ विद्यालयस्य शिक्षकनिर्वाचने प्रत्याशित्वेन साक्षात्काराय गतस्य तस्य किमभूदिति न ज्ञायते । (प्रविश्य)

**शिवशङ्करः-** (सहर्षम्) तात ! अभिवादये ।

**श्रीकण्ठः-** अये ! सामोदं तव मुखमण्डलं लक्ष्यते । ब्रूहि तत्र साक्षात्कारे किं किं जातम् ?

**शिवशङ्करः-** तात ! भवत्प्रदत्तेन पत्रेण तत्रत्यं कार्यं तु मत्पक्षीयं सञ्जातम् । अहं


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

निर्वाचितोऽस्मि चयनसमित्या । परन्तु....

**श्रीकण्ठः-** किं परन्तु .....?

**शिवशङ्करः-** परन्तु एतदेव यत् अनुमोदनपत्रं यावन्न प्राप्यते तावदिदं सेवाकार्यम् अस्थायि एव स्थास्यति । अतस्तल्लाभाय चेष्टितव्यम् ।

**श्रीकण्ठः-** अवश्यमेव चेष्टा कर्तव्या परन्तु पूजां विना देवा न प्रीणन्ति चेन्मनुष्याणां का कथा ? सम्प्रति मानवास्तु देवानपि अतिशेरते ।

**शिवशङ्करः-** तात ! पूजया, आराधनया, प्रशंसया, साम्ना, दानेन, येन केनापि वा प्रकारेण अनुमोदनपत्रं लब्धव्यमेव । अन्यथा प्रत्यहं वृद्धिं भजमानस्य परिवारस्य परिपोषणं कथं सम्भविष्यति ?

**श्रीकण्ठः-** सुष्ठु त्वया उच्यते । वत्स ! मया सर्वविधः प्रयासः करिष्यते । (स्वगतम्) परन्तु कथम् ? कं शरणं यामि ? को नु खलु तावन्मात्रं धनं दास्यति यावन्मात्रेण गुरुतरकार्यमिदं सिद्धचेत् ? (प्रकाशम्) वत्स ! त्वं तत्परतया विद्यालयोपस्थानं कुरु, अहम् अनुमोदनपत्रलाभाय प्रयतिष्ये ।

**शिवशङ्करः-** यथा आदिशन्ति भवन्तः । (इति निष्क्रान्तः)

**श्रीकण्ठ-** यदि स्वयमेव अहम् एतत्कार्यार्थं न प्रयतिष्ये, तर्हि विद्यालयव्यवस्थापकः एनं वत्सरान्ते सेवातः पृथक् करिष्यति । तस्मात्-

अवश्यमेव गन्तव्यं मया पुत्रहितार्थिना ।
ऋणं कृत्वापि तत्कार्यं साधनीयं प्रयत्नतः ॥१॥

तत् क्व गच्छामि ? भवतु, दृष्टम् । अस्ति मम चिरपरिचितो लक्षपतिर्नामा श्रेष्ठी । स एवात्र मम साहाय्यं कर्तुमर्हति । (इति निष्क्रान्तः)

॥ इति प्रथमं दृश्यम् ॥

## द्वितीयं दृश्यम्

(स्थानं श्रेष्ठिसदनम्)

(ततः प्रविशति श्रेष्ठी स्वपण्यशालायाम्)

**लक्षपतिः-** (रूप्यकाणि गणयित्वा, स्वगतम्) कथं चिरायते मे पुत्रः ? (प्रकाशम्) कोऽत्र भोः ? (मञ्जूषां पिधाय) अरे श्रीपते । कुत्र वर्तसे ? किं करोषि ? इहागच्छ ।

(प्रविश्य)


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**श्रीपतिः-** उच्यतां तात ! का आज्ञा ?

**लक्षपतिः-** (रूप्यकाणि, पत्रं च, पत्रचोलान्तो निधाय) गृहाण, शृणु पुत्र ! त्वम् एतद् गृहीत्वा तत्र भवतः (कर्णे किमप्युक्त्वा) गृहं गच्छ । मया वज्रचूर्णस्य शिलातैलस्य च कृते तत्र भवता सह वार्ता कृताऽऽसीत् । एतेन उपहारेण पूजितस्तत्र भवान् अवश्यमेव दास्यति ।

**श्रीपतिः-** एष गच्छामि । (इति निष्क्रान्तः)

**लक्षपतिः-** एते प्राप्तपदाः महान्तोऽपि जनाः रावणवत् त्रिभुवनं स्वमुष्टिगतं चिकीर्षन्ति । (सम्मुखं विलोक्य) कोऽयम् आगच्छति ? कश्चित् पण्डितः अयम् ।

(ततः प्रविशति श्रीकण्ठः)

**श्रीकण्ठः-** (दूरत एव) भो श्रेष्ठिप्रवर ! अपि कुशली भवान् ?

**लक्षपतिः-** पण्डितवर्य ! अभिवादये । (आसनं निर्दिश्य) आस्यताम् ।

**श्रीकण्ठः-** समृद्धलक्ष्मीको भव । (आसने आस्ते)

**लक्षपतिः-** कुतो दर्शनं दीयते पण्डितवर ! चिराद् दृष्टः खलु भवान् ।

**श्रीकण्ठः-** किं कुर्मः ?

खगवद् वायुवद् विश्वभ्रमणं भवतां यथा ।
ग्रामवासिदरिद्राणां तत् कदापि न सम्भवम् ॥ २ ॥

परन्तु, श्रेष्ठिप्रवर ! सम्प्रति दयनीयां दशां गतोऽस्मि भवान् खलु सार्थनामा लक्षपतिः लक्ष्मीपतिर्वा तद् भवता मम साहाय्यं कर्तव्यम् । अन्यथा विपत्सिन्धौ मङ्क्ष्यामि ।

**लक्षपतिः-** अहो ! भवान् तु पारम्परिकोऽस्मत्पण्डितः । कथयतु भवान् कीदृग्विधं साहाय्यं कर्तव्यम् ?

**श्रीकण्ठः-** श्रूयताम्, पण्डितोऽस्मि । भगवद्भजनं हित्वा सांसारिकप्रपञ्चोपासनं न क्रियते अस्माभिः । श्रूयते, यदधुना देवतात्रयी आविर्भूता वर्तते एकस्मिन्नगरे । तस्याः पूजार्थं गन्तुमिच्छामि । मया ज्योतिषशास्त्रानुसारं ज्ञातमिदं च यत् यदि तस्याः देवतात्रय्याः वरिवस्यां न सम्पादयिष्यामि तदा मम महदनिष्टं भविष्यतीति ।

**लक्षपतिः-** देवतात्रयी इति ? का एतास्तिस्रो देवताः ?

**श्रीकण्ठः-** ज्ञायते, एतेषु त्रिदेवेषु प्रथमो लिपीश्वरनाथ इति नाम्ना व्यपदिश्यते । किन्तु अन्ययोर्देवयोर्ज्ञानाय अन्तरङ्गसाधनापरिपक्वबुद्धिरेव जनः समर्थो भवति, नान्यः । एतेषाम् ऐकमत्यप्रवर्त्तितैर्युक्ति-भुक्ति-मुक्तिकर्मभिरेव तत्तल्लोकगतानां जनानां व्यवहारप्रवर्त्तना भवति । अतः-



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पुराणान् को हि तान् देवानप्रत्यक्षान् प्रपूजयेत् ।
पूजनीया अमी देवाः प्रत्यक्षा धनदा नवाः ॥३॥

**लक्षपतिः-** (साश्चर्यम्) अहो ! किं वक्ति भवान् ? ब्रह्मविष्णुमहेश्वरानतिरिच्य केऽन्ये ते त्रिदेवाः ? कुत आविर्भूताः ?
ब्रह्माणं लोककर्तारं रक्षितारं जनार्दनम् ।
हर्त्तारं च शिवं हित्वा कोऽन्यान्देवान्प्रपूजयेत् ? ॥४॥

**श्रीकण्ठः-** भवान् न जानाति । मत्तः श्रूयताम् । शास्त्रसम्मतदेवानां पूजा तु चन्दनाक्षतपुष्पैः भवति । परन्तु नूतनानां सचेतसां देवानां समाराधना खलु भिन्नविधाना अलौकिकी हि काचिदेषा प्रक्रिया । श्रूयते किल एतेषाम् आराधनार्थं हि-
मनुष्याणां सहस्रेषु कश्चित्प्रयतते भृशम् ।
यतमानेषु केचिद्धि निष्फलत्वं व्रजन्ति च ॥५॥

**लक्षपतिः-** अथ केन विधानेन सपर्या एषां संसिद्धयति ?

**श्रीकण्ठः-** श्रूयताम् । प्रथमं तावत् लिपीश्वरनाथस्यैव पूजा विधातव्या । सर्वादौ हि तेषां निवासमन्दिरं प्राप्य रहसि दर्शनं कर्तव्यम् । तदा 'मुद्रामेधम्' नाम व्रतमनुष्ठेयं भवति । व्रती हि तेषां छन्दानुसारं खलु -
जलपानं चायपानं धूमपानं प्रकारयेत् ।
मुखसंवासनं दद्यात्ताम्बूलं च पदे पदे ॥ ६ ॥
वासांसि विनिवेद्याथ मन्दं स्मित्वा च साञ्जालि ।
प्रार्थयेद् भावयेच्चैव स्वभावार्थं प्रकाशयेत् ॥७॥
अखण्डितं दधि स्निग्धं दुग्धं वा सर्पिरुत्तमम् ।
नैवेद्यं कल्पयेद् धीमान् प्रतिपक्षं फलान्यपि ॥८॥
सहस्रधा स्तुतिं कुर्यात् कार्यार्थी भक्तिमान्नरः ।
पुनर्हिरण्यगर्भेति मन्त्रं सार्थकमाचरेत् ॥९॥

**लक्षपतिः-** (स्मित्वा) एवम् । तेषां कृते दक्षिणयापि भूयस्या भाव्यम् । लघीयसी दक्षिणा सर्वकार्यविनाशिनी भवति पण्डितवर्य ! हाः हाः हाः हाः (हसति)

**श्रीकण्ठः-** अथ किम् ? तेषामपि विबुधानां नास्ति कश्चिद्दोषः । साङ्गसपरिवारसवाहनपूजायै किमल्पीयसी दक्षिणा समर्था स्यात् ? अथ श्रूयते, अत्रेयं फलश्रुतिरपि-
एवं समभ्यर्च्यमाने प्रसीदति सुरत्रयी ।
ततः फलन्ति विविधाः मनुष्याणां मनोरथाः ॥१०॥


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

काले काले व्रतं चैवं नरः कुर्यादतन्द्रितः ।
आसन्दीमूत्रतां प्राप्य प्रभूतं तस्य वेतनम् ॥११॥
स सुखी स महान् भूयाद् स एवं वेद मानवः ।
विशेषतः कलियुगे पूजैषा सुफलप्रदा ॥१२॥

**लक्षपतिः-** (हसन्) मया न ज्ञातं यद् भवादृशाः पण्डिता अपि एतादृशीं देवतां पूजयन्ति । परन्तु कथमेतत्सर्वं भवता क्रियते ?

**श्रीकण्ठः-** श्रेष्ठिवर ! समयः सर्वं कारयति । देवानां मनुजानां वा नात्र कश्चिद्दोषः । यतो हि-

आसीत् पुरा हरिश्चन्द्रो द्वापरे च युधिष्ठिरः ।
कलौ कश्चिद् हरिश्चन्द्रो न जातो न युधिष्ठिरः ॥१३॥

पुनश्च, महर्घता सर्वानपि बाधते । प्रोच्चसौधादारभ्य कुटीरस्य कोणपर्यन्तं महर्घता व्याप्ताऽस्ति । तदत्र को नु खलु हरिश्चन्द्रत्वं निर्वहेत् ?

**लक्षपतिः-** सत्यमुक्तं भवता । किमत्र कुर्मः ? अयमेव एको मार्गः । इयमेव एका पद्धतिः । नान्यः पन्थाः । कस्मै किं कथयामः ? कथनेन वा को लाभ ?

**श्रीकण्ठः-** श्रेष्ठिवर ! जनमानस-सरित्प्रवाहानुसारं प्रवर्तनेनैव हितमस्माकं भविष्यति, नान्यथा । गताः ते सत्यादयो युगाः । अयं हि कलियुगः । अस्मिन् निर्वृत्तिताबहुले काले यथा कथञ्चिदपि कुत्रचिदपि प्रवेशो जायेत, तदेव बहु मन्तव्यम् ।

**लक्षपतिः-** परन्तु समस्यैषा जनान् कुत्र नीत्वा पातयिष्यतीति को जानीते ? अस्ति समस्याया एतस्याः किञ्चित् समाधानमपि ?

**श्रीकण्ठः-** समाधानानि सन्ति बहुविधानि । परन्तु को नु खल्वस्मिन् कार्ये जागरूकः ? अत्र सर्वे जनाः हृदयेन असहमाना अपि, मुखेन निन्दन्तः अपि व्यवहारेण स्वीकृतिमेव अभिव्यञ्जन्ति ।

**लक्षपतिः-** तथ्यमुद्घाट्यते भवता ।

**श्रीकण्ठः-** (ससम्भ्रमम्) श्रेष्ठिवर ! त्यज्यताम् एतत्सर्वम् । दीयतां मे सार्द्धत्रिशतं रूप्यकाणि । ऋणमेतत् कतिचिन्मासानन्तरं प्रतिदास्यामि ।

**लक्षपतिः-** किन्तु प्रतिशतं दश रूप्यकाणि कुसीदं दातुं प्रतिजानातु भवान् ।

**श्रीकण्ठः-** (स्वगतम्) दश रूप्यकाणि कुसीदम्... । परन्तु का गतिः ? यथा तथा ग्रहीतव्यमेव (प्रकाशम्) श्रेष्ठिन् ! अहं प्रतिजाने तथा कर्तुम् । ददातु भवान् ।

**लक्षपतिः-** (मञ्जूषातो रूप्यकाणि निःसार्य, गणयित्वा) गृह्यताम् ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**श्रीकण्ठः-** (गृहीत्वा) सर्वथा श्रीवृद्धिरस्तु । गच्छामि तावत् ।
**लक्षपतिः-** गच्छतु भवान् । पुनर्दर्शनं देयम् । पण्डितवर ! अभिवादये ।
**श्रीकण्ठः-** आयुष्मान् भव । (इति निष्क्रान्तः)

॥ इति द्वितीयं दृश्यम् ॥

## तृतीयं दृश्यम्

(स्थानं लिपिकसदनम्, द्वौ बालौ सदनप्राङ्गणे क्रीडापरायणौ दृश्येते ।
ततः प्रविशति श्रीकण्ठः)

**श्रीकण्ठः-** (स्वागतम्) महामान्याः ! त्रिदेवाः ! भवन्तो हि अस्माकम् ईशितारः । भवतां कृपाकटाक्षपातेनैव अस्मादृशानां दीनानाम् उद्धारः सम्भवति । प्रार्थये, कथञ्चिदपि मम कार्यं साधयन्तु प्रभवः-

दासोऽहं दासकर्माऽहं दासात्मा दासवत्सलः !
मनस्तोषाय नाथस्य करिष्ये यत्नमुत्तमम् ॥१४॥

(परिक्रम्य, विलोक्य च) एतदेव दीनबन्धोः सदनम् । चिरमन्विष्य प्राप्तोऽस्मि । भवतु, एनं बालं पृच्छामि । (प्रकाशम्) भो बालक ! इदमेव दीनबन्धुभवनम् ?

**बालकः-** आम्, इदमेव ।
**श्रीकण्ठः-** कस्य पुत्रस्त्वम् ? किं नामा ते पिता ?
**बालकः-** श्रीमतः दीनबन्धोः पुत्रोऽस्मि ।
**श्रीकण्ठः-** तर्हि सूचय स्वपितरं कश्चित् पण्डितस्त्वां प्रतीक्षते इति ।
**बालकः-** शोभनम् । गच्छामि । (इति बालौ निष्क्रान्तौ)

(ततः प्रविशति दीनबन्धुः)

**दीनबन्धुः-** नमस्कारः । पण्डितवर ! कुतो भवान् ? (आसन्दीं निर्दिश्य) आस्यताम् ।
**श्रीकण्ठः-** नमस्कारः । (उपविश्य) अनुमोदनपत्रस्य विषये कार्यमस्ति ।
**दीनबन्धुः-** आम्, ज्ञातम् । परशाविद्यालये नवनियुक्तशिक्षकस्य विषये ?
**श्रीकण्ठः-** एवम् एवम् ।
**दीनबन्धुः-** परन्तु अत्रत्यां रीतिं भवान् जानात्येव । शास्त्रमर्मज्ञो लोकमर्मज्ञश्च भवान् । परहितेनैव स्वहितं सम्पद्यते-इत्यत्र नास्ति कथनीयम् । तेन हि भवान् प्रथममस्माकं हितं साधयतु, परतो भवत्कार्यमपि सम्पत्स्यते ।
**श्रीकण्ठः-** तदुच्यताम् । किं करवाम ?
**दीनबन्धुः-** अस्माकमपि गृहं, परिवारजनाः जन्तवश्च सन्ति । नगरे निवसामः ।


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अत्र हि सर्वत्र सर्वकार्येषु व्ययाधिक्यम् । वेतनरूपेण यद् द्रव्यं लभ्यतेऽस्माभिः, तदतीव स्वयम् । तद् भवत्सदृशैरेव जनैः हर्षेण दत्तं पुरस्कारं प्रयुज्य व्ययं लघूकुर्महे ।

**श्रीकण्ठः-** सत्यमुच्यते भवता ।

**दीनबन्धुः-** अनेन इदं भवति भवतां जीविकासञ्चालनव्यवस्था भवति, अस्माकं च कानिचित्कार्याणि सिद्ध्यन्ति । ज्ञातं श्रीमता ?

**श्रीकण्ठः-** शोभनम्, शोभनम् । श्रीमन्तं पुरस्कर्तुं मया एतत्सर्वमानीतम् । (पोटलीतः उत्तरीयं, धौतवस्त्रं, फलानि च निःसार्य) गृह्यताम्, कारुणिकः खलु भवान् । विश्वस्तः अस्मि, भवानवश्यं मम कार्यं साधयिष्यति ।

**दीनबन्धुः-** (नेपथ्यं प्रति) भो राजेश ! इहागच्छ ।

(नेपथ्ये) एष आगतः

**राजेशः-** (प्रविश्य) तात ! गतदिने स शिक्षकः मह्यं मोदकानि दत्तवान् । अनेन किमपि न दत्तम् ।

**दीनबन्धुः-** वत्स ! अत्र भवानपि दास्यति (फलं दत्त्वा) गृहाण । अथ एतत्सर्वं नय, रक्ष कक्षान्तर्गृहे ।

(बालको गृहीत्वा फलमास्वादयन् निष्क्रान्तः)

**श्रीकण्ठः-** अथ तत्र भवन्तौ (कर्णे कथयित्वा) अपि दिदृक्षे । गच्छामि तावत् । पुनरायास्यामि ।

**दीनबन्धुः-** न खलु न खलु । तिष्ठतु भवान् । श्रूयताम्, तौ नाम भवतश्च मम च सम्माननीयौ प्रभू । स्वीकृति-वृत्ति-दातारौ तौ अवश्यं समाराधनीयौ । परन्तु तयोः बाह्यपूजा न भवति । तौ तु परमाभ्यस्तराजयोगैः विशुद्धान्तरङ्गैः कैश्चिदेव योगिभिरन्तरङ्गविधिना पूज्येते मयाऽपि तयोः समाराधनानन्तरं तत्प्रसादमात्रमेव गृह्यते ।

**श्रीकण्ठः-** तर्हि किमस्ति भवान् तयोः पूजनेऽधिकारी ?

**दीनबन्धुः-** अथ किम् ? पूर्वजन्मकृतस्य पुण्यस्य फलमिदं यदत्र अधिकारमवाप्नवम् । श्रूयताम्, तत्र तत्र धावने न कोऽपि लाभः । एतौ प्रभू सर्वसुलभदर्शनौ न भवतः । अहमेवैतयोः अन्तरङ्गपूजकोऽस्मि नान्योऽन्यः कोऽपि एतौ पूजयति चेत् तस्यानिष्टमेव भवति ।

**श्रीकण्ठः-** यदि एवम् तर्हि किं मया कर्तव्यम् ?

**दीनबन्धुः-** श्रूयताम्- यथाऽग्निसात्कृतं द्रव्यमिन्द्रादीनुपतिष्ठते ।
तथैव- मत्पाणिसात्कृतं द्रव्यं प्रभुद्वयमुपैष्यति ॥ १५ ॥
अधिगतसकलशास्त्रेण भवता नान्यथा शङ्कनीयम् । अलं परिश्रमेण ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अहं सर्वं साधयिष्यामि ।

**श्रीकण्ठः-** यदि अहमनधिकारी तर्हि भवानेव करोतु । भवता मम महानुपकारः कृतः । चिरकृतज्ञोऽहं श्रीमतः । (इति रूप्यकाणि ददाति)

**दीनबन्धुः-** (रूप्यकाणि सुरक्ष्य) भवान् निश्चिन्तो निर्विशङ्को भवतु । अनुमोदनपत्रविषये स्वीकृतिवृत्तिनिर्धारणादिकार्याणि कार्यालयं गत्वाऽद्यैव सम्पादयिष्यामि । एतत्तु मम सव्यकरस्य क्रीडनमेव । ज्ञातं भवता ?

**श्रीकण्ठः-** शोभनम् । तर्हि पुनः कस्मिन् काले आयास्यामि ?

**दीनबन्धुः-** सायं पञ्चवादने भवानागच्छतु । (घटीं विलोक्य) सपाद-दशवादनं जातम् । अधुनाऽहमपि गच्छामि कार्यालयम् ।

**श्रीकण्ठः-** महान् अनुग्रहः अत्र भवतः । चलामि । नमस्कारः ।

**दीनबन्धुः-** नमस्कारः । (इति निष्क्रान्तः)

**श्रीकण्ठः-** (किञ्चिद् दूरं गत्वा) अद्य एकाकिनो मम कार्यं सरलं सम्पन्नम् । ओम्, सरलमिति सम्पन्नमित्येव कथनीयम् । प्राप्तमेव जानामि अनुमोदनपत्रम् । यतः-

साधितं साम्प्रतं सुष्ठु देवतात्रयपूजनम् ।
देवतानां मुखे हुत्वा हविर्द्रव्यं शतत्रयम् ॥ १६ ॥

(सविमर्शम्) किं मयेदम् अनार्यमाचरितम् ? नैव, कदापि नैव । यत् कार्यं हि प्रतिशतं जनानां पञ्चनवतिः करोति, तदनार्यं नैव भवितुं शक्नोति । अस्मिन् मुद्रामेधयज्ञे हि विविधपदवीधारिणः, राजनीतिज्ञाः, शास्त्रज्ञाः, यन्त्रज्ञाः, मन्त्रज्ञाः, स्नातकाः, विद्यावारिधयः, काँस्कान् गणयामि ? सर्वेऽपि सहर्षं सश्रद्धं प्रदक्षिणासहस्रं प्रकुर्वन्तो दृश्यन्ते चेत् ममैव वराकस्य कोऽपराधः ? अरे.....! अहं वच्मि, अत्र देवतात्रयस्य वा को दोषः ? यदेतत् स्वल्पामेव पूजामङ्गीकृत्य गुरुतरकार्याणि सम्पादयति ? एतेन मुद्रामेधव्रतेन खलु कियान् लाभः ? इति सर्वे विचारयन्तु । अहो आश्चर्यम् !

नवधाऽऽवश्यकी भक्तिः शिवादिदेवतुष्टये । परन्तु-
एकधैवात्र पर्याप्ता समुद्रा भक्तिरुत्तमा ॥१७॥

अलं खलु चिन्तनेन । बुभुक्षा बाधते सम्प्रति, गच्छामि तदुपचाराय ।

(इति निष्क्रान्तः)

॥ इति तृतीयं दृश्यम् ॥


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

# पश्चात्तापः

**श्रीहरिहरशर्मा-अर्यालः**
पाल्पाभिजनः

गीता गीता सकलनिगमानां सुधासारभूता,
दैत्या दीर्णास्त्रिभुवनसुखे कण्टकारण्यभूताः ।
लीला येन व्यरचि जगति व्याधिमूलापहन्त्री
कृष्णं वन्दे मधुरमधुरं सच्चिदानन्दकन्दम् ॥१॥

(ततः प्रविशति सूत्रधारः)

**सूत्रधारः-** अये ! इयं नूतना संस्कृतानुरागिणां विबुधानां परिषत्-इति अत्र भवतां मनोऽनुरञ्जनं केन उपायेन विधातव्यम् ?

**नटः-** (प्रविश्य) इयं विबुधपरिषत् केनापि नूतनेनैव रूपकेण परितोषमेष्यति, नान्यथा ।

**सूत्रधारः-** किं प्रलपसि भोः ! क्व तावत् महाकवीनां विश्वप्रसिद्धानि रसालसानि नाटकानि ? क्व च पुनराधुनिकैर्नाटकमर्मापरिचितैः लेखकैः लिखितानि रूपाणि ?

**नटः-** तर्हि शाकुन्तलम् अभिनीयताम् ।

**सूत्रधारः-** परन्तु परमानन्ददानां शाकुन्तलादिनाटकानाम् अभिनयार्थं प्रबुद्धाः संस्कृतज्ञाः अभिनेतारः तद्रसज्ञाः श्रोतारश्च अपेक्ष्यन्ते ।

**नटः-** तर्हि किमपि सरलं रूपकं प्रस्तूयताम् ।

**सूत्रधारः-** तत् शृणु । अद्य कोकलग्रामनिवासिना अरविन्दोपनाम्ना हरिणा उपनिबद्धं पश्चात्तापाभिधानं नूतनरूपकम् अभिनेतव्यम् ।

(नेपथ्ये शब्दः)

**नटः-** (कर्णं दत्त्वा) श्रीमन् ! कीदृशः शब्दोऽयं श्रूयते ?

**सूत्रधारः-** अरे ! शृणु । श्रीकृष्णस्य दर्शनार्थं गच्छन्तीं पत्नीम् अग्निशर्मा ब्राह्मणः निवारितवान् । स तां गृहकोष्ठके बन्दीकृत्य कपाटं पिहितवान् । सा च तत्रैव प्राणान् जहौ । पश्चात् प्रबलं लोकापवादं विचिन्त्य स पञ्चजनान् निर्णायकानाहूय कर्तव्यनिर्णयं परामृशति ।

**नटः-** वयमपि द्रष्टुमिच्छामस्तत्र किं भवतीति चलामस्तावत् । (इति निष्क्रान्तौ)

॥ इति प्रवेशकः ॥

(ततः प्रविशन्ति पञ्चजनाः, अग्निशर्मा च)



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(मध्ये कौण्डिन्यः, तदभिमुखे अग्निशर्मा कौण्डिन्यस्य दक्षिणभागे शाण्डिल्यशाकटायनौ, वामभागे च सोमशर्म-शिवशर्माणौ ।)

**कौण्डिन्यः-** अपि भवता स्वयं जायाया हननं कृतम् ?

**अग्निशर्मा-** आम्, श्रीमन् ?

**कौण्डिन्यः-** किमर्थम् ?

**अग्निशर्मा-** तया ममाऽऽज्ञा उल्लङ्घिता ।

**कौण्डिन्यः-** केयम् आज्ञा ?

**अग्निशर्मा-** जानात्येव भवान् यद् आङ्गिरससत्रे अहं दीक्षितः आसम् । तदा सा अपूपादिकं गृहीत्वा नन्दकुमारान् भोजयितुं गच्छति स्म । तदा तां निवार्य 'कुत्र गच्छसि ?' इति अपृच्छम् ।

**कौण्डिन्यः-** कथं विरम्यते ? घटितचरं सर्वम् उच्यताम् ।

**अग्निशर्मा-** ततः 'इदानीं त्वरा बाधते, पश्चात् सर्वं वक्ष्यामि' इति उक्तवत्यां तस्यां 'सर्वम् अनुक्त्वा नैव गन्तुमर्हसि' इति गर्जितवानहम् ।

**कौण्डिन्यः-** तदानीं तया किम् अनुष्ठितम् ?

**अग्निशर्मा-** ततः सा कृताञ्जलिः न्यवेदयत्-

अस्मिन्नेव वने नाथ ! वासुदेवो विराजते ।
ब्राह्मण्यः सकला याताः तस्माद् यामि दिदृक्षया ॥२॥
इच्छा चेद् भवानपि चलतु इति ।

**शाण्डिल्यः-** तस्मिन् क्षणे किमकरोद् भवान् ?

**अग्निशर्मा-** अहमवदम्- 'वयं पुरुषा इत्थं स्त्रिय इव यं कमपि नानुसरामः । कृष्णो हि भगवान् इत्यत्र किं प्रमाणम् ? द्विजानां कृते निर्मितम् अपूपादिकं तान् अदर्शयित्वैव गोपबालान् भोजयिष्यामि चेत् किं वक्ष्यति लोकः ?

**शाकटायनः-** कृष्णस्तु भगवान् स्वयम् । ततः किमभूत् ?

**अग्निशर्मा–** सा न्यगादीत्- 'तर्हि अहमेव एतत् प्रापय्य आगच्छामि' इति । तच्छ्रुत्वा क्रुद्धेन मया सा प्रोक्ता- 'गर्भिण्या श्रमसाध्या यात्रा न कर्तव्या, इत एव निवर्तस्व' इति ।

**कौण्डिन्यः-** इयमेव आज्ञा भवतः ?

**अग्निशर्मा-** अश्रुपूरिते नयने विधाय सा भूयो निवेदितवती-

अद्यावधि मया काचिद् भवदाज्ञा न लङ्घिता ।
निवेदयामि तं दृष्ट्वा त्वागमिष्यामि मा चिरम् ॥३॥ इति ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**शिवशर्मा-** शैवा वयं न खलु तत्र विचारणीयं
पञ्चाक्षरीजपपरा नितरां तथापि ।
शठेन केनापि वयं हठेन
दासीकृता गोपवधूविटेन ॥४॥
अग्रे भवता किं विहितम् ?

**अग्निशर्मा-** क्रोधाविष्टेन मया पुनरुक्तम्-
आग्रहः कीदृशोऽयं ते ? विहायेमं गृहं व्रज ।
पतिवाक्यतिरस्कारो भार्याधर्मो न भामिनि ॥५॥
तदा सा रुषा अवादीत्-
शास्त्रे नैव हि यत् प्रियः स्वदयितां बद्ध्वा गृहे स्थापयेत्,
मन्ये सत्यमिदं प्रियस्य वचनं नो प्रेयसी लङ्घयेत् ।
रुद्धा मा कुरु पुण्यमित्यपि च का पापे मतिं वेशयेत्,
नाथाज्ञा भवतो भवेदथ न वा तद्दर्शनं कुर्महे ॥६॥ इति ।

**सोमशर्मा-** भगवद्दर्शनार्थं गन्तुकामाम् अन्तर्वत्नीं पत्नीं निवार्य खलु अनुचितं भवताऽऽचरितम् । ततोऽग्रे ?

**अग्निशर्मा-** तदाकर्ण्य अवर्द्धत मम क्रोधः । 'नयामि त्वां बन्दीकरिष्यामि' इत्युक्ते मयि तया भणितम्-
बधान, बन्दीकुरु, ताडय त्वं
विधेहि यद् वाञ्छसि देहमेव ।
परन्तु नाथो मनसः स एव
लीलातनुर्गोपवधूकिशोरः ॥७॥
अपि च-
बध्नासि चेद् देहमिमं बधान,
तथापि धृत्वा पवनस्वरूपम् ।
सखीजनात् प्रागपि नन्दसूनो-
रुपैमि निर्बन्धमहं समक्षम् ॥८॥ इति ।
कौण्डिन्यः-
यदीयलीलावशगाः सदैव
विरञ्चिकामारिपुरन्दराद्याः ।
स एव गोपालकबालकोऽसौ
बुध्येत सामान्यजनैः कथं सः ? ॥९॥


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**अग्निशर्मा-** तदा तु मम चक्षुषोः समक्षे अन्धकार इव व्याप्तः ।
गृहे रुद्धा मयाऽत्र त्वमिच्छन्ती पुरुषं परम् ।
कथं नन्दकुमारस्य समक्षं नु गमिष्यसि ? ॥१०॥
इत्युक्त्वा बलात् तां नीत्वा अवरुद्धवान् ।

**कौण्डिन्यः-** ततः किं किमभूत् ? सर्वं सविस्तरं कथ्यताम् ।

**अग्निशर्मा-** अतः परं किं कथनीयम् ? अहं तां हतवान् इति तु मया स्वीकृतचरम् ।

**शाण्डिल्यः-** अलं तथा कथनेन । भवता सा हता चेत् कथं हता ? कस्यां वेलायां केन कारणेन हता ? इति सुस्पष्टं कथनीयम् ।

**अग्निशर्मा-** तर्हि दण्डेन ताडयित्वा इत्येव कथयामि ।

**कौण्डिन्यः-** प्रलापं त्यक्त्वा यथार्थमुच्यताम् ।

**शाण्डिल्यः-** यो यदायाति तद् वक्ति स वै विक्षिप्त उच्यते ।
यथार्थमेव निश्चित्य प्रवदन्ति मनीषिणः ॥११॥

**अग्निशर्मा-** शिरसि मुष्ट्या प्रहाराः कृताः । नहि, नहि, न तथा । ग्रीवायां प्रगृह्य तस्याः शिरः भूमौ पातितवान् । न, तथापि नैव । गलप्रदेशं रज्ज्वा दृढं न्यबध्नाम् ।

**कौण्डिन्यः-** अलमनेन अवाच्येन । प्रथमम् एतदुच्यताम्- कोष्ठे तां निरुध्य निर्गतो भवान् पुनः प्रत्यागतो न वा ?

**अग्निशर्मा-** पुनः प्रत्यागतेन मया देहलीछिद्रात् निरीक्षितम् ।

**कौण्डिन्यः-** तदा सा किं करोति स्म ?

**अग्निशर्मा-** सा प्रार्थयते स्म ?
स्वामिन् ! ज्योतिरपश्यमत्र भवतः सौदामिनीचञ्चलं,
पश्यामीह पुनर्न तत् क्व नु गतं ? शुद्धं मनो मे न किम् ?
दत्तं पूर्णतया मनो न किमु ते ? त्वत्पादपद्मं ध्रुवं
जानेऽहं जगदध्रुवं मम करे धृत्वाऽऽशु मामुद्धर ॥१२॥
इत्यादिकं कथयन्ती बद्धाञ्जलिः अश्रूणि पातयति स्म । मया कपाटमुद्घाटितम् । सा च भूमौ निपतिता । अन्यं कमपि तत्र अनवलोक्य अहं प्रतिनिवृत्तः ।

**कौण्डिन्यः-** तदनन्तरं यदा पुनस्तत्र गतवान् भवान्, तदा किमपि शब्दादिकं न श्रुतवान् ?

**अग्निशर्मा-** नैव किमपि श्रुतवान् ।

**कौण्डिन्यः-** भवान् यदा कोष्ठं प्रविष्टस्तदा सा गतप्राणाऽभूत् ?


Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**अग्निशर्मा-** न, श्रीमन् ! तदवधि तस्या हृदयं स्पन्दते स्म । अहं च-

आनीय तुलसीपत्रं शालग्रामशिलाजलम् ।
तदानने विनिक्षिप्य तत्कालं मोहमागतः ॥ १३ ॥

**पुनः-** प्रकृतिस्थस्तदाऽपश्यं तच्छरीरं करेणुवत् ।
पश्यन्ती चक्षुषी चोर्ध्वं गोलोकप्राप्तिसूचके १४ ॥
ततस्त्वरया तां बहिरानीय वस्त्रेणाऽऽच्छाद्य भवतः आकारणायागतः अस्मि ।

**कौण्डिन्यः-** तर्हि कथमुच्यते 'मया घातः कृतः' इति ।

**अग्निशर्मा-** मदन्येन केन तत्प्राणाः हृताः ? भवन्त एवं ब्रुवन्तु, अखर्वगर्वपरवशः सन्नपि पुरुषत्वसम्पन्नताभिमानी अहमेव, सहधर्मिण्याः कोमलहृदये कीलनिवेशकः पाषाणकठोरोऽपि पतित्वगर्वी अहमेव, अविज्ञाय मनोविज्ञानम् अबलायाः पेशलभावमर्मणि कुठाराघातकर्ता अहमेव, प्रत्यक्षदेवम् अवमान्य अन्धकारे भ्रमन् अहमेव, प्रकृतिं घातयित्वा दानवताग्राहकः अहमेव, एकतानं सुकुमारहृदयं दण्डेन सम्पीड्य यमराजवत् प्राणापहारकश्च अहमेव ।

**पञ्चजनाः-** (एकस्वरेण) अस्माभिः सर्वं परिज्ञातम् । एकं चान्द्रायणव्रतम् अनुष्ठेयं भवता ।

**अग्निशर्मा-** न केवलम् एकमेव, अपितु द्वादश चान्द्रायणव्रतानि अहमत्रैव स्थित्वा करिष्ये । भवताम् अनुग्रहात्-

प्रियेऽस्मिन् गोपगोपीनां वृन्दावनविहारिणि ।
स्थिरीभूयादच्युता मे भक्तिर्नन्दकुमारके ॥१५॥

जयतु विपिनचारी पाणिशाखाऽद्रिधारी
यदुकुलजनिकारी गोपगोपीविहारी ।
जयतु च वनमाली कोटिकन्दर्पशाली
विनिहतदनुजाली संवदद्वेणुनाली ॥१६॥

॥ पटाक्षेपः ॥

॥ इति पश्चात्तापाभिधानं रूपकम् ॥

✦ ✦ ✦



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

## जयतु संस्कृतम् संस्थायाः प्रकाशनानि

१. मङ्गलग्रहः (काव्यम्) - डा. टीकारामः पन्थी
२. कृष्णाभिसर्पणम् (काव्यम्) - महाकविः भरतराजः मन्थलीयः
३. मीमांसातर्कभाषा - डा. काशीनाथः न्यौपाने
४. चन्द्रप्रभा (काव्यम्) - डा. टीकारामः अधिकारी
५. संस्कृतकवितासङ्ग्रहः (प्रथमपुष्पम्) - संयुक्तसम्पादनम्
६. कलमाक्षरचरितकाव्यम् - प्रा. तेजः केशरी शर्मा
७. संस्कृतमा के छ ? - अनुसन्धानात्मकलेखसङ्ग्रहः
८. जयतु संस्कृतम् (मुखपत्रम्) - संयुक्तसम्पादनम्
९. प्राकृतपोखरा (संस्कृते) - अनुवादकः डा. लक्ष्मीकान्तः पन्थी
१०. लङ्कावतारसूत्रम् - अनु.डा. काशीनाथः न्यौपाने
११. चार्वाकदर्शनम् - प्रा. रेवतीरमणः खनालः
१२. गौतमन्यायसूत्रम् - अनु.प्रा. पद्मप्रसादः भट्टराई
१३. ब्रह्मसूत्रम् - अनु.प्रा.डा. दीर्घराजः घिमिरे
१४. जयतु संस्कृतम् (मुखपत्रम्) - संयुक्तसम्पादनम्
१५. संस्कृतकवितासङ्ग्रहः (द्वितीयपुष्पम्) - संयुक्तसम्पादनम्
१६. कामकलाविलास - प्रा. विद्यानाथ-उपाध्यायः
१७. जैनदर्शनं - तत्त्वार्थसूत्रम् - डा. चन्द्रमणिनेपालः
१८. दर्शनसारामृतम् - लोकनाथलुइँटेलः
१९. मीमांसापरिभाषा - प्रा.डा. ऋषिरामपोखरेलः
२०. समीक्षात्मकग्रन्थ - ध्रुवभट्टराई
२१. ब्रम्हाण्डपुराण - डा. बद्रीपोखेलः
२२. नेपालगौरवम् (महाकाव्यम्) - प्रा.डा. विष्णुप्रसादः देवकोटा
२३. संस्कृतकाव्यसिद्धान्त समीक्षा - डा. नवराज कट्टेल
२४. कर्मफलम् (संस्कृतरूपकसङ्ग्रहः) - प्रा.डा. नवराजकट्टेलः
२५. कवि पण्डित गायत्री गणेशप्रसाद अर्यालका ... - प्रा.डा. नवराज कट्टेल
२६. आचारिकं नाटकम् - प्रा. रामहरिदाहालः
२७. गुरुकुलचर्यम् - प्रा. रामहरिदाहालः
२८. सत्प्रभवं नाटकम् - प्रा. रामहरिदाहालः
२९. दृष्टिसृष्टिनाटकम् - प्रा. रामहरिदाहालः
३०. नेपालमाता (नाटकम्) - नारायणदत्तशास्त्री
३१. मित्रसङ्गमम् नाटकम् - आचार्यः खेमराजकेशवशरणः
३२. कृष्णागारोज्जीवनम् नाटकम् - प्रा.डा. विष्णुप्रसादः देवकोटा
३३. मातृशतकम् (शोककाव्यम्) - प्रा.डा. नवराजकट्टेलः
३४. पृथ्वीशतकम् (खण्डकाव्यम्) - प्रा.डा. नवराजकट्टेलः
३५. संस्कृतनाटिकाकौस्तुभः (लघुरूपकसंग्रहः) - सम्पा. प्रा.डा. विष्णुप्रसादः देवकोटा

ISBN 978-9937-9902-0-2